नं० ८०५–घ

स्मृतितत्वे श्राद्धतत्वम् (धर्मशास्त्रम्)

पत्र – ९६

(संपूर्णम्)

नं० ७०५–घ

पत्राणि ९६ (सम्पूर्णम्)

कर्त्ता रघुनन्दन भट्टाचार्यः

नं० ६०५ ध
स्मृतितत्त्वे श्राद्धतत्त्व
९८ पत्राणि
[illegible]
संपूर्णम्
कर्ता: रघुनन्दनभट्टाचार्य

श्राद्धतत्व ९८ पत्रे

१ ॐ नमः श्रीगणेशाय नमः ॐ नमः कृष्णाय ॥ प्रणम्य सच्चिदानन्दं कृष्णं वेदान्तविस्तृतं ॥ पार्वणादिश्राद्धतत्त्वं वक्ति श्रीरघुनन्दनः
अथ पार्वणश्राद्धं ॥ तत्र गोभिलः ॥ अथ श्राद्धं अमावास्यायां पितृभ्यो दद्यात् ॥ पञ्चमीप्रभृती वा अपरपक्षस्य यदहः
सम्पद्यते तदहर्वा ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा अनिन्द्योनोपमन्त्रितो नातिकामेत ॥ आमन्त्रितो वा नान्यदन्नं प्रतिगृह्णी
यादिति । यद्गृह्ये अन्वष्टक्यं स्थालीपाकेन एतेन पिण्डपितृयज्ञो विख्यातो अमावास्यायां तच्छ्राद्धं इतरदन्वाहार्य्यं
मासीनमिति सूत्रे गोभिलेनान्वष्टक्यस्थालीपाकधर्म्मातिदेशेनामावास्यायां पिण्डपितृयज्ञमभिधाय तच्छ्राद्धमित्यनेन
तस्य श्राद्धत्वमुक्त्वा इतरदन्वाहार्य्यं तस्यामेव श्राद्धान्तरमुक्तं मासीनमित्यनेन तयोर्मासि मासि कर्तव्यत्वमुक्तं ॥ तन्वन्वाहार्य्यं
तद्गृह्ये इतिकर्तव्यताविधानमुक्तं इदानीं गोभिलेन ग्रन्थान्तरे । पेत्यादिना तदभिधीयते ॥ अथेति ॥ अथशब्दः



१

स्नानानन्तर्य्यार्थः ॥ स्नानमुक्त्वा स्नातसूत्राभिधानात् ॥ अथवा अथशब्दः साग्नेः पिण्ड पितृ यज्ञानन्तर्य्यार्थः ॥ तथा
च मनुः ॥ पितृयज्ञंतु निर्वर्त्य विप्रश्चन्द्रक्षय । गिनमान पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यात् मासानुमासिकं ॥ चन्द्रक्षाय
अमावस्यायां मासानुमासिकं प्रतिमासिकं ॥ अथशब्दो मंगलार्थश्च ॥ तथा च मनुः ॥ ॐकारश्चाथशब्दश्च द्वावेतौ
ब्रह्मणाः पुरा कण्ठं भित्वा विनिर्जातौ तेन मांगलिकावु भौ ॥ श्राद्धमिति अभिधेयकर्म्मणो यौगिकनामधेय
मिति ॥ श्रद्धान्वितः श्राद्धं कुर्वीतेति गोभिलसूत्रात् संस्कृतव्यंजनाद्यंश्च पयोदधिघृतान्वितं ॥ श्रद्धयादीयते
यत्तु श्राद्धं तेन निगद्यते ॥ इति पुलस्त्य वचनाच्च ॥ श्रद्धा शास्त्रार्थे दृढप्रत्ययः ॥ प्रत्येया धर्म्म कार्य्येषु तया
श्राद्धमुदाहृता ॥ नास्ति ह्यश्रद्धदानस्य धर्म्मकृत्ये प्रयोजनमिति देववचनात् ॥ एवं च श्रद्धया । न्नादेर्यद्दानं
तच्छ्राद्धमिति वैदिकप्रयोगाधीनं यौगिकं ॥ तथा चोपस्तम्बः ॥ अथैतन्मनुः ॥ श्राद्धशब्दं कर्म्म प्रोवाचेति
श्राद्धशब्दं श्राद्धनामकं कर्म्म एवं पार्वणादीनामपि वैदिकप्रयोगाधीनयौगिकत्वं ॥ पितृभ्य इति यजमानस्य पित्रादि

१ त्रिक मातामहादि त्रिक परं अमुसावेतत्ते यजमानस्य पित्रे अमुसावेतत्ते यजमानस्य पितामहाय अमुसावेतत्ते यजमानस्य
२ प्रपितामहाय इति । पितरो यस्य पूज्यन्ते तत्र मातामहा ध्रुवं ॥ अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेदिति ॥ इत्यादि याज्ञ
वल्क्य वचनाच्च ॥ मातामहा इति तदादि त्रिक परं ॥ इत्यादि बहु वचनात् लाग... सं सूचका उक्तेः ॥ यत्तु गोभिलः
पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः मातामहेभ्यः प्रमातामहेभ्यः वृद्धप्रमातामहेभ्यः स्वधोच्यतामिति ॥:
अत्र प्रागुक्त श्रुतौ यजमानस्येति श्रुतेः पित्रादि पदं स्वजनकादिपरं ननु वसु रुद्रादिति स्मृताः पितरः श्राद्ध देवता
प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः इति याज्ञवल्क्य वचनाद्वसु रुद्रादि परं एतत्वचनन्तु तदाकारत्वेन
भावनापरमिति श्राद्धविवेक प्रभृतयः ॥ यत्तु स्मृत्यर्थः सार मदन पारिजातयोः ॥ वसुरुद्रादित्य रूपाणां श्राद्धेषु
तर्पयेत् पितॄणां ॥ नाम गोत्र समुच्चार्य्य तिलैस्तीर्थेषु संयतः इत्युक्तः श्रुत्यादिषु पित्रादीनां प्रत्येक निर्देशात् ॥
अत्र पितरो देवता इत्यापस्तम्ब सूत्रे देवता इति बहु वचन निर्देशात् ॥ न योषिद्भ्यः इत्यादि वचनाच्च ॥ अ पित्रादीनां

प्रत्येकेन पत्नीनिरपेक्षेनच देवतार्थं पितृभ्य इतिवह्रुवचनात् साहित्यप्रतीतिरभिधान क्रियाऽपेक्षया गर्गाभोज्यतामिति वचनमुदस्यात्
इत्यनेनोक्तः क्रियापेक्षया श्रुतेर्बलवत्वस्य जावालेनोक्तत्वात् ॥तथाच जावालः॥ श्रुतिस्मृति विरोधे तु श्रुतिरेवगरीयसी ॥अविरोधे
सदा कार्य्यं स्मार्त्तं वैदिकवत् सदेति ॥ अपरपक्षस्य कृष्णपक्षस्य तथाच शुक्लप्रतिपदादि मासमधिकृत्य श्रुतिः ॥ पूर्वपक्षः
देवानां परपक्षः पितृणामिति ॥ यदहरिति चतुर्दशितरां कृष्णपक्षीयां काञ्चीतिथीं प्राप्य सौचादि द्रव्यसम्पदुपपद्यते ॥ तस्यां
श्राद्धं कुर्य्यात् तस्मिन् चतुर्दशिवर्जनमाह मरीचिः ॥ विषन्नस्त्र स्वापदाहि तीर्य्य ब्राह्मणघातिनां ॥ चतुर्दशी क्रियाकार्य्या
अन्येषान्तु विगर्हिता ॥ विषादि साहचर्य्यात् ब्राह्मन रु तच्चान्तोऽस्मासीति बोध्यं ॥ अत्र यदमावास्या पञ्चमी प्रभृति
तिथ्युपादानं तत् प्रतिपदाद्यपेक्षया परकालस्य श्राद्ध निर्णेतः प्राशस्त्यमात्र ज्ञापनार्थं ॥ तथाच निगमः ॥ अपरपक्षे
यदहः सम्पद्यते अमावास्यायान्तु विशेषेणेति मनुः ॥ कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं ॥ श्राद्धे प्रशस्ताः
तिथयो यथैतान तथेतरा इति ॥ अन्यतिथावपि श्राद्धमाह गौतमः ॥ तथा सर्वस्मिन् दिने द्रव्य देशसन्निधौ कालनियमः

श्रां तत्वं

२ सति द्रव्ये शक्तस्य अरोगिनः बोध्यव्यः ॥ यत्तु अमावस्याष्टकाकृष्णापक्षपञ्चदशीषु च इत्यभिधाय एतच्चानुपनीतोऽपिकुर्यात
३ सर्वेषु पर्वसु ॥ श्राद्धं साधारणं नाम सर्वकामफलप्रदं । भार्य्या विरहितोप्येतत् प्रवासस्थोऽपि नित्यशः । शूद्रोऽप्यमन्त्रवत्
कुर्य्यात् अनेन विधिना बुधः ॥ इति मात्स्यपुराणे कृष्णापक्षप्रथकत्वेन अमावास्यायां च नित्यत्वः इत्यनेन नित्य
त्वाभिधानं तदनुपनीतस्य जाते कुमारेऽरण्यां जपित्वा तस्मिन्नायुष्ये होमान् जुहोति तस्मिन् व्युञोपनयन गोदान
क्रिया तस्मिन्नेवैनं उद्वाहयेयुरिति वचनवापोक्तजातागैरपि श्राद्ध समुचितोपनीतस्य च सांगैः कर्तव्यत्वपरं तयो रमा
वास्यातिरिक्ते कृष्णापक्षे निमित्तिक पार्वणानिषेधात् ॥ तथा च मनुः ॥ नदर्शन विना श्राद्धमाहिताग्नेर्द्विजन्मनः
अन्यथावाक्यन्तेदापत्तेः ॥ तत्रामावास्या कर्तव्य पर्व कर्तव्ययोः पार्वणत्वमाह भविष्यत् पुराणं ॥ अमावास्या
यां यत् क्रियते तत् पार्वणमुदाहृतं ॥ क्रियन्ते पर्वणि यत्तु तत् पार्वणमिति स्थितिः ॥ अत्र यदि स्यादेवकृभय
त्राभिधानेन विकल्पार्थ्यवाशब्देनच पार्वणस्य लक्षणा द्वितीयलक्षणमुक्तं पर्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्वः

त्वात् तच्छ्राद्धस्य वैदिकप्रयोगेन यौगिकत्वेन पार्वणात् प्राप्ताध मावास्यायां यत्र प्रयोगाभिधानं तत्र अमावस्याश्राद्धस्य कृ
तिवार्थं तेन पार्वणेनेत्यादौ यौगिकेनानावयव शक्त्यपेक्षया एकस्याः समुदाय शक्तेर्लघुत्वादमावास्या पार्वणाति
देशो लभ्यते ननु पूपादि द्रव्याष्टकादि पार्वणधर्मातिदेशः ॥ अतो ऽमावस्यायामष्टम्यादि पर्वणि च तालिमिन्न कृ श्राद्धे
पार्वणश्राद्धं अन्यत्र पार्वणविधिक श्राद्धमित्यभिलापे विशेष ॥ ब्राह्मणानामन्त्र्येति निमन्त्र्य श्राद्धं कुर्वीत ॥ पूर्वेद्युर्वा
पूर्वदिने या निमन्त्रणं तत्रामन्त्रणं यत्र प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणं यत्र प्रत्याख्याने कामचारस्तदामन्त्र
णमिति पाणिनिसूत्रभाष्ये भेदेनोपादानात् ॥ अत एव निमन्त्रणातिक्रम निषेधमाह । अनिन्द्येनो
ऽऽमन्त्रितो नातिक्रामेदिति भावः ॥ नात्र पूर्वापरदिननिमंत्रणे इच्छा विकल्पः ॥ तत्राद्य दोषात् किन्तु
पूर्वदिनासामर्थ्ये परदिने । तथा च । केवलः स्वकर्ता स्मि इति श्रियस्य दातारं विप्रान्निमन्त्रयेत् ॥ निरामिषं
सकृत् भुक्त्वा सर्वसुहृज्जनेर्गृहे ॥ असम्भवे परेद्युर्वा ब्राह्मणांस्तान्निमन्त्रयेत् । एवं निश्चित उपदान्तिश्चयः ॥
ति

७ निरामिषशाकङ्क्षोजनस्यांगत्वं ॥ यद्यपि निश्वयोऽत्र स्वभाविनि प्रसूह्य सन्दृवाक्यस्तथापि शास्त्र प्रतिपादितस्य: कर्तव्यत्वांगानमात्र रूपोऽत्र विवक्षितः
५ यत्र तादृशज्ञानं नास्ति तत्र तदंगरहिते नापि श्राद्धं कर्तव्यं ॥ वराहपुराणं ॥ वस्त्रसौचादिकर्तव्यं स्वः कर्तास्मीति जानता ॥ स्नानोपलेपनं चैव
कृत्वा विप्रान्निमन्त्रयेत् ॥ दन्तकाष्ठं च विसृजेत् ब्रह्मचारी शुचिर्भवेत् । विसृजेत् श्राद्धीय ब्राह्मणेभ्यो दद्यात् ॥ एतच्च पार्वणप्रकृतित्वात् ॥
सर्वश्राद्धव्यापाति किन्तु आभ्युदयिक श्राद्धे श्राद्धदिनस्य निमन्त्रणं प्रातरामंत्रितान् ॥ इति छन्दोगपरिशिष्टात् ॥ तद्दिने योषित् प्रसंगी
तरस्य निर्मन्त्रणमाह मार्कण्डेयपुराणं ॥ निमंत्रयेत्तु पूर्वेद्युः पूर्वोक्तान् द्विजसत्तमान् ॥ अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसंगिनं
अत्र प्रशस्तात् क्रियानिष्पत्तिरूपमैथुनकृतस्य निषेधः॥ श्राद्धदिने श्राद्धकर्ता दन्तकाष्ठं मरवादित्वाद्वादशगण्डूषजलेनैव मुखं
परिसोध्य प्रातः स्नात्वा पीतोपवाससी भूयात् । श्राद्धे जन्मदिने चैव विवाहेऽजीर्णसम्भवे । व्रते चैवोपवासे च वर्जयेद्दन्त
धावनं ॥ इति विष्णूक्तः॥ अलाभे दन्तकाष्ठानां प्रतिसिद्धं तथादिने ॥ अपांद्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥ इति विष्णुपुराणात् ॥
अप्येवामंत्रितोदाता प्रातः स्नातः सहाम्बरः ॥ इति देवलवचनात् ॥ तथैवामंत्रितस्तथैव पूर्वोक्तप्रकारेण आमंत्रितो येन स तथा इति ॥—

देवकर्म उदङ्मुखेन पितृकर्म दक्षिणमुखेन कर्तव्यमाह सत्यतपाः ॥ उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः ॥ प्रदद्यात् पार्वणे श्राद्धे दैवपूर्वं
विधानतः ॥ द्विजसत्तमाभावे भविष्यपुराणं ॥ यस्त्वासन्नमतिक्रम्य ब्राह्मणं पतितादृते ॥ दूरस्थं भोजयेन्मूढो गुणाढ्यं नरकं व्रजेत् ॥ तस्मान्ना
तिक्रमेत् प्राज्ञो ब्राह्मणान् प्रातिवासिकान् । सम्बन्धिनस्तथा सर्वान् दौहित्रं विट्पतिं तथा ॥ भागिनेयं विशेषेण तथा बन्धून् गृहाधिपान् ॥
नातिक्रमेन्नरश्चैव तान् सर्वान् सुमुखानिति ॥ सम्बन्धिदौहित्रादि विशेषणमिति ॥ दानकल्पतरौ यम ॥ प्रार्थयेत्तु प्रदोषान्ते भुक्तान्नं
सपित्तान् द्विजान् । सर्वायासविनिर्मुक्तौ कामक्रोधविनिर्जितैः ॥ भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धकर्मणि ॥ ते तं तथेत्यविस्मेन
याचितेद्गनीं सुखं ॥ प्रार्थयेन्निमन्त्रणापूर्वकं नियमं श्रावयेत् ॥ तन्निप समाह सर्वायासेत्यादि । ते ब्राह्मणास्तं निमन्त्रयितारं तथेत्युचुरिति ॥
अत्रैक ब्राह्मण निमन्त्रणपक्षेऽपि प्रकृतावूहाभावात् न बहुवचनस्थाने एकवचनोहः न वा मन्त्रस्य बाधः ॥ वै भर्तृकापेक्षया ॥ पं.१७।
प्राथमिकत्वेन बलवत्तः प्रातिपदिकार्थस्य समवेतत्वेन विनियोज्यत्वात् । किन्तु अविकृत एव मन्त्रपाठः ॥ मत्स्यपुराणे ॥ अपिसंभपात्र
निर्मंत्रितः उत्सुपक्रम्य बहुवचनमन्त्रपाठश्च तथाच्या दक्षिणजानुं मात्तम्य संभपात्र निमंत्रितः । एवं निमन्त्र्य नियमान् श्रावयेत्

५ पैतृकान् बुधः ॥ तन्नियममाह ॥ आक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः । भवितव्यं भवद्भिश्च मया च श्राद्धकर्म्मणि ॥ प्रकृतावेवं
5 प्राप्तत्वादेकोद्दिष्टेऽपि नोहः ॥ एवं देवताभ्यः पितृभ्यश्च इत्यत्राप्यूहे नैव कार्यं पितृपदस्याग्निष्वात्तादिपरत्वात् ॥ अत्र परदिने निमन्त्रणे
सर्वीयामेत्यस्य न पाठः ॥ श्वः पदं न वपात् किन्तु आक्रोधनैरित्यस्य पाठः ॥ अत्र निमंत्रितः इत्यस्यातीतमात्रप्रकाशकत्वात् श्राद्धं कर्तुं
त्वामहं निमंत्रये इति वर्त्तमाननसास्य प्रयोग उक्तः अत एव विकृतैकोद्दिष्टप्रयोगे विप्रत्वामहं निमंत्रये इति ... प्रयोग इति तत्वं ॥
ब्राह्मणानामसम्पत्तौ कुशमयब्राह्मणे श्राद्धमुक्तं ॥ श्राद्धविवेके । निधाय दर्भोयच्चासनेषु समाहितः । प्रेष्यानुप्रेष्यसंयुक्तं विधानं प्रतिपादयेत् ।
इति तत्सूत्रवचनात् ॥ ब्राह्मणानामसम्पत्तौ कृत्वा दर्भमयान् द्विजान् ॥ श्राद्धं कृत्वा विधानेन पश्चात् विप्रेषु दापयेत् ॥ इति श्राद्धसूत्रभाष्यकार
समुद्रकरधृतवचनाच्च ॥ दर्भवटुलक्षणमाह ॥ रत्नाकरे गृह्यसंग्रहः ॥ ऊर्द्ध्वकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः ॥ दक्षिणावर्तको ब्रह्मा
वामावर्तस्तु विष्टरः ॥ शान्तिदीपिकायां च ॥ सप्तभिः पञ्चभिर्वापि सार्द्धद्वितयवेष्टितं ॥ ओंकारेणैव बध्नीयात् द्विजः कुर्यात् कुशद्विजं
नवभिरित्यत्र पंचभिरिति कर्म्मोपदेशिन्यां पाठः ॥ दर्भसंख्याविशेषाभिधानं छन्दोगेतरपरं ॥ यज्ञवस्तूनि मुष्टीं च स्तम्भे दर्भवटौ तथा।

दर्भसंख्या नविहिता विष्टरास्तरणे ह्यपि ॥ इति छान्दोगपरिशिष्ट वचनात् ॥ यस्य प्रैषस्य प्रश्नस्यानुप्रैषणां प्रस्तुतरमवाधितं ॥
तारसुरूकर्म्मणो विधानात् ब्राह्मणप्रतिनिधित्वेन गोभिलगृह्ये ॥ कमण्डलुं दर्भवटुं वा निधायेति दृष्ट दर्भवटुरूपदर्भचय
मादाय कर्म्मकरणे निमंत्रितोऽस्मीति त्वमास्व: इति प्रस्तुतराभावात् ।निर्मन्त्रणात्वस्मि प्रश्नाभाव: ॥ नच दर्भब्राह्मणपक्षे होत्रै वा वासा
सादने सीदामीति अविरुतमेव वक्तव्यमिति भट्टभाष्यदर्शनात् ॥ अत्रापि निर्मंत्रितोऽस्मीत्यनेनैव वक्तव्यमिति वाच्यं ॥
यच्चुवा उभयं विकीर्षेद्धोत्रं ब्रह्मत्वंच तेनैव कल्पेन छत्रं वेत्तिरासंगं उदककमण्डलुं दर्भवटुं वा आसने निधायेति गोभिल: ॥
सूत्रेण होतुर्ब्रह्मकर्म्मकर्तृत्वाभिधानात् । तत्र सीदामीत्यस्य प्रतिनिधि[illegible]रोपवेशनेन समवेतार्थत्वात् एतेनैवेत्येवकारेण सीदे
त्यस्य कल्पनायां अप्रयुक्तत्वाच्च अत्र तु निर्मंत्रितोऽस्मीत्यस्याऽसमवेतार्थत्वेन सर्वथैवाप्रयुक्तं ॥ ओं कुरुष्वेत्यादि प्रस्तुतरानानु अन्ये
नापि सम्भवादनुज्ञादीनां कर्तव्यत्वैव ॥ एवंच दर्भवटो: श्राद्धस्य करणेऽपि आविच्छिन्नेकार्यभावे यत्प्रधानस्य पच्यते अविकृत
फलं तस्य कर्म्म प्रकरणांगतेति न्यायेन श्राद्धांगत्वात् कर्तृसंस्कारत्वाच्च निर्मन्त्रणाभावे सक्रान्तिरामिषभोजन मैथुनवर्जनयो: कर्तव्यतेति ॥

५ उपवेशनमाह गोभिलः ॥ स्नातानसुचिनाचान्तान् प्राङ्मुखानुपवेश्य देवे युग्मान् यथाशक्ति अयुग्मान् पित्रे एकैकमोदङ्मुखान् ॥ द्वौ देवे त्रिणि
6 पित्रे एकैकमुभयत्र वा मातामहानामप्येवं तन्त्रं वा वैश्वदेविकं देवपूर्वं श्राद्धं कुर्वीतेति ॥ स्नातानवगाहितान् न तु मन्त्रस्नातान् सुचिन्
सूतकादिरहितान् एवं प्रयत्नादियुक्तानां ब्राह्मणानां स्वागतप्रश्नपाद्यादि दानासनस्पर्श हस्तग्रहण पूर्वकं दर्भासने उपवेशनानि कार्य्याणि
एवं प्रयतोऽपराह्णः सुचिः शुक्लवासः दर्भेषु तिष्ठन् स्वागतमिति श्राद्धकर्त्ता ब्रूयात् ॥ पाद्यार्घ्याचमनीयोदकानि दत्वा ब्राह्मणान् सम्पूज्य
उपवेशयेदासनमालभ्य इति शंखलिखितवचनात् ॥ स्वयमपि सूतकादिरहितः स्नातः कृतदेवपूजानाकृस ॥ ततः प्रथमं प्राङ्मु
खः स्थित्वा पादौ प्रक्षालयेज्जलैः शनैः उदङ्मुखेन तु दैवते पैतृके दक्षिणामुखः ॥ इति देवलवचनात् ॥ दक्षिणाभिमुखीभूय कृत
पाद्यशौचः ॥ तत्रापि वामपादक्रमः ॥ यथा गोभिलः ॥ सव्यं पादमवाननिज्ये इति वामपादं प्रक्षालयति ॥ दक्षिणपादमवाननिज्ये
इति दक्षिणपादं प्रक्षालयति इति ॥ कात्यायनसूत्रेऽपि सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयतीति । तेन यजुर्वेदिनामपि प्रथमं
वामपादप्रक्षालनं एवं स्याऽपि ततः प्राङ्मुखः उदङ्मुखो वा कृताचमनः ॥ शुचिदेशं विविक्तंच गोमयेनोपलेपयेत् ॥ ॥५॥

दक्षिणा प्रवणं चैव प्रयत्नेनोपपादयेत् ॥ इति मनूक्त गोमयोपलिप्ते देशे उपवेशयेत् दर्भ उवत् स्थितः आसीन ऊर्द्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ॥ तदासीनेन कर्तव्यं न प्रह्वेण न तिष्ठतीति छन्दोग परिशिष्टात् ॥ ब्रह्मपुराणे ॥ पृथक् पृथक् चासने तील तैलेन दीपिकाः अविच्छिन्ना स्तथा देया स्तन्तु रक्षन्ति वै द्विजाः ॥ आसनेषु ततः सन्निधानेषु रक्षन्ति श्राद्धं इति शेषः ॥ द्विजा इति सम्बोधनम् ॥ अविच्छिन्नाः प्रच्छादनाद्यव्यवस्थायिनः ॥ ततश्च दक्षिणे पाणौ पवित्रं वामे बहुतर कुशान् धारयेत् ॥ सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः ॥ इति छन्दोग परिशिष्टात् ॥ एवं कुशहस्तः ओं वास्तोष्पुरुषाय नमः इति वास्तो अर्चनं कुर्यात् ॥ श्राद्धाधिकरणे यत्र नार्चितो वास्तुदैवतः ॥ तत्र शून्यं भवेत्सर्वं रक्षो विघ्नादि गर्हितं ॥ तस्माद्वास्त्वर्चनं कार्य्यं सम्यक् सम्पद मीप्सुभिः ॥ इति राघवभट्टः ॥ एतद्वास्तोश्च प्रकृष्टधर्म वचनात् ॥ यमी याज्ञवल्क्यः ॥ ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु । प्रायश्चित्तोऽपि सर्वस्मात् दुष्कृतान् मुच्यते पुमान् ॥ प्रमादात् कुर्वतां कर्म्म प्रच्यवेतां ध्वरेषु यत् ॥ स्मरणादेव तद्विष्णो सम्पूर्णं स्यादिति श्रुतिः ॥ तद्विष्णोरिति मंत्रेण स्नायादप्सु पुनः पुनः ॥ गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै
ति

ततः श्राद्धस्यादौ तु ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति योगिनः । दिवीव चक्षुराततः ॐ स्वाहा इत्यनेन विष्णुं स्मरेत् ॥ अग्निपुराणं ॥
७ अर्चयित्वा जगन्नाथं शुभकर्म्म समाचरेत् ॥ दत्वाग्रं देवदेवाय तच्छेषान्युपजुहुयात् ॥ लिङ्गपुराणं ॥ शालिग्रामशिलाग्रे तु
7 यत् श्राद्धं क्रियते नरैः । तस्य तृप्तास्तिकस्था पितरश्च पितरो दिवि ॥ तत्र श्व शाल ग्रामे विष्णुं सम्पूज्य श्राद्धाया ग्रभागं दद्यात्
जानुपातं विशेषयति वशिष्ठः ॥ दक्षिणं पातयेत् जानुं देवान् परिचरन् सदा । पातयेदितरान् पितॄणां परिचरन्नपि ॥ उत्तराद्धम् ॥
अथ श्राद्धनिन्दितदेशः ॥ यमः रूक्षं कृमियुतं क्लिन्नं संकीर्णं निष्टगन्धिकं ॥ देशं त्वनिष्टशब्दं च वर्जयेत् श्राद्धकर्म्मणि ॥ रूक्षं धूलि
युतं क्लिन्नं पंकिलं ॥ अनिष्टगन्धं असुरभिगन्धं ॥ अनिष्टशब्दं प्रतिकूलशब्दं ॥ विष्णुः ॥ न म्लेच्छविषये श्राद्धं कुर्य्यात् न गच्छेत्
तथा चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ॥ तं म्लेच्छदेशं जानीयादार्य्यावर्तमतः परं ॥ शांखलिखितौ ॥ नेष्टकारचिते पितॄणां तर्प
येदिति । परकीयगृहे यस्तु स्वान् पितॄणां स्तर्पयेज्जन्तुः ॥ तद्भूमी स्वामिनस्तस्य हरन्ति पितरो बलात् ॥ अग्रभागं ततस्तेभ्यो दद्यान्मू
ल्यस्य जीवतां ॥ गृहइति भूमात्र परं ॥ तद्भूमी स्वामी पितृ हरणस्य हेतुत्वेनाभिधानात् ॥ मूल्यदानाग्रदानयोः प्रत्येक हरणः

निवर्तकत्वेन वैकल्पिकत्वं ॥ स्मृतिशास्त्र विकल्पस्तु अनाऽऽस्थापूरणो मतः ॥ इति भविष्यत्पुराणात् ॥ ततश्च श्राद्धविधानतः ॥
निवर्तकत्वेन तदंगत्वात् तत्र रीत्या भुः स्वामिपितृभ्यः प्रथमतोदेयं ॥ ततः पार्वणादौ प्राचीनरीत्यादिना नान्दीमुखउपवीति
त्यादिनेति ॥ अत्र पितृपदस्य प्राप्त पितृलोकमात्र परत्वे प्रेतेषणां हरणासम्भवात् सुतरां स्वधेति निर्देश्यं ॥ स्वधाकार परित्यागी
सर्वेषु पितृकर्मसु ॥ इति श्राद्धकाण्ड विरुद्ध वचनात् ॥ प्रमीतमात्र परत्वेऽपि न स्वधां च प्रयुंजीत ॥ प्रेतपिण्डे दशाहिके ॥
इति कण्ठशृंग वचनं ॥ प्रेतपिण्डे दशाहिग्रहणात् अन्यत्र स्वधाप्रयोगादत्रापि तथा ॥ ब्राह्मणास्तुन्य वर्णानां यः
करोति दशाहिकं ॥ न दुर्गामसौ याति परत्रेह च निस्वसः ॥ अस्वर्णोर्द्ध देहिक निषेधस्य मन्त्रादि प्रकरणोपस्थादन्यभूमावत्रेऽस्वदा
नमिति भीष्मतर्पणे श्रीदत्तोप्येवं ॥ एतच्च अस्वामिकभूमौ स्वभूमौ न दध्यात् ॥ अस्वामिकाऽन्यायमः ॥ अटव्य पर्वताः पुन्याः
नद्यः स्तीर्थानि यानि च ॥ सर्वाण्यस्वामिकान्याहुः नहि तेषु परिग्रहः ॥ पुन्याइति विशेषणादटव्यः नैमिषाद्याः पर्वताः
हिमालयाद्याः नद्यो गंगाद्याः तीर्थानि पुरुषोत्तम क्षेत्र वाराणस्यादीनि ॥ स्वाम्यभावे हेतुमाह नहीति ॥ परिग्रहो

८ यथेष्ट दानविक्रयादि विनियोगलक्षणा ॥ देवलः ॥ श्राद्धस्य पूजितो देशो गया गंगा सरस्वती ॥ कुरुक्षेत्रं प्रयागश्च नैमिषं
१ पुष्कराणि च ॥ नदीतीरेषु तीर्थेषु शैलेषु पुलिनेषु च ॥ विविक्तेषु च तुष्यन्ति दत्तेनेह पितामहाः ॥ विविक्तं विजनं
श्रीदत्तोप्येवं ॥ ततश्च तथाविधान विप्रान् स्वागतादिना पूजयित्वा परेशाययेत् ॥ श्राद्धार्थं यत्र वेश्यां प्रवेशयितव्यं
तदुत्तया दिशया निःसारयितव्यं ॥ तद्दक्षिणया दिशा ॥ उत्तरेणाहरेद्धूधां दक्षिणेन विसर्जयेदिति ॥ वायुपुराण
वचनात् ॥ वेदिरत्र दक्षिणाप्लवनदेशः ॥ याज्ञवल्क्यः ॥ अपराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान् ॥ पवित्रपाणिराचान्तानासने
षूपवेशयेत् ॥ उभयत्रेति देवपक्षे पितृपक्षे च ॥ एवं मातामहपक्षेऽपि पृथक् वैश्वदेव ब्राह्मणां मातामह ब्राह्मणांश्च तद्धु
त्वा वैश्वदैविकमिति पितृपक्षमातामहपक्षार्थं ॥ एकं वैश्वदैविक ब्राह्मणोपवेशनं ॥ एवं ब्राह्मणत्रया सम्पत्तौ पक्षत्रया
सनेषु दर्भवटुत्रयोपवेशनं ॥ अथ श्राद्धदेवाः ॥ तत्र श्राद्धभेदे देवताभेदमाह बृहस्पतिः ॥ इष्टश्राद्धे क्रतुदक्षः सत्यो
नान्दीमुखे वसुः ॥ नैमित्तिके कालकामौ काम्ये च धुरिलोचनौ ॥ पुरुरवामाद्रवाश्च पार्वणे समुदाहृतौ ॥ वृद्धिश्राद्धे ॥—

द्युष श्राद्धे नैमित्तिके एकोद्दिष्टे ॥ एकोद्दिष्टं तु यत् श्राद्धं तन्नैमित्तिकमुच्यते ॥ तदप्यदैवं कर्तव्यं अयुग्मानाशयेद्द्विजान्
इति भविष्यपुराणं ॥ एवंचैकोद्दिष्टे विश्वेदेवकरणाऽकरणयोः शाखिभेदेन व्यवस्थाः ॥ तत्र सामग यजुर्वेदीनः
सार सारात् विश्वदेवरहितत्वं ॥ सामगेतरर्ग्वेदिनो विश्वदेवसहितत्वं ॥ यस्मिन् वेदे पुराणे वा विश्वदेवा न तत्र मिरे ॥
आसुरं तद्भवेत् श्राद्धं दग्धत्वं मन्त्रवर्जितं ॥ इति तत्कृत्यपरिशिष्टोक्तत्वात् ॥ काम्ये काम्यश्राद्धे ॥ कामायत्तद्धितं काम्यमभि
प्रेतार्थसिद्धये ॥ पार्वनेन विधानेन तदप्युक्तं खगाधिप ॥ इति भविष्यपुराणोक्तेः ॥ अत्र कामायेत्यनेनैवाभिप्रेतार्थलाभः
अभिप्रेतार्थसिद्धये इति पुनरुपादानं स्वगतपुत्रादिफलोद्दिश्य कर्तेन तिथ्यादिश्राद्धनामेव काम्यत्वार्थं । अत एव
संक्रान्त्यादि श्राद्धादस्य भेदः ॥ एवं संक्रान्त्यादिश्राद्धे पितृन्तृप्रप्राधान्यं पुत्रादेरानुसंगिकत्वं तिथ्यादिश्राद्धे तु पुत्रादेः
प्राधान्यं पितृतृप्तेरानुसंगिकत्वमिति ॥ देवविशेषवाचकस्यापि पुरुरवमर्दुकार मध्यता पितृदयितायां श्राद्धकारउ
कल्पतरुमैथिलग्रन्थप्राचीनश्राद्धविवेकेषु तथा लिखनात् ॥ रायमकुटप्रभृतिभिरेवं पुरोरयतो इति स्वकपोलरचितः

उत्पत्स्याओंकारयुक्तं लिखितमिति । आसनविशेषमाह देवलः ॥ विश्वेदेवार्थं विप्राः पूर्वं निमन्त्रिताः ॥ येचात्र ॥ प्राङ्मुखान्यासनान्येषां द्विदर्भो-
पहितानि च ॥ दक्षिणामुखयुक्तानि पितृणामासनानि च । दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः ॥ प्राङ्मुखत्वं दक्षिणामुखत्वं च अग्र-
भागापेक्षयाद्रष्टव्यं ॥ एषां विश्वदेव ब्राह्मणानाम् एवं पितॄणां पितृब्राह्मणानाम् एतच्चासनं ब्राह्मणोपवेशनार्थं नतु विश्वेदेवार्थं ॥
पित्रार्थं वा ॥ ततः सिद्धमिति प्रोक्ष्य कल्पिते आसने तथा ॥ आसध्वमिति तान् ब्रूयादासनं संस्पृशन्नपि इत्यत्र कल्पितासनस्य ब्राह्म-
णोपवेशनस्थोपयोगावगतेः । विश्वदेव पित्रार्थासनन्तु कुशत्रयात्मकमेव । पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि आवाहयेदनुज्ञा-
तो विश्वेदेवास इत्युचा ॥ तथा द्विगुणांस्तु कुशान् दत्वा उशन्तस्त्वेत्यृचा पितॄन् ॥ इति याज्ञवल्क्योक्तेः ॥ प्रख्यास्यते अनेनेति प्रक्षालनं
जलं ॥ तेन गृह्णीं ब्राह्मणपाणौ जलं दत्वा विष्टरार्थं आसनार्थमिति दीपकलिका ॥ कुशानृजून । अथ दर्भाः ब्रह्मपुराणे ॥ हरिताः
सपिञ्जलाश्चैव पुष्टाः स्निग्धाः समाहिताः ॥ गोकर्णमात्राश्च कुशाः सकृच्छिन्नाः समूलकाः ॥ पितृतीर्थेन देयास्तु ॥ दूर्वा श्यामाक
एव च ॥ काशाः कुशाः वल्वजाश्च तथान्ये तीक्ष्णरोमशाः ॥ मौञ्जाश्च शाद्वलाश्चैव षड्दर्भाः परिकीर्तिताः ॥ मौञ्जा सरमुञ्जा ॥-

सपिञ्जलाः साग्राः तीक्ष्ण रोम संहतिः ॥ वल्वजानां विशेषणां तेषामभावे सूकतृणशरशीर्य्य वल्वजमुतनल सुराठ वर्जं सर्वतृणानि उक्ति
गोभिलेन तद्व्यतिरिक्त वल्वजानां निषेधो बोध्यः ॥ सूकानि फलपुष्पमञ्जर्य्यः तानि येषां तृणानामस्सन्ति तानि शूकतृणानीति ॥–
भट्टनारायणाचरणा गोकर्णमात्रा विस्तृतां गुच्छा नासिकाः परिमिताः । विप्राणु कुशस्थाने काशं दूर्वां ग्रादध्यात् इति कृत मुष्टी हस्ता
परिमिताः कुशाः प्रस्तरणार्थाः । तथा च वायुपुराणं ॥ रत्नी प्रमाणाः शस्तार्हैः पितृतीर्थेन संस्कृताः ॥ उपमूले तथा लूना प्रस्तरणार्थं कुशोत्तमाः ॥ वर्चे प्रति प्रशवमाह हारीतः ॥ पथि दर्भाश्चितौ दर्भा येद र्भा यज्ञभूमिषु ॥ स्तरणासन पिण्डेषु षट्कुशान् परिवर्जयेत ॥
पिण्डार्थं ये स्तृता दर्भाः यैः कृतं पितृतर्पणं ॥ मूत्रोच्छिष्ट प्रलेपे च त्यागस्तेषां विधीयते ॥ छान्दोगपरिशिष्टं ॥ पिण्डार्थं ये स्तृता दर्भा
तर्पणार्थं तथैव च ॥ धृतैः कृते च विण्मूत्रे त्यस्य प्रतिप्रसवमाह । नीविमध्ये तु ये दर्भाः ब्रह्मसूत्रे तु ये धृताः । पवित्रांस्तान्
विजानीयात् यथाकामस्तथा कुशाः ॥ आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमाः ॥ नोच्छिष्टं तु भवेत्तत्र भुक्तशेषं विसर्जयेत्
अधानुतादि ॥ पूर्वदिने निमन्त्रणे तदहनि मन्त्रणे वा श्राद्धदिने निमन्त्रणानन्तरं मनुजाग्रहणमहापस्माम्मः ॥ पूर्वेद्युः

१० निवेदनं अपरेद्युः द्वितीयं [illegible] तृतीयमामन्त्रणमिति निवेदनं श्वो मया श्राद्धं कर्त्तव्यं भवन्तो निमन्त्रणीयाः इति निवेदनीयम् ।। द्वितीय
10 त्वामहं निमन्त्रये इत्यनेन निमन्त्रणं त्वयि श्राद्धमहं करिष्ये इति तृतीयमनुज्ञाग्रहणार्थकं ।। तत्र दर्भवटुपक्षे निवेदननिमन्त्रणयोरभावः
किन्तु अनुज्ञामात्रं ।। त्वयीतिस्थाने दर्भमय ब्राह्मणे अहं करिष्ये इति वक्तव्यं ।। द्विर्वं त्रिर्वे साक्षात् ब्राह्मणपक्षे वो धनापेक्षे ब्रह्मपुराणे ।।
उपवेश्य जपेद्धीमान् गायत्रीं तदनुज्ञया ।। मंत्रं वक्ष्याम्यहं तस्मात् अमृतं ब्रह्मनिर्म्मितं ।। देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।। नमः स्वधायै स्वाहायै
नित्यमेव भवन्त्वीति ।। आद्यावसाने श्राद्धस्य त्रिरावृत्त्या जपेत् सदा ।। पितुर्निर्वापने चैव जपेदेतत् समाहितः ।। पठ्यमानमिमं श्रुत्वा श्राद्धकाले उप
स्थिते । पितरः क्षिप्रमायान्ति राक्षसाः प्रद्रवन्ति च ।। ब्राह्मणानुपवेश्य तदनुज्ञया श्राद्धार्थमनुज्ञया ततः कुरुष्वेति प्रतिवचने लब्धे श्राद्धांग
त्वेन गायत्रीजपादिकं कुर्य्यादित्यर्थः ।। तथा च ब्रह्मपुराणं ।। श्राद्धं करिष्ये इत्येवं प्रच्छेत् विप्रान् समाहितः ।। कुरुष्वेति स तैरुक्तः कुर्य्यात्
दर्भासनं ततः ।। विप्रान् निमन्त्रितब्राह्मणान् तदसम्भवे ब्राह्मणानानपि कुरुष्वेति प्रत्युत्तरस्य उभयत्रसम्भवात् ।। अत एव पितृदयिता
यां श्राद्धानुज्ञानन्तरं जपउक्तः ।। न च गायत्रीजपार्थमनुज्ञाग्रहणानन्तरं ।। ब्रह्माण्डपुराणोक्तः ।। श्राद्धानुज्ञापदस्य सम्भवेऽन्यपरत्वकल्पना

अनुपपत्तेः॥ अत्रदैवताभ्य इति मंत्रे वेदिभेदेन मैं पितॄणां पाठकल्पनं॥ नमः स्वाहायैः स्वधायैः नित्यमेव नमो नमः इति कल्पनमेव॥
ब्रह्मपुराणे॥ एकथैव लिखितत्वात् ततः नमः स्वधायै स्वाहायै इति भयलिखितं च सर्ववेदिनो बहुसम्मतपाठः॥ अत्र अनुज्ञायाः॥
संकल्पकार्य्यकारित्वेन तत्तन्मासाद्युल्लेखनमाचरन्ति॥ अत्र ब्रह्मपुराणे॥ तत्तन्मासीय कृष्णपक्षस्य सन्निधाय शुक्लपक्षस्याभि
धानेन कृष्णपक्षनिमित्तक पार्वण श्राद्धस्यापि ब्रह्मपुराणीयत्वात् पौर्णमास्यान्त मासोल्लेख स्तत्र यथा॥ पयोमूलफलैः शाकैः कृष्ण
पक्षेषु सर्वदा। पराधीनः प्रवासी च निर्धनो वापि मानवः॥ मनसा भावशुद्धेन श्राद्धं दद्यात् तिलोदकं॥ एवमश्वयुक् कृष्णपक्ष
स्यैकामघात्रयोदशीषु च॥ यत्र तु राश्युल्लेखः श्रूयते तत्र सौरेण एतदुभयसाधकासत्वेतु दर्शनेन वैशाखादिनोल्लेखः॥ श्राद्ध
गोत्राद्युल्लेखमाहतुः पारस्कारप्रचेतसौ॥ गोत्रसम्बन्धनामानि पितॄणां परिकल्पयेत्॥ गोभिलोऽपि॥ गोत्रं स्मरन्तं सर्वत्र गोत्र
स्याक्षय्यकर्म्मणि॥ गोत्रस्तु तर्पणे प्रोक्तः कर्ता एवं न मुह्यति॥ सर्वत्रैव पितुः प्रोक्तः पिता तर्पणकर्म्मणि॥ पितुरक्षय्यकाले तु
अक्षय्यां तृप्तिमिच्छता॥ शर्म्मन्यर्घादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि॥ शर्म्मनोऽक्षय्यकाले तु पितॄणां दत्तमक्षयं॥ शर्म्मलिखनेन॥

गोत्रसम्बन्धुनामानि उत्सेक वाक्यत्तयाशर्म्मान्तं नामप्रतीयते ॥ तथाच विष्णुपुराणं ॥ ततश्चनामकुर्वीत पितैव दशमेऽहनि ॥ देवपूर्वं नराख्यं
हि सर्म्मवर्म्मादिसंयुतं ॥ देवपूर्वं देवात् पूर्वं नराख्यं नरनाम तच्च विशिष्टं शर्म्मयुतं एतच्च विप्रपरं ॥ शर्म्मदेवस्य विप्रस्य वर्म्मत्राता च भूभुजः
भूतिदत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् इति यम वचनात् ॥ अत्र चकाद्देवशर्म्मा णो समुच्चयः ॥ अत्र शर्म्मा वर्म्मा धन समाहृतानापः ॥
शर्म्मान्तं ब्राह्मणस्य स्यात् वर्म्मान्तं क्षत्रियस्य च ॥ धनान्तं चैव वैश्यस्य दासान्तं चान्यजन्मनः ॥ एवं शर्म्मन्नित्यनेन शर्म्मान्तो नाम्नो वि
शेषस्य विशेषणत्वात् पितुरिति विशेषणवत् ॥ गोत्रस्य विशेषणस्यापि सम्बन्धि शब्दत्वं स्मरामि त्यनेन भंगांतरेणाभिहितं
एवं सम्बन्धि शब्दत्वादि युक्तं गोत्रपदं कर्त्तोद्भवयितानमुष्यतीत्यनेन श्राद्धादौ गोत्र पदमेवोच्चार्य्यं ॥ अतु पितृदयिता कल्पतरु श्राद्ध
विवेकोक्तं ॥ गोत्रपर्य्यायकमपि सगोत्रपदं । एवं पितरित्यादि श्रुतेः सम्बन्धि शब्दानां पदिन्यायेन स्वसम्बन्धिपरत्वात् लौकिकोऽपि
तथैवाभिधानात् ॥ पितरित्यादि वक्तव्यं नत्वस्मत् पितरित्यादि ॥ अन्यथा ऽ गोत्र सगो[illegible]दावप्येवं स्यादन्नमित्याद्यभिलापापत्तिः
एवमेव श्रीदत्तः प्रभृतयः ॥ मिश्रोऽपि कृत्यप्रदीप एवमिति ॥ पित्रादीनां नाम्नां षीन्ये वाध्वनाय सूत्रं ॥ नामान्यपि ह्वांश्वेत

तात् पितृ पितामह प्रपितामहेति ॥ अत्र पित्रादीनां नामांशानि गोत्रसम्बन्धानन्तरं देव दत्त पितरित्यादि प्रयोज्य मस्मदित्य
नभिधाय तदित्यनेना विछत्र कार्ट नाम परामर्शात् ॥ अत एव श्राद्धविवेके ॥ नामाज्ञाने ऽमुक पितृ पितामह प्रपितामहेति कृत्वा
दद्यात् इत्युक्तं ॥ एवं च शर्म्मणि अर्घ्यादिके कार्य्ये मित्याद्यवधाय अमुक पितृ देव शर्म्मन्नित्यादिकं प्रयोज्यं नच नाम घटकत्वेन
शर्म्मन्निति पृथक् न वक्तव्यं इति वाच्यं शर्म्मवत् ब्राह्मणस्य स्यात् इत्यादौ नाम्ना न तथा तत्वेनोपपदत्वेन च प्रतीतेः ॥ अत एव सम्बन्धवाचकात्
पित्रादिपदादस्य भेदः ॥ तेनोद्देशकावच्छेदकं विधाय गोत्रेणौ कथा बोध्य इति भावः ॥ पितृत्वं उद्देश्यावच्छेदकं पितृ देव शर्म्मत्वं
विधेयं अतो न भेदः ॥ एवं मातामहादौ मात्रादावप्यूहनीयं ॥ अभिलापप्रकार उक्तो ब्रह्मपुराणे ॥ एतद्वाक्यमनुस्मृत्वा विश्वे
देवांश्च संयजेत् ॥ पितृभ्यश्च ततो दद्यात् अन्नमानं त्रणे नतु ॥ अमुकामुक गोत्रेतात् तुभ्यं मन्नं स्वधा नमः ॥ इति बहुवचनान्तो
पादानेन सम्बोध्या विश्वेदेवा अपि तथा प्रतीयते ॥ तथा विश्वान् देवान् प्रति वृहस्पतिनाच ॥ ततः श्राद्धकर्तु दक्षपादि
संज्ञक ॥ द्वितयस्योक्तत्वात् द्वितय ॥ ततः सार्घ्यक स्थाय उर्द्धस्थ ऽपारस इति वत् ॥ पुरूरवो माद्रवसौ विश्वेदेवा एतद्वोऽन्नं नमः ॥

१२ ।। इति द्विवचनबहुवचनाभ्यां । वाक्यरचना पित्रादयितादौ लिखितागरुड़पुराणे पितामहीवाक्यरचना अत एवेच्छा श्राद्धादौ शन्त [illegible]
12 अक्षादिना मान्युक्ता बृहस्पतिना तदज्ञाने आगच्छन्तु इति बहुवचनान्त मंत्रपाठ उक्तः ।। यथा उत्पत्तिं नामचैतेषां न विद्याद्यदि जातयो ।।
अयमुच्चारणीयस्ते श्लोक श्रद्धा समन्विते ।। आगच्छन्तु महाभागा विश्वेदेवा वरप्रदाः ।। ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते ।।
इति ।। ततश्च नामज्ञानेषु तरां तस्यैवोच्चारणं प्रतीयते ।। इति देवेनमः इत्यनेन स्वागमाह विप्रस्तु ।। नमो विश्वेभ्यो देवेभ्यो इत्यनेन
आदौ प्राङ्मुखयो निवेदयेत् ।। इति । अत्र स्वाग्नमइत्यनेन विश्वेभ्यो देवेभ्यो दद्यात् इत्यन्वयः ।। ततो देवपक्ष कर्म्मानन्तरं पित्रादि
त्रिकं मातामहादि त्रिकं च सम्बुध्यन्तः ।। गोत्रसम्बन्धं नाम्ना एतत्तुभ्यमन्नं स्वधेति सर्वशाखि गोचर पौराणिकेन नामान्तमु
च्चार्य्य तत्र शाखोक्तः प्रकारेण वाक्यरचना ।। अत्र अर्घ्ये (दाप्योदके चैव पिण्डदाने वनेजने ।। तंत्रस्य विनिवृत्तिः स्यात् स्वधा वचन
एव च ।। इति छन्दोग परिशिष्ट वचनात् ।। अस्मति वाधके ना[illegible]चयमेव ।। तंत्रान्याये युक्तिभिः सुकलाच्च ।। अर्घ्यादि न तत्र एतद्धः
पितरो वास इति जपन् पृथक् पृथक् ।। अमुकामुकगोत्रे एतत्ते वासः पङ्क्तितः ।। दद्यात् क्रमेण वासांसि श्वेतवस्त्राभवादशाः ।।

इति ब्रह्मपुराण वचने वासोदान मंत्रयोः पृथक्त्वाभिधानात् । तदितरत्र च ॥ कुशासन गंधाद्यन्नोत्सर्ग दक्षिणादाने तंत्रेणैव वाक्यरचना
प्रतएवतुभ्यमिति पदेन पूर्व प्रकृत प्रक्रान्त याचिना निरपेक्षणमेव पित्रादीनां सम्बोधन पदोपनीतानां तंत्रेणोद्देश्यत्वसम्भवात्
तंत्रेणैव स्वधा पदसम्बः ॥ इति श्राद्धविवेकः ॥ अत्र च प्रकृत याचिना इत्यनेनैव सन्निधानात् ॥ प्रपितामह मात्रस्य तुभ्यमित्यनेन
नोपस्थितिः ॥ किन्तु सर्वनैमत्यात् पित्रादित्रयाणां निरपेक्षाणां इत्यनेन साहित्यासत्वेन बहुवचनेन अनुल्लेखात् तुभ्यमित्येक
वचनेनैव उल्लेख इति ॥ एवं च स्वग्रन्थोक्तः एतत्ते इत्यादि तद्रूपस्य तुभ्यमिति पदं स्थानीयत्वेन तथायमिति ॥ एषन्ते पिण्ड
इत्यर्थेन तत्रं मंत्रेण एतस्मै ते इत्ति पदस्य गोभिलेन पुनरुपादानात् ॥ शामगेन श्राद्धवाक्ये उभयं प्रयुज्यते तत्र प्रथमं ते इति
तव इत्यर्थः ॥ एवं च श्राद्धानुष्ठानानन्तरं गायत्रीजप उक्तः ॥ तं विशेषयते योगीयाज्ञवल्क्यः ॥ ओंकारं पूर्वमुच्चार्य भूर्भुवः स्वः
ततः परं ॥ गायत्री प्रणवश्चान्ते जपो ह्येवमुदाहृतं ॥ तदनन्तरं देवताभ्यः इति त्रिः पठेत् ॥ इति ततः पुण्डरीकाक्षं स्मरेत्
शंखचक्रधरं विष्णुं द्विभुजं पीतवाससं ॥ प्रारम्भे कर्म्मणां विप्रः पुण्डरीकं स्मरेत् हरिं ॥ इति वाक्यात् पुण्डरीकं पुण्डरीकाक्षं

तत्स्मरणफलं गारुडे ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ अथ श्राद्धीयद्रव्य
प्रोक्षणमाह वायुपुराणे ॥ नाप्रोक्षितं स्पृशेत् किंचित् पैत्रे दैवेऽथवा पुनः ॥ स्पृशेत् दद्यात् ॥ उपघातशंकायां मन्त्रप्रोक्षणं
१३ तत्रैव स्यात्स्वयं हरन्ति श्राद्धानि दर्शनादेव सर्वशः ॥ श्वविड्सूकरसंस्पृष्टं दीर्घरोमीभिरेव च ॥ पतितैर्मलिनैः श्वैव न प्रष्टव्यं
13 कदाचन ॥ अन्नं पाश्च पुरेतेयत् तन्नस्याद्धव्यकव्ययोः ॥ उत्तश्चष्यं प्रदानार्थं संस्कारस्वपदिश्यते ॥ हविषा संस्कृतानां तु
पूर्वमेव हि मार्जनं ॥ मन्त्रपूताभिरद्भिश्च प्रोक्षणं तु विधीयते ॥ प्रदानार्थं श्राद्धार्थं उत्तश्चष्यं तन्न योज्यमिति कल्प
तरुः ॥ देवलः चाण्डालेन शुनावापि दृष्टं हविर्जहित्तियं ॥ तिलशादिभिरुच्छिष्टं दुष्टमन्नं विसर्जयेत् ॥ अन्यच्च हिरण्योदक
स्पर्शादिति तदनन्तरं रक्षार्थमुदकपात्रं कदेशे स्थापयेत् ॥ इति पितृदयिता ॥ तथा च वृद्धपमः ॥ रक्षणाय तु यद्दत्तमुदकं
श्राद्धकर्म्मणि ॥ तावद् श्नन्ति पितरो यावत्तिष्ठति सोदकं ॥ सोदकं पात्रमिति शेषः ॥ दत्तं स्थितं मित्यर्थः ॥ श्राद्धकर्म्मणि
श्राद्धकर्तव्ये ॥ अथ पिण्डपितृयज्ञातिदेशः गोभिलः ॥ पिण्डपितृयज्ञवदुपचारः पित्र्ये इति ॥ पित्रादिषट्पुरुषिककल्पे

पिण्डपितृयज्ञवत् इत्युक्तः पिण्डपितृयज्ञरीत्या प्राचीनावीतिना दक्षिणामुखेन पातितवामजानुः सतिलं द्विगुणभुग्नकुशत्रयव
येचात्रत्वामनु यांश्च त्वमनु तस्मै ते स्वधेति मंत्रोच्चारणरूपया उपचरणं ॥ कार्यमिति शेषः ॥ अत्र अक्षय्योदकानन्तरं अर्घ्यदानं विधी
यते ॥ षष्ठ्यैव नित्यं तत् कुर्यात् न चतुर्थ्यां कदाचन ॥ इति छन्दोगोपरिशिष्टवचनात् ॥ गोत्रसम्बन्धनाम्ना षष्ठ्यन्तानां प्रतीतौ
न चतुर्थ्यां कदाचन इत्यनेन तत्र चतुर्थीनिषेधानुपपत्त्या पिण्डपितृयज्ञवत् इत्यतिदेशः प्राप्तः ॥ ये चात्र त्वा इति मंत्रस्य
तस्मै ते इत्यस्य निषेधोऽनुपपत्त्या तद्युक्तमंत्रनिषेधोऽपि संगच्छते ॥ एकोद्दिष्टस्य पिण्डे तु अनुशब्दो न युज्यते
इत्याश्वलायनगृह्यपरिशिष्टोक्तानुशब्दनिषेधादनुयुक्तः मंत्रनिषेधवत् ॥ एतेन कुशासनानोत्सर्गयोर्येचात्रत्वा
इति अभिलिखनं मैथिलानां हेयं ॥ अथ कुशासनं ॥ तत्र गोभिलः ॥ पित्र्ये द्विगुणांस्तु दर्भान् पवित्रपाणिः कुर्यादासीनः
सर्वत्र प्रश्नेषु पंक्तिमूर्द्धन्यं पृच्छति सर्वान्वा आसनेषु दर्भान् आस्तीर्येति ॥ पित्र्येऽपि अर्घ्यदाने ॥ अत्रादौ जलगण्डूषप्रक्षेपः
ततो द्विगुणभुग्नं कुशत्रयं पितृणामासनार्थं दद्यात् ॥ एवं च विश्वेदेवपक्षे कृत्वा पितृपक्षे कर्त्तव्यं ॥ तथा च याज्ञवल्क्यः ॥

१४ पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि ॥ आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा ॥ द्विगुणांस्तु कुशान् दत्वा उशन्तस्त्वेच पितृणः
१५ पूर्वं व्याख्यातं तेन तूष्णीं ब्राह्मणपाणौ जलं दत्वा विष्टरार्थमासनार्थमिति दीपकलिका ॥ व्यक्तमेतदाश्वलायनः ॥ आपः प्रदाय
दर्भान् द्विगुणान् भुग्नासनं प्रदायेति ॥ आसनमित्यनेन उपवेशनीयत्वं प्रतीते हस्तेन जलं प्रतीयते ॥ तथाच काण्वाजिन ॥
दर्भांश्चैवासनं दद्यात् न तु पाणौ कदाचन ॥ पितृदेवमनुष्याणां एवं तृप्तिर्हि शाश्वती ॥ अत्र पितृदेवमनुष्योपादानात्
पार्वणादिश्राद्धे विश्वेषां देवानां नित्यश्राद्धे सनकादिमनुष्याणामपि कुशासनदानं प्रतीयते ॥ तत्र दैविकत्वेन कुशा
नामृजुत्वम् इति विशेषः ॥ देवपितृविप्रयोर्दक्षिणवामयोः कुशासनमाह गोभिलः भाष्ये ॥ पितॄणामासनं दद्यात्
वामपार्श्वे कुशान् सुधीः ॥ दक्षिणे चैव देवानां सर्वदा श्राद्धकर्मसु ॥ पवित्रपाणिः पवित्रदक्षिणकरः ॥ तथाच
छन्दोगपरिशिष्टं ॥ सव्यः सोपग्रहो कार्यो दक्षिणः सपवित्रकः ॥ इति सव्यो वामकरः ॥ उपग्रहः वकुलं कुशः ॥
आसीन उपविष्टः ॥ सर्वत्र इति अनेन दैवकार्ये पैत्र्ये च पवित्रपाणित्वं आसीनत्वं च लभ्यते ॥ प्रश्नेषु श्राद्धं करिष्ये

पितॄणां आवाहयिष्ये इत्यादि प्रश्नेषु ब्राह्मणो पविष्ट दर्भयुक्तासनेषु दर्भानास्तीर्य्य विश्वेदेवार्थ्यर्थात् स्वष्ट दर्भानास्तीर्य्य वक्ष्यमाण
मावाहनं कुर्य्यादित्यर्थः ॥ यदनिरुद्ध भट्टेन पादयोरधः कुशदानमुक्तं तत्र प्रमाणं न विद्मः ॥ पंक्तिमूर्द्धन्यं पितृब्राह्मणं पृच्छेदिति ॥
अथ आवाहने तत्र गोभिलः ॥ यवदानाय ॐकारं कृत्वा विश्वान्देवानावाहयिष्ये ॥ इति पृच्छेत् ॥ ॐ आवाहय इत्युक्तो नः ॥ ॐ विश्वेदेवा
स आगत शृणुताम इमं हवं इदं बर्हिर्निषीदत ॥ इति आवाह्य विकिरेत् ॥ ॐ विश्वेदेवाः शृणुतेमं हवं ये मे अन्तरिक्षे य उप द्यवि ष्ठ ये
अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वं ॥ ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं
राजन् पारयामसीति ॥ अत्र समवदन्तेति ॥ वकार युक्त पाठः ॥ वदस्थैर्य्ये इत्यस्मात् तो रिति ॥ गुणविष्णु लिखनात् यत्नमपरं ॥ अत्रावाहना
नन्तरं यवविकरणो कल्पप्रदीपे यवोसीति मन्त्र लिखनं प्रमाणसूत्रं ॥ पितृदयिता श्राद्ध कल्पतर्वादिषु तु यातीमि सभिधानात् ॥ अत्र
देवावाहने गन्धाद्यधिकं विप्रांगुष्ठ ग्रहणं आह ब्रह्मपुराणं ॥ देवानावाहयिष्येऽहं प्राकृणावाहयस्वच ॥ विप्रांगुष्ठं गृहीत्वातु
विश्वान्देवान् समाह्वयेत् ॥ आवाहयेत्येति सांख्यानरीयं ॥ गोभिल कात्यायनाभ्यां आवाहये सभिधानात् ॥ गोभिलः तिलानादाय

ओंकारं कृत्वा पितॄन् आवाहयिष्ये इति पृच्छति आवाहय इत्यनुज्ञां प्रयच्छेत् ॥ ओं एतत् पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्वि
णेभिर्दत्वास्मभ्यं द्रविणेऽह भद्रं रयिं च नः सर्ववीरं नियच्छत ॥ ओं उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि उशन्नुशत
आवह पितॄन् हविषे अत्तवे इत्यृचा वाह्य ॥ ओं आयन्तु नः पितरः सौम्यासो अग्निष्वात्ता देवयानैः पथिभिः ॥ अस्मिन् यज्ञे
मह्यन्तिकेऽधिब्रुवन्तु ते अवन्त्वस्मान् ॥ इति जपित्वा अपहता इति तिलान् विकिरेत् ॥ इति पूर्वेणेभिरिति पूर्वैः कृतमिनयौ
चेति इनप्रत्यय इति उणादिविष्णुव्याख्यानात् ॥ इनस्य तद्धितत्वं तेन पूर्वशब्दस्याकारलोपात् तत् पदं सिद्धं ॥ एत पितर इत्य
नन्तर उशन्तस्त्वेति ॥ अत्र मूलभूत गोभिल ग्रन्थे तद्भाष्यद्वयोः पितृदयितायां च लिखितेन मैथिलानामेतद्विपरीतं लि
खनं हेयं ॥ अथार्घ्यः ॥ तत्र गोभिलः ॥ अप उपस्पृश्य यज्ञीयवृक्षचमसेषु पवित्रान्तर्हितेषु एकैकस्मिन्नप आसिंचति
शन्नो देवीरिति ॥ अप उपस्पृश्य जलं स्पृष्ट्वा अत्र पितृमन्त्रोच्चारणं ॥ तथा च छन्दोगपरिशिष्टकात्यायनः ॥ पितृमन्त्रानुद्रवणे
आत्मालम्भे अवेक्षणे ॥ अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥ मार्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे ॥ निमित्तेष्वेषु

सर्वेषु कर्म्मकुर्व्वन्नपः स्पृशेत् ॥ पित्र्यमंत्रानुद्रवणे पित्र्यमंत्रोच्चारणे यज्ञादौ विहिते आत्मालम्भे हृदयस्पर्शे ॥ प्रवेक्षणे तस्यैव अधोवायुः
समुत्सर्गे नोद्गारे प्रहासे महती हास्येन स्मिते आक्रोशे परुषभाषणे क्रोधसम्भवे क्रोधे तत्पत्नी भाषणं विनापि मनसा एषु
निमित्तेषु सर्वत्र कर्म्मकरणकाले जलं स्पृशेत् ॥ यमस्मात्तु तच्छाखाश्व सादीर्घाः प्रादेशाश्चतुरंगुला ॥ तथैव ते स्पृधन्तो ज्ञेया
चतुरस्रास्तु इत्यपि ॥ तच्छाखा यज्ञीयवृक्षशाखाः चतुरंगुला श्चतुरंगुल विस्ताराः तथैव चतुरंगुल परिमाणेन उत्सेधनतः ॥ ऊर्द्धतः
अर्घ्यपात्रे स्थापनं कुशो परि साहवैजपाग्रस्थं ॥ प्राचीनावीति पात्राणयपः पूर्णानि सदर्भानि स्थितानि दक्षिणाग्रेषु कुशेषु
निधाय ॥ इति ५ पवित्राण्यर्हिणेषु मध्यार्पित पवित्रेषु एकैकस्मिन्निति वीप्सादेव पात्रे पिजलादि प्रक्षेपार्था ॥ तथा
याज्ञवल्क्यः ॥ यवैरन्वकीर्य्याथ भाजने सपवित्रके ॥ शन्नो देव्या पयः क्षिप्त्वा यवोसीति यवांस्तथा ॥ यादिव्याइति मंत्रेण
हस्ते त्वर्घ्यं विनिःक्षिपेत् ॥ गोभिलः ॥ एकैकस्मिन्निति तिलानावपति ॥ ओं तिलोसि सोमदेवत्यो गोसवो देवनिर्म्मितः
प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहेति सौवर्णराजतौदुम्बरः खड्गमणिमयानां पात्राणामन्यतमेषु

१८ वापानि विघ्यन्ते एकैकस्मिन् एकैकेन ददाति सपवित्रेषु हस्तेषु यदिवा आपः पयसा संबभूवुः या अन्तरीक्ष्या उत पार्थिवीर्या
16 हिरण्यवर्णा यज्ञीयास्तान् आपः शिवाः शंस्योनाः सहवा भवन्तु ।। इति पठित्वा ।। असावेतत्तेऽर्घ्यमिति ।। अत्र एकैक
स्मिन्निति पूर्वसूत्रप्रकृतत्वादेव प्रत्येक पात्रलाभः ।। पुनर्यदि एकैकस्मिन् इत्यभिधानं तन्मंत्रस्थं पितृनिति बहुवचन
दर्शनादावाहनादि मंत्रपाठ यत्र सकृत् मंत्रपाठे निषेधार्थ इत्युक्त्वा प्रत्येकमेव तिल प्रक्षेप मंत्रपाठः ।। बहुवचनन्तु
एतत्ते पितरो वासः इतिवत् प्रयोग साधुत्वेन उपपन्नं ।। यव तिल प्रक्षेपनानन्तरं गंधपुष्पप्रक्षेपमाह ब्रह्मपुराणं
अर्घ्याः पुष्पैश्च गन्धैश्च ताः प्रपूज्याः स्वशास्त्रतः ।। अर्घ्या आपः इति शेषः ।। स्वशास्त्रतः आदाय गंधपुष्प प्रतिपाद
कात् शाख्यायनेऽपि ।। गन्धपुष्पैरलंकृत्य यादिव्येति पठन् सृजेत् ।। सृजेत् उत्क्षिपेत् ।। ततो दैव ब्राह्मणहस्ते प्रागग्र
मर्घ्यपात्रीय पवित्रं जलान्तरञ्च प्रक्षिप्य पितृब्राह्मण हस्ते दक्षिणाग्रमर्घ्यपात्रीय पवित्रं जलान्तरञ्च प्रक्षिप्य
वामहस्ते अर्घ्यपात्रं कृत्वा यादिव्येति पठित्वा वाक्येन विप्रकरस्थ पवित्रसहित अर्घ्यजलम् उत्सृज्य दद्यात् ।।

तथाच ब्रह्मपुराणे ॥ ततो वामेन हस्तेन गृहीत्वाचमनं ततः क्रमात् ॥ पितृतीर्थेन तत्तोयं दक्षिणेन च पाणिना ॥ दत्वा दर्भोदके हस्ते विप्रे
भ्यश्च पृथक् पृथक् ॥ जलप्रदीपनानन्तरं यादिव्येति पठेत् पूर्वं पुष्पान्तरेण शिरः प्रभृति गात्र पूजनमाह समुद्रकरधृतगौतमः
शिरसः पादतलश्चैव सम्यगभ्यर्चयेत्ततः ॥ पूर्ववत् पृथगेकैकं मेकैकेनार्घ्ययेत् क्रमात् ॥ औदुम्बरं ताम्रपात्रं रवड्गं पण्डक
शिरोस्थि निर्मितपात्रं मणिमयानि स्फाटिकादीनि यानि वा इति अप्रानि सिद्धानि ॥ कदलीपत्रकालागादीनि ॥ अत्रत्वम
सादीनां चैकत्विलादन्यत्रमे च्छिति शब्दश्चैकजातीयेनैव सर्वान्यर्घ्यपात्राण्यसाविति सम्बोधनान्तेनामोपलक्षणां
असाविति नामरूढानीति ॥ कात्यायनदर्शनात् ॥ यद्यप्यसाविस्य सम्बुद्धि प्रथमान्तो ऽपि सम्भवति तथापि नेट्ठति ॥
युस्मत् पदप्रयोगात् सम्बुद्धि अन्तता प्रतीयते ॥ अत एव छन्दोग परिशिष्टं ॥ गोत्रनाम्नैश्च आमन्त्र्य पितॄणा
अर्घ्यं प्रदापयेत् ॥ प्रयोगविधायकः गोभिलःसूत्रे ॥ एतत्ते अर्घ्यं इत्यभिधानात् ॥ सामगेतर ऋग्यजुर्वेदिनोसम्बंधे
प्रयोगः ॥ स्वधे ऽपि ॥ अर्घ्य मर्घ्य मर्घ्यमित्यभिधानाच्च ॥ सामगानां सर्वत्राभिलापेनपुंसकलिंगेनैव प्रयोगः

१७ अभिलापे तत्र एषोऽर्घ्य इति गोभिलेन नपुंसके निर्दिष्टः ॥ अन्येषां सर्वत्र पुंलिङ्गेन प्रयोगः ॥ तत्रापि पाद्यार्घ्याभ्यां यदिति पाणिनि
17 पद्धिध्यानं सामगप्रयोग एव अन्यत्र तु निर्यकार एव अर्घ्यशब्दः ॥ प्रागुक्तवैजवापगृह्यवचने अर्घ्यपात्रस्थापनीय
कुशानां दक्षिणाग्रत्वदर्शनात् ॥ तत्पात्रोपरि पवित्रस्थापनेऽपि तत् दृष्ट्या तथैव व्यवहारात् आसनीयकुशास्तरणीयकुशेषु तथा
दर्शनाच्च ॥ ब्राह्मणहस्ते पवित्रदानेऽपि तथा प्रतीयते ॥ अत एव गोभिलीय श्राद्धकल्पभाष्यकृन्महायशसा उल्कपद्धतौ च ॥ पवित्राणां
दक्षिणाग्रत्वं लिखितमिति न वर्द्धमान पशुपत्यपि पानवराय मकुट पद्धतिष्वपि ॥ तथा लिखितं अत एव वशिष्ठोक्तो विधिः कृतास्मद्
ष्टयोऽत्र निराभिषः इति छन्दोग परिशिष्टेन वृद्धिश्राद्धे पार्वणधर्मातिदेशात् आर्घ्ये ज्येष्ठोत्तर करान् युग्मान् कराग्राग्र
पवित्रकान् कृत्वा अर्घ्यं सम्प्रदातव्यं ॥ नैकैकस्यात्र दीयते ॥ इत्यनेन पवित्राणामुत्तराग्रत्वं विधीयते ॥ प्रत्येक हस्तेऽर्घ्यदानं
निषिध्यति ॥ अत एव पार्वणे दक्षिणाग्रत्व मेकैक हस्तदानत्वं प्रतीयते ॥ गोभिलः ॥ प्रथमे पात्रे संस्रवान् समवनीय
पात्रं न्युब्जं कुर्यात् ॥ पितृभ्यः स्थानमसीति ॥ प्रथमे पात्रे पितृपात्रे संस्रवान् पितामहादिपात्रार्घ्यपात्रस्य शेषजलानि समवनीय

पश्चप्रोक्षणादिवत् क्रमेणास्यापपिधा तत् पात्रस्य प्रपितामह पात्रेण आच्छादनमाह शौनकः ॥ प्रपितामह पात्रेण पिधाय प्रतिष्ठाप
यतीति ॥ याज्ञवल्केनापि पितृपात्रस्यापिहित पात्रं अधः स्थत्वाभिधानात् पात्रान्तरेणापि पिधानमक्षिप्तं ॥ तथा च याज्ञवल्कः
दत्वार्घ्यं संश्रवांस्तेषां पात्रे कृत्वा विधानतः ॥ पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः ॥ विधानतः ॥ यथापूर्वं स्थापितं
तत् क्रमेण तेन प्रपितामह पात्रेणाधः कृतं पितृ पात्रमूर्ध्वमुखावस्थितं न्युब्जं करोति ॥ न तु केवलं पितृ पात्रं न्युब्जं कुर्यात्
तदेव पात्रं पात्रान्तरेण अधः करोति ॥ पितृकं प्रथमं पात्रं ततः पैतामहं न्यसेत् ॥ प्रपितामहं ततो न्यस्य नोद्धरेन्न च चालयेत् ॥ इति यम वचनात् ॥ मैथिल्यौ कंपुक्तं ॥ याज्ञवल्क वचने ॥ करोतीत्यनुषंग पात्तु वीक्य भेदापत्तेश्च ॥ शौनकोक्ताभि
धानानन्तरं न्युब्जीकरणानुई पपत्तेश्च ॥ यम वचनेन ॥ पितृ पात्रस्य याज्ञवल्कीयाधः स्थत्वाय शौनकीय प्रपितामह पात्र पिधान
वैकल्पिकत्वं ॥ पितामह प्रपितामह पात्र द्वय पिधानमुक्तो वचनान्तरात् ॥ न्युब्जी कृतस्य तत् पात्रस्य उद्धरणादीनि षेधउक्तः
तन्न्यासश्च ॥ पितृ पात्रे निधायाथ न्युब्जमुत्तरतो न्यसेत् ॥ इति मत्स्यपुराणवचने न्यसेदित्याख्यातो पर्नस्थापित कर्तुर्वामपार्श्वे कर्तव्यः

तस्मात् यस्य दक्षिणातो लक्ष्म भवति तं पुण्यलक्ष्मीकमित्याचक्षते ॥ उत्तरतः स्त्रिया इति उत्तरायणं हि स्त्रीति शतपथश्रुतेः ॥ उत्तरे चास्य सौवर्णं
१२ लक्ष्म पार्श्वे भविष्यति । इति महाभारतवचनाच्च ॥ उत्तरपदस्यापि वामवचनता सिद्धा ॥ पित्र्यकर्मणि प्राच्यादिदिशः दिक् उत्तरादिक
18 वाच्या ॥ तथाचरायमकुटधृतं ॥ पित्र्यमिष्टमुपक्रम्य ब्राह्मणादौ दक्षिणां सा प्रतीचि या पूर्वोत्तरा साउत्तरेति ॥ एवञ्च भोक्तृब्राह्मणानामपि
सोत्तरादिगेवेति कल्प्यं तरु[illegible]त्यासे हैकवाक्यतापि सिद्धेति ॥ एवं कर्तुर्दक्षिणाभिमुखस्य वामपार्श्वीयस्थानं यत् तत् देवपितृकर्मणि
उत्तरदिक्स्थानं भवतीति श्राद्धविवेकेनाप्युक्तं ॥ ततश्च ॥ कल्पतरु श्राद्धविवेकाभ्यां च एकस्थानं भंग्या द्वितीयेनाभिहितं ॥
स च न्यासो दर्भस्तम्भोपरीत्यनिरुद्धभट्टः ॥ अत्र गोभिलसूत्रे पितृपात्रइत्यभिधा[illegible]नात् ॥ संश्रवान् इति बहुवचनात् ॥ मंत्रे
पितृभ्य इति पितृत्वेन श्रवणात् तत्र तिष्ठन्ति पितरः शौनकोऽब्रवीत् ॥ इति आश्वलायनगृह्यपरिशिष्टवचने पितृत्वेन च यदुपस्थिते
रावाहनवत् सपुरुषान् उद्दिश्य सकृदेवन्यङ्गीकरणं ॥ ननु मातामहानां पृथक्करणमिति ॥ अथ गन्धादिदानं ॥ तत्र गोभिलः
गन्धपुष्पधूपदीपाच्छादनानां सम्प्रदानमिति ॥ अत्र गन्धादिपंचानां द्वन्द्वनिर्देशात् [illegible] यात्र । मिलितानां तंत्रेणैवोत्सर्गः ॥

निवेदनं प्रत्येकशः ॥ तथा च शाट्यायनः ॥ एष ते गन्धः ॥ एतत्ते पुष्पं ॥ एष ते धूपः ॥ एष ते दीपः ॥ एतत्ते आच्छादनम् इति ॥ यथा बहुषु पवेषु
सम्पन्नो यव इति यास्सपेक्षयैकवचनं ॥ तद्वत् गन्धादीनां प्रत्येकबहुत्वेप्येकवचनान्तेन निर्देशः ॥ एतद्वः पुष्पमित्युक्त्वा पुष्पाणि च निवेदयेत्
इति ॥ अमुकामुकगोत्रे एतत् तुभ्यमन्नं स्वधा नमः इति च ॥ ब्रह्मपुराणादिष्वेक[illegible]जातीयानेकद्रव्येष्वेकवचनान्तपदप्रयोगात् ॥
अत एव नवमाध्यायेऽपि ॥ सूर्यस्य चक्षुर्गमयतात् ॥ इति मन्त्रे सूर्यस्य चक्षुर्बहुत्वेऽपि एकवचनान्तपदनिर्देशात् ॥ संसर्गिद्रव्याणाममल
तोयतेजसां प्रयोगे एकवचनान्तप्रयोग इति विवेचितं ॥ अत एव आभ्युदयिके पात्रद्वयेऽन्नोत्सर्गवाक्ये एतत्तेऽन्नमिति सर्वैः पठ्यति
शिष्टैर्लिखितं ॥ एवञ्च शाट्यायनोक्तः ॥ निवेदनवाक्ये नेइसेक ब्राह्मणपक्षे ब्रह्मपुराणोक्तः निवेदने वह्व ति वहु ब्राह्मणपक्षे
एकस्मिन्नपि गुरुत्वविवक्षया वा वः इति अविरोधः ॥ अन्नगन्धः ॥ विष्णुः ॥ चन्दनकुङ्कुमकर्पूरागुरुपद्मकाष्ठपुष्पाणि अनुलेपनार्थे देया
नीति शेषः ॥ अथ पुष्पं ॥ ब्रह्मपुराणे ॥ आढ्या जात्यः प्रशस्ताः स्युर्मल्लिकाः कुन्दयूथिकाः ॥ जलोद्भवानि सर्वाणि कुसुमानि च चम्पकः
इति श्रीदत्तः ॥ तथा शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च ॥ गन्धरूपोपपन्नानि यान्यन्यानि च कृत्स्नशः ॥ निषेधमाह ॥

१९ जवादिकुशुमं भिण्टिं रूपिका कुरण्टिका ।। पुष्पाणि वर्ज्जनीयानि श्राद्धकर्म्मणि नित्यशः ।। जवादिशब्दादेवं विधं रक्तपुष्पं रूपिका
१७ कार्कपुष्पं कुरण्टकः पीत भिण्टी ।। उग्रगन्धान्यगन्धानि दुष्टानि च विवर्जयेत् ।। करवीरवकेरक्तेऽ निषिद्धं दद्यात् इति । उपक्रम्य
केतकीकरवीरञ्च वकञ्च चम्पकं तथा ।। जातिदर्शनमात्रेण निराशाः पितरो गताः ।। जातीति रक्तजाति विषयं ।। उग्रगन्धानि अग-
न्धानि चैव वक्षः पूजित रक्तश्च चैत्यवृक्षोद्भवानि च ।। पुष्पानि वर्ज्जनीयानि रक्तपुष्पाणि यानि च ।। जलजानि रक्तान्यपि दद्यात् ।। जलोद्भ-
वानि देयानि रक्तान्यपि विशेषतः ।। इति शंखवचनात् ।। अथ धूपाः श्राद्धे ।। चन्दनागुरुणी चोभे तथैवोशीरपद्मकं ।। तुरुष्कं गुग्गु-
लं चैव घृताक्तं युगपद्धरेत् ।। उशीरं वीरनमूलं तुरुष्कं शिल्हकं ।। अथ दीपाः ।। शंखः ।। घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः ।।
धूपार्थं गुग्गुलं चैव दद्यात् घृतयुक्तं मधुयुक्तं च ।। अथ आच्छादनं ।। वायुपुराणे ।। आच्छादनन्तु यो दद्यात् अहतं श्राद्धकर्म्मणि
आयुः प्राकाम्यमैश्वर्य्यं रूपं च लभते शुभं ।। ब्रह्मपुराणे ।। अनंगलग्नं यद्वस्त्रं वितरेत् नरः शुभं ।। वस्त्राभावे क्रिया नास्ति यज्ञवेदा-
स्तपांसि च ।। तस्मात् वस्त्राणि देयानि श्राद्धकाले विशेषतः ।। अतो वस्त्रदानमवश्यकं यद्विना क्रियाभाव श्रुतेः ।। अथ यज्ञोपवीतादि ।।

अाह तमाह कात्यायन मूले ॥ ईषद्धौतं नवं शुक्लं सदशः यन्नधारितं ॥ आहतं तद्धि जानीयाद्दैवे पित्र्ये च कर्म्मणि ॥ ईषत् सूक्ष्मं ॥
ततः यज्ञोपवीतादि ॥ वायुपुराणे ॥ यज्ञोपवीतं यो दद्यात् श्राद्धकाले तु धर्म्मवित् ॥ पावनं सर्वविप्राणां ब्रह्मदानस्य यत् फलं ॥
अत्र तस्य काम्यत्वं ब्रह्मपुराणे ॥ श्वेतचन्दनकर्पूरं कुंकुमानि शुभानि च ॥ विलेपनार्थं दद्यात्तु यच्चान्यत् पितृवल्लभं ॥ पितृवल्लभं
रजतादि जीवस्य यदभिलषितं आसीत् ॥ श्राद्धप्रतिनिद्धं ॥ तदपि देयमिति वायुपुराणे ॥ लोके श्रेष्ठतमं सर्वं आत्मनश्चापि यत्
प्रियं ॥ सर्वं पितृणां दातव्यं तदेवाक्षय मिच्छता ॥ एतत्सर्वं काम्यं ॥ गन्धाद्यभावे प्रतिनिधिमाह ॥ पैठीनसिः काण्डमूलः ॥
पत्रपुष्पफलं प्ररोह रम्य सगन्धादीनां शादृश्येन प्रतिनिधिः कुर्यात् ॥ सर्वालाभे यवः प्रतिनिधिर्भवतीति ॥ काण्डं नालं प्ररोहः अंकुरः
सर्वालाभे यव इति कल्पतरुः ॥ अभावे यव इति नारायणोपाध्यायः ॥ तथा च वस्त्राद्यभावे खण्डवस्त्रं देयं ॥ अथ पत्रदानस्थानं
ततो मण्डलं कृत्वा ताम्रादि पात्रं पातयेत् ॥ तत्रमन्त्रः ॥ भस्मना वारिणा वापि कारयेत् मण्डलं ततः ॥ मण्डलं चतुष्कोणं ॥
अत्र दैवे अथ ऐशानिमारभ्य दैवत्वाद्दक्षिणावर्तनेन प्रागग्रान्तरेखया यावदिक्षारमारभ्य ॥ वायवीमारभ्य च उदगग्रान्तरेखया वा मण्डलं
कुर्यात्

२० प्रागुदग्रं त्रेति कात्यायनदर्शनात् ॥ पित्र्ये तु नैर्ऋते आरभ्य पित्र्यं यावद्भामावर्त्तनेनेति ॥ दक्षिणाग्रान्तरे रेखया मण्डलं विपर्य्यस्य पित्र्ये दक्षि
२० णाग्रं चेति कात्यायनसूत्रात् ॥ नश्यवर्द्धमानोऽप्येवं ॥ मंडलाकरणे दोषमाह ॥ अमन्त्रं तु मंडले हीनं राक्षसैर्भुज्यते बलात् ॥ अप्य
पात्राणि ॥ तत्र हारीतः ॥ काञ्चनेन तु पात्रेण राजतोदुम्बरेण वा ॥ दत्तमक्षयतां याति खड्गेनार्घ्यकृते न च ॥ औदुम्बरेण ताम्रेण
खड्गेन गण्डकशिरोऽस्थिनिर्मितेन च ॥ आर्घ्यकृतं सौवर्णिककृतं अन्यदपि ॥ कदलीवृक्षसंगादीन्यपि ॥ तथा च ॥ मनुवचने ॥
कदली सर्वतो मेध्या वर्जयित्वा तु मंजरीं ॥ इति शास्त्रमभिमतमिति कल्पतरुः ॥ ब्रह्मपुराणे ॥ सौवर्णं रौप्यताम्रस्य स्फाटिकं च
शंखशुक्तयः ॥ भिन्नान्यपि च पात्राणि योज्यान्यपि कर्म्मणि ॥ कल्पतरौ ॥ राजतं रजतात्मकं स्वापितॄणां पात्रमुच्यते ॥ रजत
स्य कथादानं दर्शनं नाम शस्यते ॥ दैवे तल्लिपिषिध्वं ॥ अध्यार्घ्य पिण्डतोन्येषु पितॄणां राजतं स्मृतं ॥ अमंगल्यं तु रजतं
दैवकार्येषु वर्जयेत् ॥ इति वायुपुराणात् ॥ याज्ञवल्क्यः ॥ कृत्वा शेषं प्रदद्यात्तु भोजनेषु समाहितः ॥ यथालाभोपपन्नेषु
रौप्यएक विशेषतः ॥ तथा च सतातपः ॥ पात्रे तु मृन्मये यस्तु श्राद्धे भोजयते पितॄन् ॥ तत्र दाता परो धाश्र भोक्ता च नरकं व्रजेत् ॥

श्राद्धीयपात्रनिषेधेऽपैच्चीनसिः ॥ सीसकायसपाषाणपात्राणि हीनपात्राणि अग्नपात्राणि चेति न कार्याणि इति विशेषः ॥ ब्रह्मपुराणे
पाषाणस्य विहितत्वात् अत्र निषिद्धसाहित्यहितं निषिद्धमिति ॥ ततश्च पात्रान्तराभावे पाषाणपात्रस्य तदुपदेयता ॥ इति ॥
हारीतः ॥ हीनपात्रमनुतत्प्रोक्तं न्यूनमष्टांगुलात्तु यत् ॥ तत्र हीनपात्रे प्रतिप्रसवमाह ब्रह्मपुराणं ॥ रौप्यपात्रेण पाद्यादि तस्मात्
सूक्ष्मेण कारयेत् ॥ तस्मात् अष्टांगुलात् ॥ अथ अग्नौ करणं गोभिलः ॥ उद्धृत्य घृताक्तमन्नं पृच्छति अग्नौ करिष्यामि
कुरुष्वेत्यनुज्ञातः पितृपिण्डयज्ञवद्धुत्वे ॥ उद्धृत्य श्राद्धोपकरणात् घृताक्तमन्नमुद्धृत्य घृताक्तमित्यभिधानात् व्यञ्जनादि
वर्जितमिति प्रतीयते ॥ तथाच विष्णुपुराणं ॥ गृह्णीयात् व्यञ्जनाक्षारं वर्जमन्नं तथानले ॥ अत्राग्नौ गोभिलः ॥ करिष्यामि
इति निर्देशात् गोभिलगृह्ये चाग्नौ करिष्यामि इति ग्राममन्त्रणं ॥ होष्यत इति सूत्रे च करिष्यामि इति श्रुतेः ॥ ॐ अग्नौ
करिष्यामि इति छन्दोगानां प्रश्नवाक्यं ॥ अत्र कुरुष्वेति । होष्यतो हवनं करिष्यतः पुरुषस्य अन्ये यानु अग्नौ करिष्ये इति
तान् प्रयतो प्रार्थये द्विजान् ॥ ॐ कुरुष्वेति तैरुक्तो दक्षिणाग्नौ समाह्वयेत् इति ॥ ब्रह्मपुराणवचनात् ॥ अग्नौ करिष्ये इति ॥

२१ प्रश्नवाक्यं ॥ अत्रकरिष्ये इति श्रुतेर्वैदिक प्रश्नोत्तरयोः ॐकारादित्वं प्रतीयते ॥ एवञ्च मुन्यन्तरवाक्ये ॐकाराभावेऽपि ॐकारादित्वं
२१ कल्प्यते ॥ ॐ अग्नौ करिष्ये इति मंत्रेण पृच्छतीति ॥ तात्त्वकर्क भाष्यकृता मंत्रसाभिधानाच्च सुतरां ॐकारादित्वं ॥ इति ॥
अत एव पितृदपितादौ सर्वत्र प्रणवादित्वे नोल्लेखः ॥ पित्रे पित्र यज्ञत्वादिशात् पश्चात् द्विस्तूष्णीमिति बोध्यं ॥ पित्रे पितृ
यज्ञवदित्यतिदेशेन स्वाहा सोमाय पितृमते स्वाहा अग्नये कव्यवाहनाय ॥ इति पित्रे पितृयज्ञाय होम मंत्रौ श्राद्धे प्रतीयेते
अत्र स्वाहा इत्यनेन हुत्वा सोमाय इत्यादि पाठमाह ॥ छन्दोगपरिशिष्टं ॥ स्वाहा कुर्य्यान्न मंत्रान्ते नचैव जुहुयाद्धविः ॥ स्वाहा
कारेण हुत्वाग्नौ पश्चान्मंत्र समापयेत् ॥ अत्र सामगेनाग्नौ करण होमे स्वाहान्तैः मंत्रान्ते स्वाहा न प्रयोक्तव्या ॥ होमश्चानक
र्तव्यः इति प्रतिषेधमुक्त्वा करणप्रकारमाह ॥ स्वाहाकारेणेति ॥ तेन स्वाहाकारेण हुत्वा सोमाय इति वदेत् ॥ अग्नौ होमे
अतः ऊर्द्ध्वं ॥ अग्नौ करण होमादूर्द्ध्वं । प्राचीनावीतिना कार्य्यमिति गृह्यान्तरे अग्नौ होमानन्तरं प्राचीनावीतित्व[illegible]लनियमाभि
धानात् तत्पूर्वमुपवीतित्वं प्राचीनवीतित्वं वा सूचितं ॥ अत एव तत्र वक्तव्यं छन्दोगपरिशिष्टेन सहैतदुक वचनाभ्यां व्यक्तीकृतं

अग्नौकरणहोमश्च कर्त्तव्यः ॥ उपवीतिना प्राङ्मुखेनैव देवेभ्यो जुहोति इति श्रुतिः ॥ अपसव्येन प्राचीनवीतिना वा कार्य्यो दक्षिणाभिमु
खेन तु निरुप्य। पित्रार्थं हविः निरुप्य देवाय नदीयते इत्यर्थः। दक्षिणाभिमुखेन हविः निरुप्य अन्यस्मै न हि हूयते उत्सर्गश्च दक्षिणा
स्ये विहितं ॥ तदसंवे मत्स्यश्च पुराणं ॥ अग्न्यभावे तु विप्रस्य पाणावेव जलेऽपि वा ॥ इति हस्तजलयोरप्यग्नौ विशेषवचनं त्वयं
प्राचीनवीतिना पितृकर्मत्वे हेतुरयं सोमादीनामपि पितृत्वश्रवणात् पितृकल्पं तथा श्रुति ॥ अग्निर्मा तन्निर्वापयेत पितृभ्यो
निर्वपामीति ॥ नैवं प्रतिनिधिं कुर्य्यात् यज्ञार्थे याज्ञिको यदि ॥ प्रकृत्यैव होता ब्रूयात् घृतवतीमिति इति यज्ञपार्श्ववचनात्
शब्दहविः प्रतिपत्तिरिति श्रौतकात्यायनसूत्राच्च ॥ ततश्च प्रतिनिहित द्रव्ये श्रुतशब्दः प्रयोज्यः श्रुतद्रव्यबुध्या प्रतिनिधि उपादानात् ॥
शब्दान्तरप्रयोगे द्रव्यान्तरबुद्धिः प्रसंगाच्च ॥ एवं प्रतिनिहित गुडादावपि विप्रपाणावग्नौ करणपक्षे तत्र पात्रे हुतशेषं न दद्यात् ॥
यथा छन्दोगपरिशिष्टं ॥ पित्र्ये य पंक्तिमूर्द्धन्यः तस्य पाणावनग्निमान् ॥ हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत् ॥ अन्येषा
मिति ग्रहणात् तत्र पात्रे हुतशेषं न देयमिति श्राद्धविवेकः ॥ अथ हुतशेषदानं ॥ गोभिलः ॥ हुतशेषं दत्वा पात्रमालभ्य

२२ जपति ॥ ओं पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे ऽमृते ऽमृतं जुहोमि स्वाहा ॥ इति ॥ अत्र पात्रमात्रश्रुतेः । विश्वेदेवपात्रेऽपि कृतशेषदानं
२२ प्रतीयते ॥ यत्तु यमवचनं ॥ अग्नौकरणशेषन्तु पित्र्ये तु प्रतिपादयेत् ॥ प्रतिपाद्य पितॄणां तु न दद्यात् वैश्वदैविकं ॥ इति ॥ तत्र पित्र्ये त्विति
तु अर्थ्योऽपि न नियमार्थः ॥ अतस्वोत्तरार्द्धं पितृदानानन्तरं विश्वेदेवदानं निषिध्यति ॥ न तु विश्वेदेवदानानन्तरं पितृदानं निषिध्यते
समुच्चयार्थतस्मृतावपि ॥ अन्नाहिताग्नेः विप्रस्य यदग्नौकरणं कृतं ॥ विश्वेदेवाय दातव्यं पश्चात् पित्र्ये निवेदयेत् ॥ कृतशेषं
पात्रेषु दत्वा पिण्डार्थमवशेषणमाह यमः ॥ कृतोच्छिष्टं ब्राह्मणेभ्यः पिण्डार्थमवशेषयेत् ॥ इति ॥ हारीतोऽपि ॥ अग्नौकरण
शेषन्तु पिण्डार्थमवशेषयेत् । स्वयञ्च यमेन कृतशेषमात्रप्रतिपादनात् ॥ गोभिलेन ॥ कृतशेषं दत्वेत्यत्र तथाभिधानात्
पारस्कराच्च कृतशेषं दत्वा पात्रमालभ्य जपति ॥ पृथिवीयनेनाम्न तं विस्मृतो यज्ञशेषभोजनशेषयोः इत्यमरसिंहोक्तः यज्ञशेषमात्र
प्रतीतेः ॥ ततः कृतशेषदानानन्तरं प्रक्षेपनानन्तरमेव छन्दोगयजुर्विदो पात्रालम्भनादनन्तरमन्नादिपरिवेशनं ॥ स्वयमेवानिरुद्धभट्ट
प्रभृतयः ॥ यत्तु कृतशेषं प्रदद्यात्तु भाजनेषु समाहितः ॥ यथालाभोपपन्नेषु रौप्येषु तु विशेषतः ॥ दत्वान्तं पृथिवी ते पात्रं इति पात्राभिमंत्र

नं ॥ कृत्वेदं विष्णु रित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् ॥ इति याज्ञवल्क्यवचनेन कृतशेषमन्नादिकं व्याप्य दत्त्वा पात्रान्तरालम्भनमुक्तं ॥ तच्च रयन्तो
शीयं मन्त्रलिङ्गविरोधात् श्रुत्यन्तरकल्पनापत्तेश्च ॥ गोभिलवचनेन कृतशेषदानानन्तरं एव पात्रान्तरालम्भनमुक्तं याज्ञवल्क्यवचनेन
कृतशेषान्नदानानन्तरं उक्तं इति वाक्यभेदात् विप्रतिपत्त्यान्तरकल्पनापत्तेश्च ॥ इति ॥ कृतशेषं दत्त्वा पात्राभिमन्त्रणं कृत्वान्नं दद्यात्
इति वाक्ययोजना कार्या ॥ एतेनान्नादिदानानन्तरं पात्रालम्भनं मैथिलोक्तं हेयं ॥ अतएव पश्चाद्देवान्नादिपरिवेशनमाह ॥ मार्क-
ण्डेयपुराणे ॥ कृत्वावशेषं स्थाप्य भाजनेषु द्विजन्मनां ॥ भाजनालम्भनं कृत्वा दत्त्वान्नं यथाविधि ॥ यथासुखं जुषध्वं भो इति वाच्यमनि-
ष्ठुरं ॥ इति पात्रालम्भनं ॥ दैवे तु उत्तानपाणिभ्यां पित्र्ये तु उत्तानपाणिना ॥ दैवे नूत्तानपाणिभ्यामनुत्तानाभ्यां च पैतृके ॥ इति मनुवचनात्
गोभिलः ॥ वैष्णव्यर्चा यजुषा वाङ्गुष्ठमन्ने निधाय । अपहता इति तिलान्वीकीर्य उष्णमन्नं दद्यात् ॥ इति ॥ इति वैष्णवी ऋक्
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा ॥ इत्यादिपूर्वोक्तयाज्ञवल्क्यवचनात् ॥ यजुषा कृष्णा कव्यादिना
पृथिवीति पात्रं इत्यन्तमन्त्रं चिन्तयन् पठन् कृष्ण कव्यमिदं रक्ष मदीयं इति कीर्तयेत् ॥ एकैकस्याथ विप्रस्य गृहीत्वाङ्गुष्ठं

श्राद्धात् ॥ इति ब्रह्मपुराणात् कव्यं ॥ इति पितृपक्षे हव्यं ॥ इति दैवे ऽहनीयं ॥ व्यक्तऋग्वेदीयग्रन्थे ॥ विष्णोः हव्यं च कव्यं च ब्रूयाद्रक्षेति
२३ वैक्रमात् ॥ इति याज्ञवल्कीय ब्रह्मपुराणयोः ऋग्यजुषोः प्रत्येक मात्रोक्तेः गोभिलसूत्रे वाशब्दो विकल्पार्थः ॥ समुच्चयार्थत्वे निःसन्दि
२३ ग्धार्थं दन्वादिकर्मेव निर्दिशेत् ॥ एवमेवानिरुद्धभट्ट कर्क प्रभृतयः ॥ एतेन मैथिलोक्तः समुच्चयार्थो हेयं ॥ ऋक्क परिभाषामाह जैमिनिः
तेषामृग् यत्रार्थवशेन पादव्यवस्थितिरिति ॥ तेषां मंत्राणां मध्ये यत्रार्थवशेन एकान्वयित्वेन अनुष्टुबादि पादव्यवस्थितिः सा ऋक्
यजुः परिभाषायामपि स एवाह ः शेषे यजुः शब्द इति ॥ शेष ऋक् सामभिन्ने मंत्रजाते ॥ साम परिभाषामाह स एव ॥ गीतिषु सामाख्येति
गीयमानेषु मंत्रेषु सामसंज्ञा इत्यर्थः ॥ ततश्च यन्मंत्रजातं प्रश्लिष्टं पठितं आनपाद विच्छेद रहितं तद्यजुः ॥ एवंञ्च यजुषश्छन्दो ना
स्तीति ॥ यत् प्रमाणिकैरुक्तं तदेव तादृक मंत्र परं न तु यजुर्वेदोक्तः मंत्रमात्र परं ॥ ततश्च भोक्तृ ब्राह्मणानां गुष्ठं उच्छिष्टवा इदं
विष्णो इति ऋचा कव्यमिति अन्यतरं पठित्वा इदं हविरित्युक्त्वा अंगुष्ठमन्ने निवेशयेत् ॥ इदं हविरित्येवं अंगुष्ठ मन्न
अन्नविध्यां ब्राह्मणोऽभ्योदद्यात् इति ॥ पैठीनसि वचनात् ॥ अंगुष्ठं निवेश्य इति शेषः ॥ अन्नविध्यां अन्नप्रकाराणामिति कल्पतरुः

एषु वचनेषु अग्नौ अंगुष्ठ निवेशन श्रुतेः जलादावप्यंगुष्ठ निवेशनं हैवं ॥ अत्र ॥ निरंगुष्ठं च यत् श्राद्धं वहिर्जानु च यत्कृतं ॥ वहि
र्जानु च यत्सूक्तं सर्वं भवति चासुरं ॥ इति यमवचने निरंगुष्ठ श्राद्ध निन्दा श्रुते ब्राह्मणाभावेऽपि तत् प्रति निधित्वेन श्राद्धकर्ता अंगुष्ठं
निवेशयेत् ॥ अत एव जो भिलेन सामान्यतोऽङ्गुष्ठं निधाय इत्युक्तं ॥ ततो अपहता इति मंत्रेण तिलान् विकिरेत् ॥ अपहता
इति मंत्रपाठस्तु पितृपक्ष एव रक्षोघ्नत्वात् देवानां तु स्वतो रक्षोघ्नत्वात् न तत्र अपहता इति मंत्रेणापेक्षा अत एव पितृपक्षीय
त्वादेव तिलविकरणमुक्तं न तु यवविकरणमिति ॥ एवमेव कर्क भाष्यं ॥ गुणविष्णुनाप्ययं मंत्रस्तिलविकरणार्थः व्याख्यातः ॥ ततश्च
अनिरुद्धभट्टेन देवपक्षेऽपि समंत्रकं यवविकरणमुक्तं ॥ तत् सूत्रानुपात्तत्वादुपेक्ष्यं ॥ ततोऽन्ते मधु तदभावे गुडं वा तत्प्रतिनिधित्वेन
दक्षिणपात्रे मधुवाता इति मंत्रत्रयं मधु मधु मधु इत्यनेन वान्नमभिमंत्र्य प्रोक्ष्य वामहस्ते नान्नपात्रं धृत्वा ब्राह्मणे जलगंडूषं
दत्वा सोपकरणमन्नं प्रागुक्त गोत्र सम्बोधनादि उल्लेखेन दद्यात् ॥ मधु मधु मधु इति मंत्रत्रिर्जपो हसितुमिच्छतो ॥ गायत्र्यनन्तरं
सोऽत्र मधुः मंत्र विवर्जितः ॥ इति छन्दोग परिशिष्ट वचने मधु मधु मधु इति मंत्रं पार्वणे भोक्तुमिच्छतां ब्राह्मणानां श्रावयेत्

२४ मधु मधु मधु इति त्रिर्जपो मधुवाता इति मंत्रेण सहितो गायत्री॰ जपानन्तरं क्रियते ॥ सोऽत्र अभ्युदयिक श्राद्धे मधुवातेति मंत्रवर्जित
25 इति श्राद्धविवेक व्याख्यानात् ॥ गायत्रीं त्रिः सकृद्वापि जपेत् [illegible] व्याहृति पूर्विकां ॥ मधुवातेति त्र्यृचं मधु इति एतत् त्रिकं जपेत् इति मिता
क्षरा ॥ धृत पारस्कर वचनात् ॥ दैवपूर्वं पितृभ्यो ऽन्नमाज्यपूतं मधुप्लुतं ॥ दैवपूर्वं पितृभ्यो दातव्यमन्नं ॥ मंत्रितं पृथिवीत्येवं मधुवा
ता ॥ त्र्यृचं जपेत् ॥ अन्नं मधुमयं कृत्वा मधुवाताभिमंत्रितं ॥ इति यमवचनात् ॥ अङ्गुष्ठस्पृष्ट्वा दद्यात् आलभ्य चेति ॥ हारीत वचनात्
आलभ्य स्पृष्ट्वा ॥ ततो मधुघृताक्तं तु सोष्णमन्नं तिलान्वितं ॥ गृहीत्वा दक्षिणेनैव प्रणवेनैव तत्पुनः ॥ एतद्वोऽन्नमिति उक्त्वा विश्वान्
देवांश्च संयजेत् ॥ पितृभ्यश्च ततो दद्यात् अन्नमामंत्रणेन तु ॥ अमुकामुक गोत्रेभ्यः तुभ्यमन्नं स्वधा नमः इति ब्रह्मपुराणे वचनाच्च ॥ दैवेति
तिलान्वितं इति शौनकीयं ॥ अत्र उष्णभागा हि पितर ॥ इति श्रुति दर्शनात् सोष्णमन्नमिति उक्तं ॥ अत एव मनुः ॥ यावदुष्णं भवेदन्नं तावदश्नन्ति
वाग्यता ॥ तावदश्नन्ति पितरो यावन्नोक्ता हविर्गुणाः ॥ वाग्यतत्वाभिधानात् एव श्राद्धभोक्तुः हविर्गुणाभिधाने सिद्धे यावन्नोक्ता हविर्गुणा
सि इति एतदभिधानात् इति आदिना गुणप्रतिपादन निषेधार्थं ॥ अत्र प्रष्टकादीनामनुष्ठानं नापेक्षितं ॥ आपस्तम्बेन पर्युषित

स्यापि प्रतिप्रसूतत्वात् यथाप्रतिसिद्धमित्युपक्रम्य ग्राग्रसाम्य ॥ कृतान्नपर्य्युषितं पयकचुराउत्तकरमउरुपुशक्तु पिष्टक
क्षीरविकारौषधिवर्जमिति एषु वचनेषु मधुप्लुतं मधुमयं घृतान्नं इति श्रुतेर्मधु इसं तत्र त्रिकं जपेत् ॥ इति पारस्कर वचनात्
मधु मधु मधु इति त्रिर्जप इत्यस्य मधुद्रव्य सम्बद्धो मधु इति त्रिर्जप इति व्याख्येयं ननु मधु इत्यस्य त्रिर्जप ॥ इति ॥
मधुवाता भिमंत्रितं ॥ इति मधुवाता इतिऋक् ॥ त्र्यंबकाभिमंत्रितं इति त्रिरामामासां न्यर्चा ॥ सुगपड्डीहितये च
सर्वत्र प्रयोगोदर्शनात् ॥ अभिमंत्रणं अभिमुखेन मंत्रपाठः ॥ तथाभिमंत्रणं स्पर्शं विनैव द्रव्यमभिमंत्रयेदिति वदन्ति
नवीनवर्द्धमानः ॥ एतेन वाचस्पतिमिश्रोक्तमन्त्रस्पर्शपूर्वकं अभिमंत्रणं हेयं ॥ तेनैव द्रव्योत्सर्गे स्पर्शं विनैव द्रव्या
भिमंत्रणमित्युक्तं ॥ अथ विहिताविहितद्रव्याणि ॥ वायुपुराणे ॥ हस्ता माषा तिला श्चैव श्रेष्ठास्युर्यं शालयः २४७
शालिर्हैमन्तिकं धान्यं तत्र प्रभवतराउत्तादि ॥ अत्र द्रव्य कृष्णा धान्येन वैधकर्म्म करणं ॥ तथाच हरिवंशे इन्द्रप्रति
सुरभिवाक्यं ॥ कर्षकानपुंगवैर्वीर्ध्ये मध्येन हविषानुगान् ॥ स्त्रियं साक्षत प्रयतेन नर्पयिष्या महे वयं ॥ स्कृत गोमयः ॥

२५ 25 बिल्वामलकमृद्वीकापनसाम्रातदाडिमं ॥ भव्यं पाणिरताख्योटुं खर्जूराम्रफलानि च ॥ कशेरुः कोविदारश्च तालकन्दस्तथा
बिसं ॥ मृद्वीका द्राक्षा भव्यं कामरंगं पाणिरतं करमर्दं आख्योटुं जम्बिकाकारफलं काश्मीरादौ प्रसिद्धं तालकन्दः तालमूली
इति प्रसिद्धं बिसं मृणालं ॥ मनुः ॥ तिलैर्व्रीहियवैर्मांसैरद्भिर्मूलफलेन वा ॥ दत्तेन मासं प्रीयन्ते विधिवत्पितरो
नृणां ॥ व्रीहिः शरत्पक्वधान्यं ॥ याज्ञवल्क्यः ॥ हविष्यान्नेन वै मासं पायसेन तु वत्सरं ॥ मात्स्यहारिणकौरभ्रशा
कुनच्छागपार्षतैः ॥ ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं ॥ मासवृद्ध्याभितृप्यन्ति दत्तैनेह पितामहाः ॥ हविष्या
न्नेन शालीव्रीहि अन्नेन मत्स्येति मत्स्यादिमांसैः उरभ्रो मेषः ॥ शाकुनि विहित लावकादि पृषत श्चित्रमृगः ॥ एणाः
कृष्णमृगः रुरुर्वकुलमृगाः ॥ क्षात्रियव्रतोपयुक्तः चर्म्मक इति दीपकलिका ॥ यक्षरक्षःपिशाचान्नं मद्यं
मांसं सुरासवं ॥ तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ॥ इति मनुवचने मद्यादिसाहचर्यात् मांसमासमिति
टीकाकृद्भिर्व्याख्यातं ॥ तद्वच्चाग्राम मांसं श्राद्धेन देयमिति वदन्ति नतान्नईपश्यन्तं ॥ प्रकाबलवलमैव प्रकृत्या हवि
रुष्यतौ

इति मनुवचनविरोधात् ॥ अत्रानुपस्कृतमित्यनेन पाकोपस्काररहितमामममिहोक्तं ॥ तदपि हविः ॥ नचानुपस्कृतं अविकृतं ॥
पूतिगन्धादिरहितं ॥ कल्लूकभट्टव्याख्यानं उक्तंशब्दानभिधानत्वात् ॥ इति गौडदाक्षिणात्याभ्यां तथा व्यवह्रियते ॥ अन्यत्रानिनीकारादीनि
तथा वशिष्ठः ॥ अन्नं पर्युषितं भावदुष्टं सकृल्लेखं मनसा दुष्टं चत्रांस्पदं विचिकित्सात्तु हृदये यस्मिन्नन्ने प्रजायते ॥ सकृल्लेखं तु
विज्ञेयो पुरीषं तु विशेषतः ॥ पुनः स्मृतिः आममद्रजीषं पंककाममनर्दध्याच्चतेनाभिघारितमुपभुञ्जीतेति ॥ आमं तराडुलादि
पर्युषितादि अर्जीषपशांतमन्नं ॥ निषिद्धमपि कामयं ॥ दध्याच्चतेनाभिघारितमुपभुञ्जीत इत्यनेन भोज्यान्तरासम्भवे स्वं
भुंजीत इत्यनेन नैयतकालिककल्पतरुवचनात् ॥ व्याख्यानाच्च ॥ तत्र आमं तराडुलादि इति व्याख्यानबीजन्तु ॥ शस्यं क्षेत्रगतं
प्राहुः सतुषं धान्यमुच्यते ॥ आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतं ॥ इति वशिष्ठवचनेन स्विन्नास्विन्नतराडुलयोर्यथासंख्य
मन्नत्वेनामयत्वेन च परिभाषितत्वात् पूर्वसूत्रेऽपि अन्नाम पदाभ्यां तथैव प्रतीयते ॥ तथा आम पदेन आर्द्रकादि प्रतीयते ॥
तत्रश्च ॥ आपद्यनग्नौ तीर्थेषु चन्द्रसूर्य्यग्रहे तथा ॥ आमः श्राद्धं द्विजैः कार्य्यं शूद्रेन तु सदैव हि ॥ इति प्रचेतोवचनात् तराडुलादे

तादानीमभक्ष्येऽपि पश्चात् पाकेन भक्ष्यत्वदाम ॥ मांसस्य तदानीमभक्ष्येऽपि पश्चात्त पाकेन भक्ष्यत्वात् श्राद्धे देयत्वं प्रतीयते ॥ एवं चतद्ब्राह्मणेन
नात्र क्षमित्ति आमत्तदशायां ॥ हारीत ॥ कालशाकञ्च वास्तुकं मूलकं तथा ॥ कृष्णानालिकावेत्राकुरं कलायं च पटोलं शूर्षपं तथा ॥ सूर्य्या
वर्तं सुनीसन्नं शाकान्याहुः मर्णीषिणः ॥ सूर्य्यावर्तं सुलुटिया इति ख्यातं ॥ वायुपुराणे ॥ वैकंकतं नारिकेलं शृंगाटकपरार्षकं ॥ पीप्पलीमरीच
श्चैव पटोलं वृहतीफलं ॥ एवमादीनि चान्यानि स्वादूनि मधुराणि च ॥ अन्यानि खानि षिद्धानि ॥ नागरं चात्र वै देयं दीर्घमूलकमेव च
नागरमार्द्रकं ॥ करफलं किंकिरणी द्राक्षा नकुचं मोचमेव च ॥ करफलं गम्भीरिफलं किंकिरणी अम्लरसा द्राक्षा इति लक्ष्मीधरः ॥
जलजम्बुरिति हलायुधः ॥ मोचकं कदलीफलं ॥ सवीजं निषिद्धं ॥ आदित्यपुराणे ॥ मधुकं रामकश्चैव कर्पूरं मरिचं गुडं ॥ श्राद्ध ॥
कर्म्मणि शस्तानि सैन्धवस्तुषस्तथा ॥ रामचं हिंगं स्तुषं सुकाशिका अर्थात् शिंघारा इति ख्यातं ॥ शंखः ॥ पिप्पलिमरीचश्चैव तथा
वैपराउमूलकं ॥ कृतं च लवनं सर्वं वंशाग्रंच विवर्जयेत् ॥ कृतं लवनं क्षारमृत्तिकाभिः कृतिमं ॥ अत एव मनुना पिठविषये क्षार
क्षारवलवणं विहितं ॥ अत्र हिंगुञ्च मरीचि पिप्पलीनां स्वरूपेन देयता द्रव्यान्तर संस्कारकत्वेन देयता पूर्ववचन सिद्धः ॥

विष्णुः ॥ कुष्माण्डालाबु वार्ताकि ग्राम्यमाहीषकुण्धकं ॥ पालांकीं राजिकां श्राद्धे सिन्नान्नञ्च विवर्जयेत् ॥ द्विःस्विन्नश्चेतदेव यत् शूपकार शास्त्रोक्ता
पेक्षित पाकनिष्पत्त्यनन्तरं शैत्यादी निवृत्तये पुनःपाकान्तरयुक्तं न तु स्वेद पाकान्तरं तत्र शास्त्रोक्तः सम्भारशारूप पाकान्तर सिद्धव्यञ्जनादिष्वप्रती
तार्थोक्त निर्देशात् ॥ अतएवं तैलादिष्वेषमनन्तरं गुडादि पक्वं मोदकादि शिष्टैर्दीयते भुज्यते च ॥ अन्यथाद्विःसंस्कृतस्याभोज्यत्वं न
स्यात् ॥ पर्युषितं द्विसिद्धिमभोज्यमन्यत्र हिरण्योदकस्पर्शात् मरुति स्मृत्यन्तरोक्ते ॥ यमः ॥ पञ्चमुद्गमुक्ताएन भुक्तेः यत्र तैलादिभि
र्घारितं ॥ रजस्वलाभिर्यद्दृष्टं तद्वै रक्षांसि गच्छति ॥ तैलाभिघारितमिति घृतसम्भवे तदसम्भवे तैल पाकमिलापस्तम्बे तैवतैल
पाकाभिधानात् ॥ तिलैः श्राद्धं पुष्टिकामं कूर्य्यात् पूपैः ऋद्धिकामः घृतगुड तिलैस्तेजस्कामः सौभाग्यकामः आरोग्यकामो वा ॥
परमान्नकृसरमांस दधियवापूपैः ॥ सर्वकाम इति हरीतेन फलकथनाच्च ॥ एवञ्चैतेषां काम्याभिलाषं विना पितॄन् प्रत्यतिशय
सम्पादकत्वेन फलविशेषजनकत्वं ॥ स्मृतिसागरे सारे स्मृतिः ॥ नारिकेलजलं कांस्ये ताम्रपात्रे घृतं मधुः ॥ गव्यं च ताम्रपात्रस्थं
मधुतुल्यं घृतं विना ॥ ताम्रपात्रे कृतं मांसं पञ्चगव्यं घृतेतरत् ॥ आमिषं तु गवां मांसं दधिम●ध्यं पयोरजः ॥ दृव्यान्तरं एतं

२७ मांसं पयसा संयुतं दधि ॥ पयोऽनुद्धृतसारं च ताम्रपात्रे न दुष्यति ॥ एतत्परार्द्धानुसारात् शारदातिलकोक्तं ॥ ततश्च संस्कृते वह्नौ गो
27 क्षीरेन चरुं पचेत् ॥ शातातपः ॥ गोकुले कन्दुशालायां तैलयंत्रेक्षुयंत्रयोः ॥ अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च ॥ बालः पंचवर्षा
भ्यन्तरवयस्कः ॥ अमीमांस्यानि शौचाशौचभागितया न विचारणीयानि ॥ इति भवदेवभट्टरत्नाकरादयः ॥ अतः कूर्मपुराणे ॥
कन्दुपक्वानि तैलेन पायसं दधि शक्तवः ॥ द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥ कन्दुपक्वं जलोपसेकं विना यद्धस्तवह्निना पक्वं
भ्रष्टतण्डुलादि ॥ पायसं पाकसंस्कृतं दुग्धं परमान्नपरत्वे पुंलिङ्गनिर्देशापत्तेः ॥ शर्कराक्षीरसंयुक्तापपूपकालिसमदाया ॥
शष्कुलीर्लाजान् तथापूपान् कुल्माषव्यञ्जनैः सह ॥ सर्पिःशिक्तानि सर्वाणि दध्नासात्कृत्य भोजयेत् ॥ कुल्माषो यावकः ॥ कुल्माषं
कांजीकेत्यौकं कुल्माषो यावके पुमान् ॥ श्राद्धेष्वेतानि यो दद्यात् पितरः प्रीणयन्ति तं ॥ अन्नपाके सपिण्डाधिकारमाह देवलः
तत्रैवामंत्रितो दाता प्रातः स्नातः सहाम्बरः ॥ आरभेत नवैः पात्रैरन्नारम्भं सबान्धवैः ॥ तथैवामंत्रितः सर्वायासविनिर्मुक्तत्वादि
भिरामंत्रितः ॥ सहाम्बर इति द्वितीयवस्त्रप्रावरणं ॥ एकवस्त्रस्य अलग्नत्वेन प्रतिषेधेन प्राप्तत्वात् ॥ एतेन कुशरज्ज्वादिर्वस्त्र

प्रतिनिषिद्धिर्न्नभवतीति सूचितं ॥ एवमेव स्नाने प्रसदत्त भाष्यकल्पतरुः ॥ श्राद्धपाकार्थं तण्डुलस्य सकृत् प्रक्षालनमाह गोभिलः ॥ त्रिः फली
कृतां स्तण्डुलां स्तीर्थ देवेभ्यः प्रक्षालयेत् ॥ द्विः मनुष्येभ्यः सकृत् पितृभ्यः इति ॥ आमश्राद्धे योगिनीतंत्रं ॥ निरग्नेरामश्राद्धे तु अन्नं न क्षाल
येत् क्वचित् ॥ पक्वौ तु क्षालयेदन्नं संक्रमस्य ग्रहणेषु च ॥ मार्कण्डेयपुराणं ॥ पशुभूताय नोदकस्थं यच्चाभोज्यं निपानजं ॥ तद्वर्ज्यं
शलिलं तात सदैव पितृकर्मणि ॥ अत्रिस्मृतिः ॥ पादेनाघट्टमुत्थाप्य भाजने पूरयेज्जलं ॥ तत्तज्जलं मदिरातुल्यं गाराउस्यं सुरयासमं
मदिरा सुरेतररूपा सुरापैष्टी ॥ वराहपुराणं ॥ अप्राकृतान्यन्नाणां चैव धान्यजातं द्विजोत्तम ॥ राजमाषानणूंश्चैव मसूरांश्च विवर्ज
येत् ॥ अग्रयणां नवशस्य इषि श्राद्धं च यथयोग्यं साग्निनिरग्निपरं ॥ ब्रह्मपुराणे ॥ द्विः स्विन्नं परिदग्धं च तथैवाग्रावलेहितं
शर्करा कीटपाषाणैः केशैर्यच्चाप्युपद्रुतं ॥ पिण्याकं मथितं चैव तथातिलवणं च यत् ॥ सिद्धाः कृताश्च ये भक्ष्याः प्रत्यक्षलवणी
कृता ॥ वाग्भावदुष्टाश्च तथा दुष्टिश्चोपहतस्तथा ॥ वाससा चावधूतानि वर्ज्यानि श्राद्धकर्मणि ॥ अग्रावलेहितं ॥
श्राद्धीयोपकल्पितं ॥ सदुपभक्ताग्रभागं ॥ सिद्धाः कृताश्च इति सिद्धेषूत्तरकालं प्रत्यक्षलवणविक्षेपः कृतो येषु ते ॥

२८ विष्णुपुराणं ।। अलाबुं गृञ्जनं चैव पलाण्डुं पिण्डमूलकं ।। गन्धारककरम्भानि लवणान्यौषधानि च ।। आरक्ताश्चैव निर्य्यासाः प्रत्यक्ष
28 लवणानि च ।। वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते ।। नक्ताहृतमनुत्सृष्टं जलं ।। तृप्यते न च यत्र गौः ।। दुर्गन्धि फेनिलं चाम्बु श्राद्धयोग्यं
न पार्थिव ।। क्षीरमेकशफानां यत् औष्ट्रमाविकमेव च ।। मार्गं च माहिषं चैव वर्जयेत् श्राद्धकर्म्मणि ।। अथ परिवेशनं ।। मनुः ।। पाणिभ्यां
उपसंगृह्य स्वयमन्नस्य वर्द्धितं ।। विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिःक्षिपेत् ।। अन्नस्येति तृतीयार्थे षष्ठी वर्द्धितं पूरितं पात्र
मिति शेषः ।। उपनिःक्षिपेत् परिवेशनार्थं पाकस्थानादाकृष्य समीपे धारयेत् ।। प्रथमं भोजनपात्रे न देयं किन्तु स्थाल्यादिकं पाणिभ्यां
पात्रसमीपे भूमौ संस्थाप्य पश्चात् पाणिभ्यां पात्रान्तरिताभ्यां श्राद्धे परिवेशनं कुर्यात् ।। उभाभ्यामपि पाणिभ्यामाहृत्य परिवेशयेत्
इति मत्स्यपुराणात् ।। यत्तु श्राद्धे परिवेशनं तु दक्षिणपाणिमात्रेणैव ।। अज्ञानमिथ्यानात् ।। इति मैथिलोक्तं तन्न एकेन पाणिना दत्तं
शूद्रदत्तं न भक्षयेत् ।। इति आदित्यपुराणीय ।। एकैव पाणिना दत्तं शूद्रदत्तं भक्षणं निषेधेन तन्मात्रपरिवेशनं अस्यापि ।।
निषिद्धत्वात् पाणिभ्यामपि पात्रान्तरितं कुर्यादेवं ।। हस्तदत्ताश्च ये स्नेहा लवणव्यञ्जनानि च ।। दातारं नोपतिष्ठन्ते भोक्ता भुंक्ते च

किल्विषं

तस्मादन्नादितं देयं परेणाप्यन्तरेणवा ॥ प्रदद्यान्नतु हस्तेन नायसेन कदाचन ॥ इति वशिष्ठेन सामान्यतो निषेधात् ॥ पितृभक्ति
तरंगिण्यामप्येवं ॥ मनुश्च ॥ गुणांश्च सूपशाकाद्यान् पयोदधिघृतं मधु ॥ विन्यसेत् प्रयतः सम्यग् भूमावेव समाहितः
आमिषं पान पात्रं च भोक्तुर्दक्षिणतो न्यसेत् ॥ भक्ष्यं भोज्यं च विविधं मूलानि च फलान्यपि ॥ हृद्यानि चैव मांसानि पा
नानि सुरभीणि च ॥ उपनीय तु तत् सर्वं शनकैः सुसमाहितः ॥ परिवेशयेत् प्रयतो गुणान् सर्वान् प्रचोदयन् ॥
उपकरणानि भूमावेव नतु व्यंजनादि पात्राणि अन्नादि पात्रोपरि निःक्षिपेत् ॥ अथ अन्नोत्सर्गानन्तरं कृत्यानि ॥
तत्र गोभिलः ॥ सकृत् सकृदपो दत्वा गायत्रीं मधुवातां च जपित्वा अपृक्तस्तु जपेत् व्याहृतीपूर्विकां सावित्रीं सप्रण
वामित्यर्थः ॥ इति ॥ एतच्च ब्राह्मणहस्ते सकृत् सकृत् जलं दत्वा जुषध्वं इत्युक्त्वा भवन्तः प्रीणायध्वं इति ॥
अनेन मंत्रेण आपोशानार्थं दद्यात् दत्वा जुषध्वमित्युक्तो वाग्यमेनैतदनिष्ठुरमिति विष्णुपुराणेन ॥ दत्वापो
शानमासीनः सावित्रीं त्रिर्जपेद्बुधः ॥ मधुवाता इति त्र्यृचं मध्वित्येतो भोजयेदिति समुद्रकारध्वतेन ॥ तेभ्योदद्यात्

२९ आपोशानं भवन्तः प्राशयन्तु ॥ इति ब्रह्मपुराणीयेन चैकवाक्यत्वात् ॥ ततो गायत्रीं मधुवाता इति त्र्यृचं जपित्वा अन्नहीनं इति जपेत्
२१ तथा च यमः ॥ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु इत्युक्त्वा यत्नेन भोजयेत् ॥ ततो भुंजानेषु
तेषु ब्राह्मणेषु सप्रणवां व्याहृतीकां गायत्रीं जपेत् ॥ एतदनन्तरं ॥ मधुवाता इति त्र्यृचत्रयं मधु मधु मधु इति च जपेत् ॥
तथा च याज्ञवल्क्यः ॥ सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं ॥ जप्त्वा यथासुखं वाच्यं भुंजीरंस्ते ऽपि वाग्यताः ॥
अन्नमिष्टं हविष्यं च दद्यादक्रोधनो ऽत्वरः ॥ आतृप्तेश्च पवित्राणि जप्त्वा पूर्वजपं तथा ॥ अन्नमिष्टमित्यनेनोत्सर्गो ऽनन्त
रमपि तत्प्रार्थ्यं ॥ अन्नानन्तरादिकं देयं ॥ पवित्राणि इत्यनेन विष्णुपुराणोक्तानि सूचितानि ॥ तत्र दीपकृत्पाठमाह ॥
विष्णुपुराणे ॥ ॐ यज्ञेश्वरो हव्यसमस्तकव्यभोक्ता ऽव्ययात्मा हरिरीश्वरो ऽत्र तत्सन्निधानादपयान्तु सद्यो रक्षां
सि अशेषाण्यसुराश्च सर्वे ॥ इति याज्ञवल्क्यः ॥ श्लोकत्रयमप्यारभ्य ॥ ब्राह्मणाः श्राद्धे श्रावयिष्यन्ति ॥ पितॄणां
तस्य तृप्तिः स्याद्दत्ता यामात्र संशयः ॥ अस्मात् अस्मदीयग्रन्थात् ॥ एवं च यश्चैनं श्रावयेत् श्राद्धे ब्राह्मणान् पादमन्ततः

ग्रक्षय्यमन्नपानं तत्रपितॄणां चोपतिष्ठते ॥ इत्यादिपार्वणश्राद्धे भारतीयश्लोकपादादिश्रावणोक्तेः॥ संक्षेपेन भारतवंशद्वय
निरूपकत्वेन दुर्योधनमन्युमय इतियुधिष्ठिरो धर्म्ममय इति श्लोकद्वयं ग्रपहतागुरुगवीमांसकृतश्राद्ध महत्त्वप्रकाशक
पितृगाथात्वेन इति शेषः॥ सप्तव्याधा इतिचपठ्यते कल्पतरौमत्स्यपुराणात्॥ व्रह्मविष्ण्वर्करुद्राणां स्तोत्राणि विविधानिच
विप्राणामात्मनश्चैव तत्सर्वं समुदीरयेत्॥ विप्राणामात्मनश्चैव श्राव्यत्वेन इति शेषः॥ रवंचात्मनः श्राव्यत्वेन रक्षोघ्नत्वेन
पितृतृप्तिकारकत्वेनच दर्भव्राह्मणापद्धो॰ पिजपः कार्य्यः॥ तथा रक्षोघ्नत्वेन पितृत्वसमर्थत्वेनच पितृ कार्य्यत्वात्॥
प्राचीनवीतिना जपः कार्य्यः॥ प्राचीनवीतिना पितॄणां इतिश्रुतेः॥ प्राचीनवीतिना सम्यगपसव्यमतन्द्रिणा॥ पित्र्यमा
निधनात्कार्य्यं विधिवद्दर्भपाणिना॥ इति मनुवचनाच्च भट्टभाष्येप्येवं॥ ग्रथाग्निदग्धादिनान्नविकरणं॥ तत्र
गोभिलः॥ तृप्तिं सात्वा सतिलमन्नं विकीर्य्य इति मंत्रं जपेत्॥ अग्निदग्धाश्च ये जीवाः ये प्रदग्धाः कुले मम॥ भूमौ
दत्तेन तोयेन तृप्ता यान्तु परां गतीं॥ इति॥ तृप्तिं व्राह्मणानामितिशेषः॥ तज्ज्ञानप्रकार माहस्मृतिः॥ दीयमानं

३० नाप्नुवन्ति अनन्तं च बहु विघ्नाते ॥ ज्ञात्वा तदपि ततो दद्यात् दर्भेषु विकरश्च यः ॥ अनन्तं विशेषयन्ति ब्रह्मपुराणं ॥ उच्छिष्ट सन्ति सान दर्भात्
३० दक्षिणाग्रान् निधापयेत् ॥ यद्वा ॥ यत् पल्लिवेदयेन्ति यं पितृभ्यश्चाप्य तत्र च ॥ तस्मात्तस्माच्च भागान्तु उच्छिष्टाय सर्वसंभे ॥ दत्वा
मता पिधानन्तु विप्रेभ्यश्च सकृत् सकृत् ॥ उच्छिष्टैः उच्छिष्टैः उच्छिष्टा गत इति वचनात् ॥ विकीर्य अग्निदग्धा इति
मंत्रेण ॥ सकुश भूमे अप्रयुक्तण माह विष्णुः ॥ भुक्तवत्सु च विप्रेषु सकुश भूमौ मन्त्रवान्तं विकरणं कुर्यात् उच्छिष्ट
गत इति ॥ अत्र परां गतिमित्यनन्तरं सूत्रस्य इति कारेण येषां न माता इति मंत्रान्तरमुक्तं इत्यादि बहुवचनान्तगणपा
ठस्य संसूचकाः इत्युक्तेः ॥ तथा मात्स्यपुराणं ॥ सार्वर्णिक मन्नाद्यं सन्नियाम्यापा व्यवारिणा समुत्सृजेद् इति ॥ अभुक्तवतां
अग्रतो विकरणं भुवि ॥ अग्निदग्धाश्च ये जीवा ये प्रदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्
ॐ येषां न माता न पिता न बन्धुर्नैवान्नसिद्धिः न तथान्नमस्ति ॥ तत्तृप्तये अन्नं भुवि दत्तमेतत् प्रयान्तु लोकाय सुखाय
तद्वत् ॥ विकरणभागीनं माह ॥ असंस्कृत प्रमीतानां योगिनां कुलयोषितां ॥ उच्छिष्टं भागधेयं स्याद् दर्भेषु विकरश्च यः

सांवत्सरिकं सर्वप्रकारं सन्नीय मिश्रयित्वा ततश्च मंत्राभ्यां तदुक्तफलमुद्दिश्य कुशोपरि दद्यात् ॥ तद्देयासंस्कृतप्र
मीता नाभिस्थादिनोपसंहृतं ॥ ततो हस्तं प्रक्षाल्य आचम्य हरिं स्मरेत् ॥ ततः प्रक्षाल्य हस्तौ च आचम्य च हरिं स्मरेत्
प्रेतभागं विहृत्याप्य प्रायश्चित्तोपशान्तये ॥ इति ब्रह्मपुराणात् गोभिलः ॥ सकृत् सकृदपो दत्वा पुनर्मधुवाताम
मधु च त्रिर्जपित्वा तृप्ताः स्थ इति पृष्ट्वैतरतृप्ताः स्म इति प्रत्युक्तैः शेषमन्नमनुज्ञाप्य इति ॥ अत्र सकृत् सकृदिति श्रुतेः
प्रतिपक्षे प्रत्यापोशानं जलं दद्यात् ॥ दत्वामृतापिधानं तु विप्रेभ्यश्च सकृत् सकृत् ॥ इति ब्रह्मपुराणात् ॥ एतच्च
प्रत्यापोशानं जलपानं हस्ते प्रक्षाल्य न कर्तव्यं ॥ तथा च शातातपः ॥ हस्तं प्रक्षाल्य यश्चापः पिबेद्भुक्त्वा द्विजाधमः ॥ तदन्नमसुरै
र्भुक्तं निराशाः पितरो गताः ॥ इत्थं च मतस्य भुंजानस्य हस्तक्षालनानन्तरमेव आपोशानस्य वैधत्वात् तेन हस्तं प्रक्षाल्य निरामिषम
न्नादिकं त्यक्त्वा आपोशानं कर्तव्यं व्यक्तीभूतमाह्निकतत्वे गोभिलेन मंत्ररहितजलदानाभिधानात् दर्भमयब्राह्मणोऽपि जलदाना
चारः ॥ पुनर्मधुवातेत्यत्र पुनरभिधानं पूर्ववत् गायत्रीजपानन्तरं मधुवाता इति मंत्रप्रतिपत्त्यर्थं ॥ तत्र ॥ तथा च ब्रह्मपुराणीयकीकृतः

३१ सव्याहृतीं सप्रणवां गायत्रीं च ततो जपेत् ॥ पठेन्मधुमतीः पुण्याः स्नात्वा च मधुमक्षिवति ॥ ततः प्रत्यापोशनात् परतः कात्यायनोऽपि तृप्तिं
३। ज्ञात्वाऽन्नं विकीर्य्य सकृत् सकृदपो दत्त्वा पूर्ववत् गायत्रीं जपित्वा मधुमती मधुमक्षिवतीति च जपेत् ॥ सर्वेषां तृप्तिं ज्ञात्वाऽनुमापयेत् तृप्ताः
स्थ इति बहुवचननिर्देशात् सकृदभिधानं तृप्ताः स्म इति तेषामपि प्रतिवचनं तच्च कुशब्राह्मणे नास्तीति प्रयोजनाभावात् ॥ अनुज्ञा
प्यशेषमन्नं च देयमिति ब्राह्मणेभ्यो निवेद्य इष्टेभ्यो दीयतामिति प्रत्युत्तरं ॥ इति शेषः ॥ तथा च ब्रह्मपुराणे ॥ तृप्तानाहुः पुनः शेषं च देयमन्नं
मिति ॥ इष्टेभ्यो दीयतामेतत् इति सम्प्रवदन्ति ते ॥ अथ पिण्डदानं ॥ तत्र गोभिलः ॥ सर्वमन्नमेकतोऽन्नमुद्धृत्य उच्छिष्टसमीपे दर्भेषु मधुमधु
मध्विति सहान्नमिदमेतत् तं पूपमदन्ति इति पठित्वा त्रीन् पिण्डान् दद्यात् ॥ अवनेनिज्येति ॥ अत्र इतिकर्तव्यताः ॥ पिण्डपितृयज्ञवदुप
चारः ॥ पित्र्ये इति पूर्वोक्तसूत्रेणातिदिष्टाः प्रत्येतव्याः ॥ तत्र देशमाह देवलः ॥ पुरस्तादुपविश्यैषां पिण्डवापं निवेदयेत् ॥ ततस्तै
रभ्यनुज्ञातो दक्षिणाग्निसमे स्थले ॥ उपलिप्ते शुचौ देशे स्थानं कुर्वीत सैकतं ॥ मण्डलं चतुरश्रं वा दक्षिणावनतं महत् ॥ पवित्रपाणिः
प्रजपेत मन्त्रं रक्षोघ्नमुत्तमं ॥ निहन्मि सर्वं यदमेध्यवद्भवेत् हताश्च सर्वे सुरदानवा मया ॥ रक्षांसि यक्षाः सपिशाचसंघा हता मया यातु

धानाश्च सर्वे ॥ इति दक्षिणादिकश्राद्धकल्पे प्रपा॥ इति ॥ कल्पतरुः॥ गोभिलसूत्रेऽपि उदकस्य समीपे उल्लेखनं ॥ अतो ब्रह्मपुराणोक्त दिगन्तरा
भिधानात् शाखान्तरीयं ॥ अत्र मंडलमुपक्रम्य प्रतिनुत्तानि हन्मि सर्वमित्यादि यस्मिन् देशेऽपि पठ्यते ॥ एष मंत्रस्तं तं देशं राक्षसा
(रुद्धं यत्नतो) वर्जयन्ति हि ॥ इति ब्रह्मपुराणे अत्र निहन्मि इत्यनेन मंडलकरणं प्रतीयते ॥ अनिरुद्धभट्टप्रभृतिभिरेवं तथा लिखितं
पिण्डपितृयज्ञातिदेशेन तत्प्रकृतिभूतान्वष्टकापिण्डोक्तरेखां मंडलमध्ये कुर्यात् ॥ सव्येन पाणिना दर्भपिञ्जलीं गृहीत्वा रेखा
मुल्लिखेत् ॥ अपहता इति अन्वष्टकायां गोभिलगृह्ये ॥ अत्र वामेन दर्भपिञ्जल्या ग्रहणं मात्रं ॥ रेखा तु वामान्वारब्धेन दक्षिण
हस्तेन कुर्यात् ॥ सव्येन पाणिना उल्लेखं यद्वा सकृदाच्छिन्नं परिग्रहणमात्रं तत्र सव्यस्यादिशति ध्रुवं ॥ पिञ्जल्या इति संगृह्य दक्षि
णेतर वा करात् ॥ अन्वारभ्य च सव्येन कुर्यादुल्लेखनादिकं ॥ इति छन्दोगपरिशिष्टात् ॥ अत्र दर्भपिञ्जल्य वने जलार्थोदक
पात्रवासः ॥ सूत्रादिग्रहणे यत्सूत्रेण सव्येन त्रिवारं गोभिलगृह्ये उक्तं तत्सव्यस्योपदेशो दर्भपिञ्जल्यादिग्रहणार्थः ॥
उल्लेखनादिकं तु वामकरात् दक्षिणेन पिञ्जल्यादिकं गृहीत्वा वामान्वारब्धेन दक्षिणेन कुर्यादित्यर्थः ॥ पिञ्जली पवित्रं ॥

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ एतदेव हि पिञ्जूल्या लक्षणं समुदाहृतं ॥
इति छन्दोगपरिशिष्टात् ॥ अत्र गृह्ये रेखाकरणे । अपहता इत्येतन्त्रेति कारणात्पर्यकेन अपहता इति समुदायमंत्रेणोनि
हन्मीति इत्यादि समुदायमंत्रश्चोक्तः ॥ निहन्मि सर्वं निल्युक्तो अनेन मंत्रेण सुसंयतात्मा वेदीश्च सर्वां सकृदुल्लेखयेद्बुधः ॥
शिवां श्चवर्द्धिं ध्रुवमित्युमानः क्षिपे द्विजातिर्दिशमुत्तरां ततः ॥ इति वायुपुराणीयैकवाक्यत्वात् ॥ निहन्मि इत्यादि वचनं स्वयं
वायुपुराणेऽपि ॥ किन्तु द्विजातिरित्यादौ कुशो तत्र दक्षिणाग्राणि इति पाठविशेषः ॥ ततश्च वायुपुराणात् ॥ तत्पवित्रं
उत्तरस्यां दिशि प्रक्षिपेदित्यर्थः ॥ ब्रह्मपुराणपाठानु रेखो परि दक्षिणाग्रान्कुशांस्तारेदित्यर्थः ॥ ततश्चालिङ्गनं
कृत्वा ॥ मंहतेन यन्निहन्मीत्यनेन मरणाद्युत्करणमात्रमुक्तं तदशुद्धं ॥ एवं च एकदर्भेन तन्मध्यमुल्लिखेत् ॥ ततश्च
त्रिः तं त्यजेत् ॥ इति देवलवचनं ॥ सव्योत्तराभ्यां पाणिभ्यां कुर्यादुल्लेखनादिकमिति ॥ यम वचनञ्च ॥ गोभिल
गृह्येऽपि ॥ तत्परिशिष्टविरोधात् शाख्यन्तरीयं उक्तं ॥ ततश्च गोभिलसूत्रे दर्भेषु पिण्डदानाभिधानात् ॥

रेखोपरि दर्भानास्तरेत् ॥ प्रागुक्तब्रह्मपुराणवचनेन देवताभ्यः इति त्रिः पठेत् । पिण्डान् दद्यात् अवनेनिज्येति अवनेनावनेजनं
दानपिण्डदानकरणामात्रमुक्तं ॥ तत्प्रकारस्तु अन्वष्टकीकगृह्ये तथा च गोभिलगृह्ये ॥ अथ पितॄणा आवाहयेत् ॥
इति गोभिलसूत्रे ॥ एत पितरः सौम्यास इति ॥ तथा सव्येनोदकपात्रं गृहीत्वा अपसव्यविपूर्वस्यां कर्ष्वां दर्भेषु निनाय
पितुर्नाम गृहीत्वा असावचने निक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा ॥ इति अपः उपस्पृश्य एवमेवेतरयोः ॥
तथा अपस…व्यवि दर्भेषु निदध्यात् ॥ पितुर्नाम गृहीत्वा असावेषते पिण्डो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा
इति अप उपस्पृश्य एवमेवेतरयोः ॥ तथा निधाय जपति अत्र पितरो मादयध्वं यथाभागमावृषायध्वं ॥ इति ॥
अप पर्यावृत्य पूरोच्छ्वासादभिपर्यावर्तमानः जपेदमीमदन्तः पितरो यथाभागमावृषायिषत ॥ इति ॥ अथाञ्ज
लिकृतो जपति ॥ नमो वः पितरो नमो ॥ इति गृहान् अवेक्षते ॥ गृहान्नः पितरो दत्तः इति पिण्डान् अवेक्षते
शद्धो वः पितरो देस्म इति सव्येन पाणिना सूत्रतन्तुं गृहीत्वा ॥ अपसव्यविपूर्वस्यां कर्ष्वां पिण्डे निदध्यात् ॥

३३ पितृर्नाम॰ गृहीत्वा असावेतत्ते ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा ॥ इति अपउपस्पृश्य एवमेवेतरयोः ॥ सव्येनैव पाणि
33 ना उदकपात्रं गृहीत्वा अपसव्यं पिण्डान् परिषिञ्चेत् ॥ ऊर्जं वहन्तीरिति मध्यमं तत्पत्नी पुत्रकामा अश्नीयात् ॥ आ
धत्त पितरो गर्भमिति अप्रस्कु पिण्डानाम् आसादयेत् ॥ प्रणीतं यतिनो ब्राह्मणान् वा भोजयेत् गवे वा दद्यात् ॥ इति एवामर्षः
यद्यपि श्रवणस्य काया पितृणा इति पित्रादि त्रिक मात्रपरं ॥ तथाप्यत्र त्रीं स्त्रीं पिण्डान् दद्यात् ॥ इत्यनेन षट्पुरुष
पिण्डदानानुरोधेन पितृणा इति षट्पुरुषपरं ॥ पूर्वोक्ता वाहनानन्तरं तिलविकरण श्रुतेरप्यत्रावाहनानन्तरं
तिलविकरणं ॥ उदकपात्रं तिलयुक्तं प्राग्जेव्यय दर्भेषु आपा मन्त्रपूर्ववत् ॥ अपः क्षिपेत्मूलदेशे
ऽयनेनिर्वन्ति निक्षिप्ताः ॥ द्वितीयस्य त्रितीयस्य मध्यदेशाग्रदेशयोः ॥ इत्याभ्युदयिक प्रकरणीय छन्दोगपरिशिष्ट
वचने आभ्युदयिके निक्षिलत्वाभिधानेन अन्यत्र सति लत्वाभिधाने प्रतीते पुष्पयुक्तस्य सपुष्पजलमादाय ॥
तेषां पृथक् पृथक् पृथक् ॥ अप्रदक्षिणेनेति न्यादेश नामान मन्त्रितमिति अक्षयपरायणात् ॥ अपसव्यं पितृतीर्थेन ॥

प्रदेशिन्यंगुष्ठयोरन्तरा अपसव्येनवि अपसव्यं वा तेन पितृभ्यो निदध्यातीति भट्टभाष्यच्छन्दोगभाष्यान्तरात् ॥ अपसव्यपदेन
पितृतीर्थमुच्यते ॥ अस्मात् देवलवचनात् तथा यमनुः ॥ प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणेत्यादि ॥ कर्तव्यमिति अन्वयश्च कापरं ॥
अत्र तु मराउलोपरि अस्माविति सम्बोधनविभक्तया सर्वत्र नामनिर्देशः ॥ इति भट्टभाष्यं ॥ एतदेव प्रागुक्तछन्दोगपरिशिष्टे ॥
आद्यमामंत्र्य पूर्ववदित्युक्तं ॥ आद्यपितरं पूर्ववत् गोत्रनामभिरामंत्र्य पितृनर्घ्यं प्रदापयेत् ॥ इति वत् ॥ पितरवलेजनं मूल
देशे पितामहप्रपितामहयोस्तु मध्यदेशाग्रदेशयोः द्वितीयं च तृतीयं च मध्यदेशाग्रदेशयोरिति छन्दोगपरिशिष्टात्
मातामहादीनामप्येवं ॥ मातामहप्रभृतीनस्तत्र तेषामेव वामत ॥ इति छन्दोगपरिशिष्टात् ॥ एतेषां पितॄणां वामत इति
आभ्युदयिकपरं ॥ अन्यत्रानुदग्दिशागतः ॥ कर्तुर्वामोपचारत्वात् ॥ अत एव पार्वणे ॥ अप्रदक्षिणं नेतिन्यादिति ॥ ब्रह्मपुराणे ॥
उक्तं ॥ ततश्च सतिलपुष्पोदकपात्रं वामहस्तात् दक्षिणहस्तेन वामान्वारब्धेन गृहीत्वा अमुकगोत्रं पितरममुकदेवशर्माणं
अवनेनिक्ष्व येचात्र त्वामनुयांश्च त्वमनु तस्मै ते स्वधा इति पितृतीर्थेन अवनेजयेत् ॥ अपउपस्पृश्य जलं स्पृष्ट्वा एवं पूर्वोक्त

३४ वीसापितामहप्रपितामहयोः ॥ पिण्डदानसूत्रं जलस्पर्शसूत्रश्च पूर्ववत् व्याख्येयं ॥ अत्र च गरुडपुराणोक्तं ॥ सर्वमन्नं मन्त्रो कराणां शेषं ॥
३५ श्राद्धशेषञ्च ॥ तथा च छन्दोगपरिशिष्टं ॥ यावदन्नमुपादाय हविषोऽर्भकमर्भकं ॥ करणासह सन्नीय पिण्डदानमुपक्रमेत् ॥ श्राद्ध
वीर्भविषोऽन्नादेः सकाशात् यावद्भक्ष्य मोदनव्यंजनादि ततोऽल्पाल्पं गृहीत्वा श्रैणं करणा चरुशेषेण सन्नीयमिश्रीकृत्य पिण्ड
दानमारभेदित्यर्थः ॥ एकस्मिन् पात्रेऽन्नं मध्वादिद्रव्येन मिश्रयेत् ॥ मध्वाज्यतिलसंयुक्तं सर्वव्यंजनसंयुतं ॥ उपमासाद्य
पिण्डं तु कुर्याद् बिल्वफलोपमं ॥ दद्यात् पितामहादिभ्यो दर्भमूलात् यथाक्रमम् ॥ इति ब्रह्मपुराणोक्त ॥ अत्र पितामहपदं
पितृपरं वचनान्तरैकवाक्यत्वात् ॥ अत्र पिण्डमात्रस्य विल्वफलोपमत्वश्रुतेः ॥ छन्दोगपरिशिष्टेच ॥ पित्रादीन् मातामहा
दीन् उपक्रम्य अवनेजनवत् पिण्डान् दत्वा बिल्वफलोपमानिति श्रुतेश्च ॥ सामगयजुर्वेदिनौ विल्वफलप्रमाणाकसम
पृथक्माता महान्नं च केचिदिच्छन्ति सत्तमाः ॥ त्रीन् पिण्डान् आनुपूर्वेन सांगुष्ठमुष्टिवर्द्धनान् ॥ इति वायुपुराणो
शास्यन्तरीयं ॥ ततः सपिण्डान् मधुघृताभ्यां सेचयेत् ॥ अभ्यज्य मधुसर्पिर्भ्यां तानवमेत् दर्भसञ्चये ॥ इति देवलवचनात् ॥

तान्पिण्डान् अवनेज्य निर्वपेत उत्तरं जेत् इति याज्ञवल्क्यात् ॥ ततो मधु मधु मधु इति सूत्रोक्तेन मधु प्रकाशकं मन्त्रयोग विशिष्टप्राप्तं ॥
मधुवातेति त्र्यृचत्रयं मधु मधु मधु च जपित्वा गृह्योक्तविधिना पिण्डं दद्यात् ॥ एवमेव प्रत्येकं जलस्पर्शपूर्वकं पितामहादि
पञ्चभ्यस्तादृश नेजनस्थाने पिण्डान् दद्यात् ॥ मूलमध्याग्रदेशेषु ईषत् शक्तांश्च निर्वपेत् ॥ इति छन्दोगपरिशिष्टवचनात्
ईषत् शक्तान् पिण्डान् निःसर्पः ॥ प्रदक्षिण्यम् अपजलेनाथ त्रिराचम्य हरिं स्मरेत् ॥ ततो दर्भैर्वा करं संमार्ज्य प्रदक्षिण्याचम्य हरिं स्मृत्वा
पुनरवनेनिज्यात्र पितर इति जपेत् ॥ इत्याह ब्रह्मपुराणं ॥ ततो दर्भेषु विधिवत् करं संमार्ज्य च करं ततः ॥ प्रदक्षिण्यम् जलेनाथ
त्रिराचम्य हरिं स्मरेत् ॥ अत्र छान्दोगपरं ॥ तेभ्यः संश्रवपात्रेभ्यो जलेनैव अवनेजनं दत्वा अत्र पितरश्च इति पठेच्चोदन
मुखस्थितः सन् ॥ चिन्तयंश्च पितॄन् स्तान् सर्वान् भास्वरमूर्तिकान् ॥ अमीमदन्त पितर इति पठन् अधियो ॥ पठेत् ॥ पश्चात्
प्रागद्यान् पिण्डान् उत्सर्पः ॥ यद्यपि करसंमार्जनादीनि पितृपक्षे उक्तानि तथापि पितृपार्वणे एव ॥ मातामहानामप्येवं दैवपूर्वं श्राद्धं
कुर्वीत ॥ इति गोभिलसूत्रेण पितृपक्षधर्मातिदेशात् एकोद्दिष्टादि श्राद्धे आवाहनादि निषेधात् उपपत्या पार्वणधर्मातिदेशात् ॥

३५
35
सर्वव्रतानि करसंमार्जनादीनि कार्य्याणि ॥ एवञ्च पार्वणे षट्पिण्डदानानन्तरं सामगेतराभ्युदयिकादौ नवपिण्डदानानन्तरञ्च तत्कौशौवतानि
कुर्य्यात् लाघवेन ॥ आग्नेयादिन्नयेषु प्रयोगादि तत्कालावत् ॥ किन्तु पितृपक्षे स्तृत दर्भेषु करमार्जनं ॥ लेपभागिनो वृद्धप्रपिता
महादीनां त्रीन् उद्दिश्य कर्त्तव्यं ॥ पुष्पपिण्डान् स्नात स्नातु प्रयतो विधिपूर्वकं ॥ तेषु दर्भेषु तं हस्तं निर्मृज्यात् लेपभागिनाम् ॥ इति ॥
लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ॥ पिण्डदः सप्तमस्तेषां सापिण्डं साप्तपौरुषं ॥ इति स्थानद्वयस्थ मनुवचनाभ्यां
सहैकवाक्यत्वात् ॥ तदपि दर्भाणां मूले दक्षिणाग्रेषु दर्भेषु पुष्पधूपसमन्वितं ॥ स्वपित्रे प्रथमं पिण्डं दद्यात् उत्सृष्टसन्निधौ
पितामहाय चैवाथ तत्पित्रे च ततः परं ॥ दर्भमूले लेपभुजः प्रीणयेल्लेपघर्षणैः ॥ पिण्डैर्मातामहांस्तद्वत् गन्धमाल्यादिसंयुतैः
प्रीणयित्वा द्विजाग्र्याणां दद्यादाचमनं ततः ॥ इति विष्णुपुराणात् ॥ नचैतत् पाठक्रमात् मातामहपिण्डदानात् पूर्वं लेप
घर्षणं इति वाच्यं ॥ दर्भेषु मधु मधु मधु इति प्रक्षराणुश्री मद्ता इति जपित्वा त्रींस्त्रीन् पिण्डदानं दद्यात् ॥ अवनेनिज्य इति
गोभिलसूत्रे दर्भेषु त्रींस्त्रीन् पिण्डान् अवनेनिज्य दद्यात् ॥ इति कात्यायनग्रन्थेच ॥ त्रींस्त्रीन् इति वीप्सादर्शनात् ॥

षट्पिण्डदानमध्ये पिण्डदानेतिकर्त्तव्यताव्यतिरिक्तानां निवृत्तिः प्रतीयते ॥ अत एव पितृदयिता श्राद्धकल्पतरुप्रभृतिभिः
षट्पिण्डदानानन्तरमेव करघर्षणं लिखितं ॥ विष्णुपुराणन्तु दर्भमूलविधायकं न तु मातामहपिण्डदानपूर्वकं करघर्ष
णं विधायकं ॥ अन्यथा प्रस्तवनेजनदानात् प्रागपि तदुक्तब्राह्मणाचमनापत्तेः ॥ पुष्पधूपसमन्वितपिण्डदानं शाखिभेदत
परमिति ॥ अतो न मातामहपक्षे पृथक्करमार्जनं ॥ एकोद्दिष्टे तु लेपभुजां सम्भवेऽपि निरुद्ध एव करमार्जणं ॥ प्रक्षालना
चमनहरिस्मरणानि कार्य्याणि साधारणप्रवृत्तः ॥ प्रागुक्तब्रह्मपुराणात् ॥ त्रिराचम्य इति ॥ अत्र श्राद्धचिन्तामणिः ॥ त्रिःपि
त्रिःपिबेत् इत्यादिनाभिहितमाचमनं ॥ तदत्र त्रिरावर्त्तते ॥ आचारप्रदीपेप्येवं इति तन्न त्रिराचमनेत् अपः पूर्वं द्विः प्रम
ज्यात्ततोमुखं ॥ इति मनुवचनेन त्रिराचमेत् ॥ द्विः परिमृजीत इति गोभिलैकवाक्यत्वात् ॥ किन्तु सकृत् ॥ तेभ्यः संश्रव
पात्रेभ्यः पूर्ववदवनेजनं ॥ संश्रवपात्रेभ्यः ॥ एतत् छन्दोगेतरपरं ॥ छन्दोगानान्तु पिण्डपात्रं प्रक्षालनेन पूर्ववदव
नेजयेत् ॥ तथा च छन्दोगपरिशिष्टं ॥ तत्पात्रप्रक्षालेन अथ पुनरपि अवनेजयेत् इति श्रुतेः ॥ अवनेजनानि देवतिवक्तव्यं

श्रां तसं

३६ ननु प्रसयने नि स्त्वति ब्रह्मपुराणे अवनेजनं दत्वा अत्र पितर श्चेति ॥ क्रमनिर्देशात् गोभिलगृह्ये ॥ अपि निधाय जपेत् अत्र ॥
३६ पितर इत्यत्र निधाय इत्यनेन पुनरवनेजनानन्तरं अत्र पितर इत्यस्य जपो बोध्यः तज्जपानन्तरं कर्त्तव्यमाह ॥ अत्र प[illegible]र्य्यावर्त्तेति
अत्रा प इत्यनेना प्रदक्षिणावर्त्तेन पर्य्यावृत्या गत्योदगन्तं दक्षिणान्तं ॥ तथा च ॥ छन्दोग परिशिष्टं ॥ वामावर्त्तनं केचित्तूदगन्तं
प्रचक्षते ॥ सव्यं गौतम शाण्डिल्यौ शाण्डिल्यायन एव च ॥ गोभिलगृह्ये ॥ वामावर्त्तेन यत्र गमनमुक्तं तदुत्तरादिक्पर्य्यन्तं
केचिद्वदन्ति ॥ गौतमादयः ॥ सव्यं दक्षिणां अत्रापि उदगन्तमिति यत्र दक्षिणामुखा नमिस्याकुः ॥ यद्यप्यत्र विकल्प
उक्तस्तथापि बहुवादिसम्मतत्वात् प्रागुक्तत्वाच्च उदङ्मुखीभूय यथाशक्ति श्वासं विधृत्य तेनैव पथा परावर्त्तमानः
पितॄन् भास्वर मूर्त्तिकान् परितुष्टान् ध्यायन् विधृत प्राणत्वेन व्यक्तजपस्याशक्यत्वात् उपांशुरूपेण अमीमदन्त
मंदन्त इति जपित्वा श्वासं सृजेत् ॥ तत्र व्यक्तीकृतं छन्दोग परिशिष्टेन ॥ आवृत्य प्राणान् संयम्य पितॄन्
ध्यायन् यथार्हतः ॥ जपन् तेनैव चावृत्य ततः प्राणान् विमोचयेत् ॥ अञ्जलीकृतः कृता अञ्जली रित्यर्थः ॥

३६

गृहान पत्नीं गृहान्पत्नीमि गृह्यान्तरात ।। गृहानि इति मंत्रेण पत्नीं पश्येत् यदुसर्पः ।। पिण्डदान दत्त पिण्डान् पूर्वस्य एक स्वामि
सञ्चयस्य कापरं ।। पिण्डो परिसूत्रदाने मन्त्र वाक्य पूर्वकत्ता माह ब्रह्मपुराणं ।। एतद्वः पितरो वास इति जल्पन् पृथक् पृथक्
अमुकामुकगोत्रै तत्र तुभ्यं वासः पठेत्ततः दद्यात् क्रमेण वासांसि स्वेतवस्त्र भवादृशाः ।। तेन वाम हस्तोद्धृत सूत्र तन्तुं
दक्षिणा हस्तेन वामान्तार स्कन्धे न गृहीत्वा एतद्वः पितरो वास इति पठित्वा गोत्राद्यभिलाप पूर्वक सुतरस्तन्यं पिण्डं दद्यात्
वासोदाना नन्तरं पिण्डपूजादिकमाह ब्रह्मपुराणं ।। पूजयित्वा तु पिण्ड स्थाने पितृणाश्च प्रणामेत् ऋतर्तुन् ।। ॐ वस
न्ताय नमस्तुभ्यं ग्रीष्मायच नमोनमः ।। वर्षाभ्यश्च शरत्संज्ञे ऋतवेच नमो नमः ।। सदा हेमन्ताय नमस्तुभ्यं नमस्ते
शिशिरायच ।। मास सम्वत्सरेभ्यश्च दिवसेभ्यो नमोनमः ।। एवञ्च पिण्ड पूजानन्तरं वसन्ताय इति पाठ दर्शनात्
अनिरुद्धभट्टोक्तं ।। अत्र पितर इति पाठान्तरं ।। वसन्ताय इत्यभिधानात् ।। प्रमाणात्सूत्र्यं ।। नचाचम्योदक परा
वस त्रिराचम्य शनै रसून् ।। षट्कृत्वस्तु श्च नमस्कृत्य पितृणां वच मन्त्रवत् ।। इति मनु वचनं प्रमाणं ।। उदङ्मुखो भूत्वा

यथाशक्ति प्राणायामत्रयं कृत्वा वसन्ताय इत्यादिना षट् कृत्वः श्व नमस्कुर्य्यात् ॥ तथैव कुल्लकभट्टेन तद्व्याख्यातं इति वाच्यं ॥ उदक पात्रस्य मंत्रवत्
उत्सर्जन यजुर्वेदिक ॥ ओं नमो वः पितरो रसाय नमो वः पितरो शोषाय नमो वः पितरो जीवाय नमो वः पितरो स्वधायै : नमो वः पितरो घोराय नमो वः
पितरो मन्यवे ॥ इति मंत्रेण ततश्च रस शोष ॥ जीव स्वधा घोर मन्युः शब्दाभिधेयान् वसन्त ग्रीष्म वर्षा शरद्धेमन्त शिशिर रूपान् ब्राह्मण सर्वस्वे
कृत्वा पृथः व्याख्यानात् ॥ षट् कृत्वः तु न पितृ रूपानेव नमस्कुर्य्यात् ॥ इत्येकस्मिन्नेवान्वये मनुवचनस्य सामंजस्य तरपरत्वात् ॥ गोभिलगृह्ये ॥
अत्र पितरो अमी मदन्त इति मन्त्रयो र्मध्ये कृत्वः तु नमस्कारस्य अश्रुतत्वात् ॥ तत् परिशिष्टेऽपि प्रागुक्त वामभावर्तनमिति श्राद्धस्य प्राणान्
संयम्य इति वचनाभ्यां अपि आवर्तनं विशेषउक्तः ॥ नतु वसन्ताय इत्यस्य पाठ ॥ इति ॥ तत श्छन्दोगानां क्वापि कृत्वः तु नमस्कारस्य अनुपदेशात्
पिण्डपूजानन्तरस्यानिपतनस्य पौराणिकस्य वसन्ताय इत्यस्य पाठो मैथिलसाधुस्को ग्राह्यः ॥ अस्मत् क्रम पक्षेऽपि मनुवचनस्य
अविरोधाच्च ॥ एतद्धि गृह्य क्रमात् अभिधानात् ॥ पूजने तु गन्धादि निक्षेपमाह ॥ छन्दोगपरिशिष्टं ॥ गन्धादि निक्षिपेत् तूष्णीं ततः
आचामयेत् द्विजान् ॥ अत्राचमनं पित्रादि ब्राह्मणानां प्रथमतः ॥ पश्चाद्धि श्वेदेवः ब्राह्मणानां कारयितव्यं ॥ तथाच ॥ विष्णु

धर्म्मान्तरे यैश्चदेवोपविष्टानां चरमं हस्तधावनं ॥ विसर्जनश्च निर्दिष्टं तेषु रक्षायतस्ततः ॥ अत्र हस्तधावनमाचमनं ॥ उदङ्मुखैवाचमन
मादौ दत्वा प्राङ्मुखैस्त्वाचमनं दद्यात् ॥ इति देवलवचनैकवाक्यत्वात् ॥ एतच्च कुशमयब्राह्मणे नास्ति ॥ अप्रयोगपरत्वात् ॥ अत्र ब्रह्म
पुराणे ॥ पिण्डस्य पितृपूजानन्तरं ॥ वसन्ताय इति मंत्रपाठ उक्तः ॥ किन्तु छन्दोगपरिशिष्टेन पिण्डस्य पितृपूजानन्तरं ब्राह्मणाचमन
दानमुक्तं ॥ यद्यप्यनयोः पौर्वापर्य्यं साक्षात्केनापि नोक्तं तथापि आचान्तेषु उदकपुष्पाणि अक्षतान्यक्षय्योदकञ्च दद्यात् ॥ इति ॥
गोभिलसूत्रे आचमनानन्तरं जलादिदानाव्यवधानाय वसन्ताय इत्यादि पाठानन्तरमाचमनं प्रतीयते ॥ अत्रोदकादिदाने ॥
विशेषमाह छन्दोगपरिशिष्टं ॥ अपात्रभूमौ मा सिञ्चेत् सुप्रोक्षितमस्त्विति ॥ शिवाः आपः सन्त्विति च युग्मानेवोदकानि च ॥ सौमनस्य
मस्त्विति च पुष्पदानमनन्तरं ॥ अरिष्टं चाक्षतं चास्त्विति अक्षतान्यपि दापयेत् ॥ अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते ॥ षष्ठ्यैव नित्यं
तत्कुर्यात् न चतुर्थ्या कदाचन ॥ अत्र भूमौ ब्राह्मणानां ततः प्राचमयेत् द्विजान् ॥ इत्यनेन उपस्थितत्वात् ॥ एतच्च भूमिसेचनं ॥
सकृदेव कर्त्तव्यं ॥ शिवा इत्यादिना जलदानन्तु दैवपूर्वं ब्राह्मणेषु कर्त्तव्यं ॥ ब्राह्मणसम्बन्धि प्राप्तानां कर्म्मणां तथा कर्त्तव्यताभिधानात् ॥

३८ 38 तथाचदेवस[illegible]लः॥ यत्रतुक्रियते कर्म्म पैतृकं ब्राह्मणान् प्रति ॥ तत्तत्सर्वं तत्र कर्त्तव्यं वैश्वदेवस्य पूर्वकं ॥ युग्मानेवं स्वाभ्युदयिके ॥ अन्यत्र तु
ब्राह्मणामात्रमासिञ्चेत ॥ अक्षता यवाः अक्षतास्तु यवाः प्रोक्ता भृष्टधाना भवन्ति ते ॥ इति भट्टभाष्यधृत वचनात् ॥ अर्घ्यदानं यत्
इत्यादि देशआभ्युदयिके ज्येष्ठोत्तरकरप्राप्त्यर्थः ॥ ननु तण्डुलानिरसार्थः ॥ अर्घ्योदकेचैव पिण्डदाने ऽवनेजने ॥ तन्त्रस्य
विनिवृत्तिः स्यात् स्वधावाचन एव च ॥ इति विधानात् ॥ एवं स्वधा पर्वे वेत्यनेन गोत्रनामभिरामन्त्र्य पितृणामर्घ्यं प्रदापयेत् ॥ इति
अनेन गोत्राद्यो प्राप्तयोः सम्बुद्धिः नान्दीमुखेभ्यश्च अक्षय्यमिदमस्त्विति संजपन् ॥ इति ब्रह्मपुराणोक्त शारव्यन्तरीय चतुर्थ्याश्च
पराहता ॥ एतच्च गोत्र स्मरान्तं सर्वत्र गोत्रस्य अक्षय्य कर्म्मणि इति आदि प्राप्तुक्तः ॥ गोभिल वचनत्रयेण अक्षय्य कर्म्म
णि गोत्रस्य इति ॥ पितुरिति शर्म्मणः ॥ इत्यभिधानात् ॥ उक्तं ॥ तत्तश्च तचर्च्चा कृता ॥ नेति पिण्ड पितृ यज्ञवत् उपचार इत्यति
देशेन प्राप्तस्य ॥ येचात्रत्वामनुयांश्च त्वमनु तस्मै ते स्वधेत्येव तुर्च्या युक्त मंत्रस्य निषेधः ॥ गोभिलः ॥ अघोराः पितरः सन्तु सन्तु इति
उक्ते गोत्रं नो वर्द्धतां इत्युक्ते स्वधानिनयनीयान् दर्भान् सपवित्रान् आस्तीर्य्य स्वधां वाचयिष्ये इति पृच्छति ॥ वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः

प्रपितामहेभ्यः मातामहेभ्यः प्रमातामहेभ्यः वृद्धः प्रमातामहेभ्यः स्वधोच्यतामिति अस्तुस्वधा इत्युक्ते स्वधानिनयने वारिधारां दद्यात् ॥
ऊर्जं वहन्तीरमृतं ॥ इत्यापो निषिञ्चतीति ॥ न च समस्येन ॥ अघोराः पितरः सन्तु इति दक्षिणां दिशं मनसा कांक्षन् पूर्वाभिमुखः पठेदिति ॥
कल्पप्रदीपः ॥ स्वाशीः प्रतिगृह्य याः विप्रेभ्यः प्राङ्मुखो बुधः ॥ अघोराः पितरः सन्तु शान्तिसूक्तः सन्तेः पुनः ॥ इति मत्स्यपुराण वचनेन
दक्षिणां दिशमाकांक्षन् याचेत इमान् वरान् पितॄणां ॥ इति मनु वचनैक वाक्यत्वात् ॥ अत्र प्रमाणमिति वाच्यं ॥ पिण्डपितृयज्ञवदुपचारः ॥
इति गोभिलसूत्रेण ॥ वैश्वदेव कर्मातिरिक्त दक्षिणामुखत्व प्रतीते ॥ दक्षिणां दिशमाकांक्षन् ॥ इति मनु वचनस्य तथार्थत्वे
प्रमाणाभावाच्च ॥ अतस्तव दक्षिणां दिशमाकांक्षन् वीक्षमाण ॥ इति टीकाकारैर्व्याख्यातं ॥ मनुनाकांक्षन् इत्यनन्तरं दातार इति
पठितं ॥ न त्वघोराः पितरः सन्तु इति ॥ मत्स्यपुराणे तु ॥ अक्षय्योदकदानानन्तरं ॥ न दत्वाशीरिति पठितं ॥ किन्तु ततः स्वधा
वाचनिकं विश्वेदेवेषु चोदकमित्यनन्तरं दत्वाशीरित्यर्द्धं पठित्वा अघोराः पितरः सन्तु इति उक्तः ॥ एतद्द्विजैर्गोत्रं तथा वर्द्धता
न्तास्तथा इत्युक्तः सन्तैः पुनः ॥ दातारो नोऽभिवर्द्धन्तां अन्नञ्चैवेत्युदीरयेत् ॥ इत्येव पठितं ॥ ततश्च शाखिविशेषे एतादृक्

कर्म्मणि प्राङ्मुखत्वं ॥ नतु गोभिलाद्युक्तकर्म्मणि ॥ अत एव पितृदयितादिभिराशीः प्रार्थने प्राङ्मुखत्वं नाभिहितं ॥ स्वधानिनयनीयानन्तरं स्वधा
वाचनमाम्नायात् नतु कृतप्रयोजनानन्तरात् ॥ तत्रश्च नारायणोपाध्यायः ॥ मूलपाणिः प्रभृतिभिर्य्यदर्घ्यसम्बन्धि पवित्रमात्रास्तरणमुक्तं
तत्प्रमाणशून्यं ॥ कुशान्तरास्तरणरहितत्वेन सूत्रविरुद्धश्च अन्यथा पिण्डैरेवार्घ्यसम्बन्धि पवित्रेण कथं न स्यात् ॥ इति ॥ अत
एव नारायणभट्टकल्लूकभट्टहरिशर्म्मप्रभृतिभिर्म्मैथिलैश्च सावित्रकुशान्तरास्तरणमुक्तं ॥ नार्घ्यसम्बन्धि पवित्रास्तरणमिति
स्वधानिनयनं स्वधावाचने कृते इति शेषः ॥ एतच्च प्रागुक्तसव्येन पाणिना उदकपात्रं गृहीत्वा इति गृह्योक्तवारिधारादानस्य
स्वधावाचनानन्तरविधायकं ॥ नतु वारिधारानन्तरविधायकं ॥ गौरवात् ॥ एतच्छक्तिकृतं छन्दोगपरिशिष्टे ॥ प्राग्वत्तासु
प्रति प्रोक्तः सर्वास्वेव हि जो तमैः ॥ पवित्रान्तरहितान् पिण्डान् सिक्त्वा उत्तानपात्रकृत् ॥ इति ॥ भट्टनारायणोऽपि ॥ सव्येनैव
पाणिना उदकं गृहीत्वा ॥ इति सूत्रस्य व्याख्याने एतच्च परिशोचनं ॥ आचम्य ब्राह्मणेभ्यः प्राचीनोदकेषु तथाग्रभूमौ मासिञ्चेत्
ससुप्रोक्षितमस्तु एवं स्वधावाचनं कृत्वा उत्तानपात्रं कृत्वा पवित्राणि च पिण्डानामुपरि दद्या कुर्य्यात् ॥ तथा च गोभिलेन ॥ ३९

प्रार्थनासु प्रती प्रोक्त इति व्याख्यानं कृतं मैथिलग्रन्थे एवं लिखितं स्वस्त्ययनवाचनानन्तरं ॥ यथा श्रुति गोभिलग्रन्थे दर्शनात् ॥ पितृदयितायां
यत्परिषेचनमुक्तं तद्देयं ॥ स्वस्त्ययनयोग परिशिष्टेन ॥ अक्षय्यस्वधा इत्यनन्तरं कर्तव्यताभिधानात् ॥ तदनन्तरं ग्रन्थोक्तं ॥ पत्नी भक्षनार्थं
पिण्डदानं इति न स्वधावाचनस्य प्राक् तथा सति पैतामह पिण्डे स्वधावाचनं न स्यात् इति बोध्यं ॥ अत्र विशेष ॥ शंखलिखितं
पत्नी वा मध्यमं पिण्डं प्राश्नीयात् आर्तवस्नातेति ॥ यम श्च ॥ ततश्च मध्यमं पिण्डं पत्नी प्राश्नाति वाग्यता ॥ इति मत्स्यपुराणे ॥ पत्नी
स्त्वमध्यमं पिण्डं प्रश्नीयाद्धि नयान्वितं ॥ आधत्त पितरो गर्भं मन्त्रः सन्तानवर्द्धनं ॥ एष मंत्र पौराणिकत्वात् सर्वसाधारणः ॥ अत्रोत्तान
पात्रकरणमिति यथा श्रुत दर्शनात् ॥ परिषेचन कर्त्तृ विशेषणात्तया भट्टेन यद्व्याख्यातं तदपि कथ्यते ॥ तत्रादौ गोभिलः ॥ श्राद्धसूत्रा
दर्शनात् ॥ तथा च ॥ प्रागुक्त परिषेचन सूत्रानन्तरं ॥ गोभिलः ॥ उत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्यात् ॥ इति ॥ एव
१० मेवाह रुद्रभट्टः ॥ प्रभृतिभि लिखितं ॥ दक्षिणायां पितृपूर्वकतामाह विष्णुपुराणे ॥ पिण्डैर्मातामहानुपक्रम्य पूजयित्वा
द्विजाग्र्याणां दद्यात् आचमनं ततः ॥ पितृभ्यः प्रथमं भक्त्या तन्मनस्को नरेश्वरः ॥ सुस्वधेत्याशिषा युक्तां दद्याच्छक्त्यार्थ्य दक्षिणां ॥

४० द्विजाग्र्याणां विश्वेदेवपितृमातामहपक्षत्रये श्राद्धभोक्तृणां ब्राह्मणानां मध्ये पितृभ्यः पितृपक्षब्राह्मणेभ्यः प्रथममाचमनं दक्षिणां च
40 दद्यात् ॥ अत एव ॥ वैश्वदेवोपविष्टानां चरमे हस्तधावनमित्युक्तं ॥ तथा च मनुः ॥ ब्राह्मणे दक्षिणा देया यत्र या परिकीर्त्तिता ॥
कर्म्मान्तेऽनुद्यमानायां पूर्णपात्रादिका भवेत् ॥ इति छन्दोगपरिशिष्टवचने ॥ दक्षिणादानस्य कर्म्मान्तताभिधानात् ॥ श्राद्ध
मुपक्रम्य दैवाद्यन्तं तदीहेत इति पित्राद्यन्तं न तत् कुर्वीत ॥ पित्राद्यन्तं तु कुर्वाणः क्षिप्रं नश्यति सान्वयः ॥ इति मत्स्यपुराणेऽपि ॥
श्राद्धकर्म्मणोऽपवर्गत्वेन प्राप्तस्य दक्षिणादानस्य दैवाद्यन्ततानुरोधेन पित्रादित्वमुक्तं ॥ श्राद्धविवेकोऽप्येवं ॥ मुखवधेति
शाख्यन्तरीयं ॥ अत्र दक्षिणाया नाचमनोत्तरत्वं ॥ किन्तु आचमनानन्तरं स्वस्त्युक्तौ तानान्तं कर्म्म विधाय कर्त्तव्यत्वं प्रागुक्तानां
पात्रं कृत्वा इति गोभिलसूत्राभिधानात् ॥ एतेन दक्षिणादानादेव पूर्वकत्वं मैथिलोक्तं हेयं ॥ आशीः प्रार्थनामाह गोभिलः ॥ विश्वेदेवाः
प्रीयन्तामिति दैवे वाच पित्र्ये ॥ दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति ॥ अन्नञ्च नो बहु भवेत्
अतिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥ अन्नं प्रकर्षतां नित्यं दाता शतं जीवतु ॥ इति

भ्यः संकल्पिताद्विजास्तेषामक्षयाः स्थिरस्त्व॥ एताः सत्या आशिषः सन्तु ॥ इत्याशिषः प्रतिगृह्य वाजे वाजे वत वाजिनो नो धनेषु
विप्रा अमृता ऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैरित्येतया विसृज्य मा वाजस्य प्रसवो जगम्यादेमे द्यावा
पृथिवी विश्वरूपे आमा गन्तां पितरा मातरा चा मा सोमो अमृतत्वाय गम्यात् ॥ इत्येतया अनुव्रज्य प्रदक्षिणीकृत्याभिवाद्य वामदेव्यं
गीत्वा प्रविशतीति ॥ दैवे दैवपक्षे अर्धोदुदन्मुखो विश्वे देवाः प्रियन्तामिति वाचयित्वा प्रियन्तामिति प्रतिवचनं गृहीत्वाऽऽदा
तार इत्यादिना एताः सत्या आशीषः सन्तु इत्यनेन प्रार्थयेत् ॥ वेदश्चाध्ययन अध्यापन तदर्थबोधः तदर्थानुष्ठानैर्वृद्धिर्मेति
याज्ञवल्क्यदीपिकायां ॥ व्याख्यानदर्शनात् ॥ वेद इत्येव पाठः न तु वेदाः ॥ ततः सन्त्विति प्रतिवचनादाशीषः ॥ प्रतिगृह्य देव
ताभ्यः इत्यस्यानेन परनीयत्वेन विसर्जनात् पूर्वं देवताभ्यः इत्यस्य रक्षोघ्नत्वात् विसर्जनात् पूर्वमेव पाठः ॥ त्रिः पठेत् पितृ
दयिता यामप्येवं ॥ ततो वाजे वाजे इत्यनेन कुशाग्रेण विसर्जयेत् ॥ ततस्ताननुगतः कृत्वा प्रतिग्रहमोदकपात्रिकां वाजे वाजे
इति जपन् कुशाग्रेण विसर्जयेत् ॥ बहिः प्रदक्षिणां कृत्वा पादानष्टावनुव्रजेत् ॥ इति मत्स्यपुराणवचनात् ॥ एतच्च विसर्जनं

४१ ब्राह्मणस्य पितॄणां मंत्रलिंगात् येषामावाहनं तेषामेव विसर्जनस्योक्तत्वात् अतएव वामावर्त्तनेन प्रदक्षिणीकरणमिति अभिधानात् ब्राह्मणस्य
५१ पितॄणामिति ॥ एतेनापात्रश्राद्धे विसर्जनाद्यभावोस्तीति मिश्रोक्तः हेयः ततोऽग्रामावे [illegible] सनेनानुव्रज्य प्रदक्षिणीकृत्याभिवादयेदथ
मय ब्राह्मणमादाय श्राद्धे श्राद्धीयद्रव्यं ब्राह्मणाय प्रदापयेत् ॥ तदभावे अग्नौ जले वा क्षिपेत् ॥ यद्येकं भोजयेत् श्राद्धे दैवं तत्र कथं
भवेत् ॥ श्लोकं श्लोकं समुद्धृत्य सर्वस्य प्रकृतस्य च ॥ देवतायतनं कृत्वा ततः श्राद्धं प्रकल्पयेत् ॥ तदन्नं प्रक्षिपेदग्नौ दद्याद्वा ब्रह्मचारिणे
इति वशिष्ठोक्तेः ॥ ब्राह्मणस्य च यद्देयं सान्वयस्य नचाग्निमः ॥ सकुल्ये तस्य निनयेत् तदभावे चास्य बन्धुषु ॥ यस्य [illegible] न सकुल्यः स्यात्कथं
सम्यक्स्निग्धा वा नुया ॥ दद्यात्स ज्ञातिशिष्येभ्यस्तदभावे प्सु वा क्षिपेत् ॥ इति दानकाण्डकल्पतरुधृत नारदवचनेन ब्राह्मणा
देयस्य ब्राह्मणाभावे जलप्रक्षेपोक्तेश्च ॥ ततो वामदेव्यं गीत्वा गाणाशक्तौ कयानश्चित्रा आभुवदूती सदावृधः सखा कया
सचिष्ठया वृता ॥ इत्यादि त्रिः पठेत् ॥ ततः कर्म्ममात्रप्राप्त अच्छिद्रावधारणं कुर्यात् ॥ तद्यथा ॥ सांतातपः पराशरो ॥
अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः ॥ प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समम् ॥ क्षितिदेवाः विप्राः ब्राह्मणाः

अग्निष्टोमफलैरिति स्मृतिः ॥ विष्णुः ॥ यद्वा ब्राह्मणास्तुष्टा नमस्यन्ति ॥ तद्देवताः कर्म्मभिराचरन्ति तुष्टेषु तुष्टाः सततं भवन्ति
प्रत्यक्षदेवेषु परोक्षदेवाः ॥ ततः सांगार्थं विष्णुं स्मरेत् ॥ प्रमादात् कुर्वतां कर्म्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः सम्पू-
र्णं स्यादिति श्रुतिः ॥ तद्विष्णोरिति मंत्रेण स्नापयेदप्सु पुनः पुनः ॥ गायत्रीं वैष्णवीं ह्येषा विष्णोः संस्मरणाय वै ॥ तदनन्तरं
दक्षिणहस्तेन दीपप्रच्छादनं न माकृद्देवलः ॥ निर्वर्त्ते पितृमेधे तु दीपं प्रच्छाद्य पाणिना ॥ आचम्य पाणिं प्रक्षाल्य ज्ञातीन्
शेषेण भोजयेत् ॥ पाणिः प्रक्षाल्य आचम्य इति अन्वयः ॥ ततो ज्ञातिषु भुक्तेषु स्वान् भृत्यानपि भोजयेत् ॥ पश्चात्
स्वयं च पत्नी च श्राद्धशेषमुदाहरेत् ॥ निर्वर्त्ते वामदेव्यगानान्ते प्रच्छाद्य आच्छाद्य इति पारिजाते ॥ अतो न निर्वापनं
दीपनिर्वापनात् पुंसः कुष्माण्डच्छेदनात् स्त्रियः ॥ अचिरेणैव कालेन पुत्रनाशो भवेद् ध्रुवं ॥ इति तच्च वर्द्धमानध्वतात्
दीपनिर्वापकोऽन्धः स्यादिति वचनाच्च ॥ उदाहरेदभ्यवहरेत् ॥ एवं रागप्राप्तत्वात् न विधिः ॥ किन्तु नियमः ॥ तथाच
श्राद्धशेषमुपक्रम्य आपस्तम्बः सर्वस्मात् ग्रासावरार्द्धं मश्नीयादिति ॥ ग्रास एव अवरार्द्धं निकृष्टा कोटिर्यस्य तत् ॥

तथा अनियमस्ते सर्वस्मादिति श्राद्धशेष विशेषणं व्यर्थं स्यात् ॥ यदुक्तं शिवरहस्ये ॥ श्राद्धं कृत्वा तु यः शेषं नाश्नाति मन्दधीः ॥ लोभान्मोहात्
भयाद्वापि तस्य तद्धि फलं भवेत् । लोभात् द्रव्याभावस्य इति शेषः ॥ अत्र लोभादि समभिव्याहारात् वैधोपवासादेर्न नियमः ॥ अत्र आश्व
माकुः च राहुः विष्णुधर्मोत्तरे कात्यायनः ॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् ॥ उपवासं तदा कुर्यात् आघ्राय पितृसेवितं ॥ एकंच
यत् किञ्चित् पच्यते गेहे भक्ष्यं भोज्यमथापि वा ॥ अनिवेद्य न भुञ्जीत पिण्डमूले कथंचन ॥ इति शंखोक्तं ॥ तच्छेषेतर भोजनं व्यावर्त
कं ॥ किन्तु यत् किञ्चिदिति श्राद्धार्थत्वेन विशेषणीयं अन्यथा श्राद्ध प्रतिसिद्धद्रव्याणां भक्ष्यत्वं न स्यात् ॥ तेन श्राद्धार्थं यत्कृतं तत्र दत्वा
न भोक्तव्यमिति तस्यार्थः ॥ तथा च शातातपः ॥ श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये तु विह्वलाः ॥ पतन्ति नरके घोरे लुप्तपिण्डो
दकक्रियाः ॥ विह्वलाः लोलुपाः ॥ विष्णुपुराणे ॥ वर्ज्यानि कुर्वता श्राद्धं कोपोऽध्वगमनं त्वरा ॥ श्रीकृष्णपत्रराजेन्द्र त्रयमेतन्न
शस्यते ॥ कामधेनौ ॥ भुक्ता श्च कलहश्चैव स्वापं सक्षां दिवा शयं ॥ श्राद्धकर्ता च भोक्ता च पुनर्भुक्तिं च वर्जयेत् ॥ रात्रि
मार्तण्डे ॥ पुनर्भोजनमध्वानं भुक्त्वाध्ययनमैथुनं ॥ दानं प्रतिग्रहं संध्यां श्राद्धं कृत्वा वर्जयेत् ॥ नव्यवर्द्धमानधृता

स्मृतिः ॥ पुनर्भोजनमध्वानं भाराध्ययनमैथुनं ॥ दानं सन्ध्यां पुनःस्नानं श्राद्धं कृत्वा विवर्जयेत् ॥ अध्वानमध्वगमनं क्रोशात्परं नगच्छं
अध्वगमनमाक्रोशपूरणमिति हारीत वचनात् ॥ मैथुनञ्च ऋतुकालीनमपि न कुर्य्यात् ॥ तथाच श्राद्धान्तरं शङ्खलिखितौ ॥ ऋतुस्नातां
तदहोरात्रं परिहरेत् ॥ इति ॥ दानं याचितान्नाद्यतिरिक्तस्य ॥ वन्दिभ्यश्चैव मर्थिभ्योप्यन्नार्थिभ्योऽन्नमर्थितः ॥ यदि तत्र नैस्यात्तु
विफलत्वं शक्तितो भवेत् ॥ वन्दिनो वीर्य्यवत्तो तारः अप्रार्थितः सन् एभ्योऽन्नं यदि न दद्यात् तत् श्राद्धं विफलं भवेदिसर्व्वः ॥ सूताः पौरा
णिकाः प्रोक्ता मागधा वंशशंसकाः ॥ वन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ इत्युक्तेः ॥ याचितान्नाद्यतिरिक्तस्य दाननिषेध
परत्वे सामान्यतो निषेधस्य सङ्कोचः स्यादिति अतोऽर्थान्तरमाह ॥ इत्यन्यच्चेति ॥ इत्यञ्च श्राद्धे तत्र दाननिषेधात् श्राद्धे
वन्दिप्रभृतिभ्यो दानाकरणे निन्दाश्रवणाच्च श्राद्धात् पूर्व्वम्वा तदर्थिभ्यो न्याय्यादिकमुत्सृजेत् ॥ तथाच वायुपुराणे ॥ अध्व
नीनो भवेदश्वः पुनर्भोक्ता च वायसः ॥ होमकृन्नेत्ररोगी स्यात् पाठादायुः प्रहीयते ॥ दानं निष्फलतामेति प्रतिग्राही
दरिद्रतां ॥ कर्म्मकृज्जायते दासो मैथुनी शूकरो भवेत् ॥ कर्म्मात्र भारोद्वहनादिकं ॥ तथाच मत्स्यपुराणवचनात् ॥

रतिशक्तिः स्त्रियः कान्ता भोज्यं भोजनशक्तिता ॥ दानशक्तिः सविभवा रूपमारोग्य सम्पदः ॥ श्राद्धपुष्पमिदं प्रोक्तं फलं ब्रह्मसमागमः ॥
पुष्पं तद्धत श्रूयस्व फलं तं तद्धतमहत् ॥ श्राद्धान्तरं बलिं वैश्वदेवमाह ॥ भविष्यत्पुराणे ॥ कृत्वा श्राद्धं महाबाहो ब्राह्मणांश्च विसृज्य तत्
वैश्वदेवादिकं कर्म्म ततः कुर्य्यान्नराधिपः ॥ पार्वणान्तरं नित्यश्राद्धे विकल्पमुक्तं मार्कण्डेयपुराणे ॥ नित्यक्रियां पितॄणांतु
केचिदिच्छन्ति सत्तमाः ॥ न पितॄणां तथैवान्ये शेषं पूर्ववदाचरेत् ॥ पार्वणेनैव पितॄणां तृप्तेर्जातत्वात् प्रत्यवायस्य परिहारस्य
सिद्धत्वात् पूर्वं पितॄणामिति ॥ पुनः पितॄणां ग्रहणं सनकादीनामन्तोत्सर्गाद्यनुस्मारणार्थं ॥ सनकादीनां तृप्तेः पार्वणो
अजातत्वात् ॥ इति विवेकः ॥ न पितॄणामित्यावश्यकत्वनिषेधपरमिति व्यवस्था ॥ नित्यश्राद्धप्रमाणप्रयोगौ आह्निक
तत्वे अनुसन्धेयौ ॥ अथ जीवत्पितृकश्राद्धं ॥ पित्रादित्रिषु जीवत्सु श्राद्धं न कर्तव्यं ॥ अत्र येषां पुरुषाणां मध्ये
यो यो जीवति तं तं विहाय पुरुषान्तरमादाय श्राद्धं कर्तव्यं ॥ इति ॥ मातामहादित्रिषु जीवत्सु पित्रादित्रिकश्राद्ध
मात्रं कर्तव्यं ॥ तथा च विष्णुः ॥ पितरि जीवति यः श्राद्धं कुर्य्यात् येषां पिता कुर्य्यात् पितरि पितामहे च जीवति येषां॰

पितामहः कुर्य्यात् तेषां कुर्य्यात् ॥ तेन त्रयाणां मध्ये पित्रे वस्तो न तु पितामह प्रपितामहौ द्वाभ्यां वृद्ध प्रपितामहाभ्यां पितामह पितामहाय
इति कर्तुं वृद्ध प्रपितामहाय इत्यर्थः ॥ पितामहः प्रेतः स्यादिति सावधारणो निर्देश त्रिषु जीवत्सु नैव कुर्य्यात् ॥ यस्य पिता प्रेतः
स्यात् स तस्मै पिण्डं निधाय प्रपितामहात् परं द्वाभ्यां दद्यात् ॥ यस्य पिता प्रेतः स्यात् स पित्रे पिण्डं निधाय प्रपितामहात् परं
द्वाभ्यां दद्यात् यस्य पितामह पितरश्च प्रेतौ स्यातां स ताभ्यां पिण्डं दत्वा पितामह पितामहाय दद्यात् ॥ यस्य पितामह प्रेतः
स्यात् स तस्मै पिण्डं निधाय पितामहात् परं द्वाभ्यां दद्यात् ॥ यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिण्डं निधाय
पितामहात् परं द्वाभ्यां दद्यात् ॥ मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः ॥ इति त्रिषु पितृ पितामह प्रपितामहेषु
पिता प्रेत इति शावधारणो निर्देशः ॥ तेन त्रयाणां मध्ये पित्रे वस्तो न तु पितामह प्रपितामहौ द्वाभ्यां वृद्ध प्रपितामह
प्रति वृद्ध प्रपितामहाभ्यां पितामह पितामहाय इति कर्तव्यं ॥ कर्तुं वृद्धः प्रपितामहाय इत्यर्थः ॥ पितामह प्रेतः स्यात्
इति सावधारणो निर्देशः ॥ अर्थात् पितृ प्रपितामहौ नस्तौ द्वाभ्यां वृद्ध प्रपितामह प्रति वृद्धः प्रपितामहाभ्यां एतात् पक्षस्य पितृ

४४ जीवद्दशायां श्राद्धकर्त्तव्यत्वमुक्तं । इदानीमिति ॥ इदानीं पार्वणे तथाचरणात् आभ्युदयिके कर्म्माङ्ग श्राद्धे व्यवहारः ॥ पिता प्रपितामहश्च प्रेतास्त्रिस्तेन
५५ पितामहो जीवति इति अवगम्यते ॥ द्वाभ्यां प्रपितामह वृद्ध प्रपितामहाभ्यां एवं मातामहपक्षेऽपि विशेषस्तु पितरि मृते मातामहादित्रयाणां
अन्यतमस्य जीवनेऽपि पार्वणाचारः ॥ अथ पार्वणस्य प्रतिमासकर्त्तव्यत्वं अधुना कथयति ॥ अत्र मासकरणे उपपुराणं ॥ कार्य्यं श्राद्धममा
वस्यां मासी मासि उडुपक्षये ॥ यन्मासि मासि कार्य्यं पितॄणामुपक्रम्य मासि मासि वोऽशनमिति श्रुतेः ॥ तच्च श्राद्धं चन्द्रक्षये अमावस्यायां
अतिप्रसक्तः ॥ अपरपक्षे यदहः सम्पद्यते अमावास्यायां विशेषेण इति मनुनिगमवचनेनैकवाक्यत्वात् ॥ अन्यत्रापि श्राद्धमाह
गौतमः ॥ अथ श्राद्धममावस्यायां पितृभ्यो दद्यात् पञ्चमी प्रभृति वा परपक्षस्य यथा श्राद्धं सर्वस्मिन् वा द्रव्यदेश ब्राह्मण सन्निधौ
वा काल नियमः ॥ शक्तितः इति ॥ योऽयमवास्यादि काल नियमः स शक्तस्य ॥ सति द्रव्यादि अरोगिनो बोद्धव्यः ॥ इति श्राद्धविवेकः ॥
तत्र च चतुर्दशीवर्जनमाह मनुः ॥ कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं ॥ श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥ इति बोध्यः
यत्तु अमावस्याष्टका कृष्णपक्ष पञ्चदशी च चतुर्थ्यभिधाय एतद्यानुपनीतोऽपि इत्याद्युक्तं तत् प्रागेव व्याख्यातं एवमन्यानि वचनानि ॥

व्याख्येयानि ॥ अथ मलमासे सपिण्डनोत्तर श्राद्धनिषेधः ॥ तत्रादौ लघुहारीतः ॥ सपिण्डकरणादूर्ध्वं यत्किञ्चित् श्राद्धिकं भवेत् ॥ इष्टं वाप्यथ वापूर्तं
तन्न कुर्यान्मलिम्लुचे ॥ श्राद्धमेव श्राद्धिकं स्वार्थे च णिनि श्राद्धविवेकः ॥ इष्टं जागादि पूर्तं खातादि ॥ ज्योतिषे रविना लंघितो मासश्चान्द्रख्यातो म[illegible]लिम्लुचः
तत्र यद्विहितं कर्म उत्तरे मासि कारयेत् ॥ इति चान्द्र शुक्लप्रतिपदादि दर्शान्तः ॥ चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः ॥ एकराशौ रविर्यावत्
कालं मासः स भास्करः ॥ इति वचनात् ॥ स मासो रविना लंघितस्तत्र राश्यन्तर संयोगाभावे नातिक्रान्तो मलिम्लुचो भवति ॥ तथा ऽसंक्रान्त
मासो ऽधिमासः स्फुटं स्यात् ॥ द्विसंक्रान्तमासः क्षयाख्यः कदाचिदिति ॥ तत्र इति वैशाखादिलेन यद्विहितं कर्तुमुचितं तत्प्रकृत
वैशाखादौ कर्तव्यं ॥ अत्र सपिण्डिकरणानन्तरस्य कर्तव्यतामाह लघुहारीतः ॥ असंक्रान्ते ऽपि कर्तव्यं मासिकं प्रथमं द्विजैः ॥ तथैव मासिकं
पूर्वं सपिण्डिकरणं तथा ॥ तथैवासंक्रा[illegible]न्ते एव सपिण्डिकरणात् पूर्वं मासिकं कर्तव्यं ॥ सपिण्डिकरणमिति पञ्चम्यर्थे प्रथमापूर्वपदं
सपिण्डनोत्तर पार्वणार्थं मासिक श्राद्धनिषेधार्थं ॥ यत्तु जातकर्मणि यत् श्राद्धं दर्शश्राद्धं तथैव च ॥ मलमासेपि तत्कार्यं व्यासस्य वचनं
यथा ॥ इति तत्र पिण्डपितृयज्ञाख्य श्राद्धपरं ॥ इदं ग्नीयत्र कुर्यात् मासादि सम्प्रकीर्तितः ॥ अग्निष्टोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ

४५ तमतिक्रम्य रविर्यदा गच्छेत् कथञ्चन ॥ आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृतः ॥ इति लघुहारीतवचनाभ्याम् एकवाक्यत्वात् ॥ शुक्ल प्रति
45 पदि इन्द्राग्नियागः कृष्णप्रतिपदि अग्निष्टोमादियागः ॥ एतौ दर्शपौर्णमास्यान्तर्गतौ पितृविशिष्टसोमदेवताग्नौ करणहोमः ॥ पिण्ड
पितृयज्ञांगभूतो दर्शे विहितः ॥ मासादिरिति मध्ये इति समासौ इति कीर्तनात् शुक्लप्रतिपदादि दर्शान्तो मास सन्दस्य अर्थः ॥ इति
तत्र पिण्डपितृयज्ञः शास्त्रएतं श्राद्धएतं मासमतिक्रम्य रविर्यदा गच्छेत् राश्यन्तर संयोगमीयात् ॥ तदाद्यो मलिम्लुच द्वितीयः प्रकृतशुद्धः
कर्म्मार्हः इति यावत् ॥ ततश्च एकवाक्यत्वानुरोधात् मलमासेऽपि लघुहारीत वचन बोधित पिण्डपितृयज्ञश्राद्धमात्र विधायकम् ॥ इति
व्यासस्य वचनम् न तु अन्वाहार्य्यम् पार्वणश्राद्ध विधायकम् तस्य प्रागुक्तेन वक्ष्यमाण वचनाभ्यां च निषेधात् ॥ प्रपञ्चितन्मे मलमास
तत्वे तथा च समयप्रकाशे कूर्म्मः ॥ सम्वत्सरातिरेको वै मासो यः स्यात् त्रयोदशः ॥ तस्मिन् त्रयोदशे श्राद्धं न कुर्यात् इन्दुसंक्षये ॥ सम्वत्
सरप्रदीपे ॥ एकराशौ स्थिते सूर्ये यदि दर्शद्वयम् भवेत् ॥ दर्शश्राद्धं तदैव स्यात् न परत्र मलिम्लुचे ॥ अथ प्रतिमासाशक्तस्य कर्तव्य
माह मत्स्यपुराणे ॥ अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् ॥ कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षेषु सर्वदा ॥ वत्सरमध्ये त्रिः श्राद्धं कुर्य्यात्

अत्र सौरेणा वाक्यं पुस्तेखनविधानात् श्राद्धे त्र्याशक्तस्य विधानम् ॥ तथाच भविष्यत्पुराणम् ॥ हंसे कर्त्री तु कन्यास्थे शके नापि गृहे वसन्
पञ्चम्या उत्तरे दद्यात् उभयोर्वशयोर्नराम् ॥ कन्यास्थे रवौ श्राद्धं यो न कुर्याद् गृहाश्रमी ॥ ताम्रस्य धनं पुत्राः पितृनिश्वासपीडनात् ॥ हंसे
सूर्ये नराणामिव नराणाम् पितृमातृकुलस्येद मवश्यम् परिशोध्यम् उत्सर्पेः ॥ अत्रापि अशक्तौ तुलार्के यथा ब्रह्मपुराणम् ॥ यावच्च कन्या
तुलयो क्रमादास्ते दिवाकरः ॥ तावत् श्राद्धस्य कालस्यात् शून्यं प्रेतपुरम् तदा ॥ यावच्च कन्या तुलयोः रविरास्ते तावत् क्रमात् श्राद्धस्य
कालः ॥ ततश्च कन्यायाश्चार्का करणो तुलार्के कर्तव्यं अन्यथा रविस्थिति क्रमस्य प्राप्तहेन क्रमादिति अनुमदापत्तेः तुलार्केऽपि अमावस्यायाम्
अति प्रशस्तः तदाह भविष्यपुराणं ॥ येयम् दीपान्विता राजन् ख्याता पञ्चदशी भुवि ॥ तस्याम् दद्यात् नचेद तुम्यं पितॄणां सैव महालया
पञ्चदशी अमावास्या अमावास्या मधिकस ॥ दीपमालाश्च कर्तव्या शक्त्या देवगृहेषु च ॥ रथ्यापन स्मशानेषु नदी पर्वतसानुषु ॥
इति ब्रह्मपुराणोक्त नानास्थाने दीपदानेन दीपान्विता ख्याता इति विशेषणात् ॥ एकोऽपवादीपवरश्वदेय इत्यादि पुराणोक्तेः ॥
विष्णु सम्प्रदानक दीपदाने विहिता पौर्णमासी नगाख्या इति ॥ नभसस्यापरे पक्षे यत्र कन्यां व्रजेद्रविः । महालय [illegible]स्यात् तत्सूर्याय तत्पैवच ॥

४८ अथाश्वयुक्कृष्णपक्षः ॥ तत्रादौ ब्रह्मपुराणम् ॥ आश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने ॥ त्रिभागहीनमपक्षम्वा त्रिभागन्त्वर्द्धमेव वा ॥ तस्मिन्
५८ पितरश्चैति कृत्वा मासि यो नरः ॥ श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते ॥ आश्वयुक्पक्षो प्रोष्ठपद्युर्द्ध्वकृष्णपक्षे ॥ अत्र आश्वयुगाश्विनी
तद्युक्तपौर्णमासी तिथिसम्बन्धात् लक्षणया मासे ऽश्वयुक्पदः प्रयोगः ॥ ततश्च निबन्धनादौ आश्विने मासि कृष्णपक्ष इत्येव
स्वारसिकपद प्रयोग कर्तव्यः ॥ स्वारसिक प्रयोगे लक्षणाया अप्रयोगात् ॥ दिने दिने तिथौ तिथौ न त्वेकेन दिवसश्चान्द्रमीने प्रकीर्तितः
इति विष्णुधर्मोत्तरानुसारेण गौणचान्द्रस्य आश्विनस्यापि चान्द्रत्वेन दिनस्यापि तत्पर्यायत्वात् ॥ अत्र यदि सकृत्करणमात्रम्
विधेयम् तदा आश्वयुक्कृष्णपक्ष इत्येव ब्रूयात् ॥ ततश्च दिन इत्यभिधानेन आश्वयुक्कृष्णपक्षीय तिथिनिमित्तत्वे विनिगमना
विरहेन एकदिनपदेनैव प्रतितिथिनिमित्तत्वप्राप्तौ पुनर्द्दिनपदम् कृष्णपक्षश्राद्धप्रतिसिद्धः ॥ चतुर्दशीग्रहणार्थमवी
प्सा यावत्तिथेलाभात् अतएव पक्षस्य निर्णयामृतकानमाधवीययोः काष्णाजिनिः ॥ नभस्यस्यापरे पक्षे श्रा[stain] कुर्याद्
दिने दिने ॥ नैव नन्दादि वर्ज्यं स्यात् नैव वर्ज्या चतुर्दशी ॥ नभस्यस्य मुख्यचान्द्रेण भाद्रस्य श्राद्धविवेके ऽपि दिने दिनेति

वीप्सा पञ्चदशी श्राद्धार्थे इत्युक्तं त्रिभागहीनषष्ठ्यादिः ॥ त्रिभागरूपकाल इत्यादि वचनं विलु धर्मान्तरो ऽन्तरोदयनात् श्राद्धे श्रेष्ठं स्याद्दक्षिणायनं
चातुर्मास्यञ्च तत्रापि प्रसुप्ते केशवे हितम् ॥ प्रोष्ठपद्या परो पक्षस्तत्रापि च विशेषतः ॥ मन्वस्पूर्ड्डश्च तत्रापि दशम्पुद्धमतो ऽप्यति ॥
मघायुक्ता च तत्रापि सा प्रशस्ता राजन् त्रयोदशी ॥ अर्द्धम् त्रिभागस्य अर्द्धम् ॥ त्रयोदश्यादिनक्ता पक्षस्यार्द्धं न षष्ठ्यादि ॥ तथात्वे त्रिभाग
कालो ऽर्द्धमेवेति नियमानुपपत्तेः ॥ उत्तरोत्तरं लघुकालोपदेशात् ॥ सन्निधानाच्च ॥ आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ॥
यो वै श्राद्धं नरः कुर्यात् एकस्मिन्नपि वासरे ॥ तस्य संवत्सरं यावत् तृप्ताश्च पितरो दिवि ॥ नभो वाथ नभस्यो वा मलमासो
यदा भवेत् ॥ सप्तमः पितृपक्षस्यादन्यत्रैव तु पञ्चमः ॥ इति नागरखण्डे एकश्राद्धमुक्तम् ॥ तच्च कन्यास्थरवि निमित्तक श्राद्धपरम्
प्रागुक्तम् हंसे वर्षासु इत्यादि वचने कृताकृतत्वात् ॥ ननु अश्वयुक् कृष्णापक्षीय श्राद्धस्य सकृद्विधायकम् ॥ अर्द्धमेवेति नियम
भंगापत्तेः ॥ आषाढ्याः पञ्चमे पक्षे इति तु न सकृत् श्राद्धविधायकम् ॥ किन्तु कन्यास्थ श्राद्धस्यैव तत्तत्सम्बद्धे वर्षं तत्प्रवि
धायकम् ॥ एवञ्च मलमासे भाद्रकृष्णापक्षस्य पितृपक्षत्वाभावात् ॥ तत्रच तस्य कर्मान्तरे तत् श्राद्धस्य अश्वयुक् कृष्णपक्षे

४७ पात्तिलेऽपि न पार्वण विधिना कर्त्तव्यम् ॥ किन्तु एकोद्दिष्टम् अमावस्या प्रेतपक्षान्यतरम् तस्यैव कर्त्तव्यम् ॥ अमावस्यां क्षयो यस्य
५७ प्रेतपक्षेऽथ वा भवेत् ॥ सपिण्डीकरणादूर्द्धम् तस्योक्तः पार्वणो विधिः ॥ इति शंख वचनेन पार्वीन विधानात् ॥ एवम् प्रेतपक्षेऽस्तस्य
पार्वणविधिना सांवत्सरिक श्राद्धे कृते न माता महादि श्राद्धाय पुनः पार्वणारम्भः ॥ पितरो यत्र पूज्यन्ते तत्र माता महा ध्रुवम् ॥ इति
वृहस्पति वचनेन मातामहानामप्येवम् श्राद्धम् कुर्य्याद्विचक्षणः ॥ इत्यनेन च ॥ पितृश्राद्धाधीन प्रवृत्तेः ॥ एवमविभक्त सापत्न्य भ्रात्रो
रेकेन श्राद्धे कृते अपरेण माता मह श्राद्धार्थम् पुनः पार्वणम् न करणीयम् ॥ अतएव द्वैतनिर्णये ॥ सांग्रीकौर सेन ॥ पितुः क्षया
हे पित्रादि त्रिकस्य श्राद्धे कृते तत्र माता महानाम् श्राद्धार्थं पार्वणारम्भः ॥ वाजिनयत्तत्स्य अप्रयोजनकत्वात् ॥ इत्युक्तम्
एवमेव मघा त्रयोदश्याम् पुत्रवता पितृरहिता श्राद्धे कृते न पित्राद्यनुरोधात् अश्वयुक्कृष्णपक्षीय श्राद्धानन्तरम् करणीयम् ॥
तेनैव प्रधान निर्वाहात् ॥ अथ मघा त्रयोदशी श्राद्धम् ॥ तत्रैव शंखः ॥ प्रोष्ठपद्यामतीतायाम् मघायुक्तां त्रयोदशीम्
प्राप्य श्राद्धं हि कर्त्तव्यम् मधुना पायसेन च ॥ तस्य नित्यत्वमाह विष्णुधर्म्मोत्तरे ॥ प्रोष्ठपद्यामतीतायाम् तथा कृष्णा त्रयोदशीम् ॥

एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः॥ शातातपः॥ पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च। तस्माद्दद्यात् सदा युक्तो विद्वत्सु
ब्राह्मणेषु च॥ अत्र सदेति श्रुते रन्नमात्रस्य श्रुतेश्च यत्किञ्चित् मधुना मिश्रितम् इति मनुवचने यत्किञ्चिदित्यभिधानाच्च
शंखोक्त मधुपायसः फलातिशयार्थः॥ तथा च विष्णुधर्मोत्तरम्॥ मघासु कार्यं तत्रैव शस्ता राजंस्त्रयोदशी॥ तत्राक्षयम्
भवेत् श्राद्धम् मधुना पायसेन च॥ एवञ्चास्य पुत्रवतोऽप्यत्राधिकारः॥ तत्र पुत्रवतः पिण्डदाननिषेधमाह देवीपुराणम्॥
भौजंगीमतिथिमासाद्य यावच्चन्द्रार्कसंगमम्॥ तत्रापि महती पूजा कर्तव्या पितृदैवते॥ ऋक्षे पिण्डप्रदानन्तु ज्येष्ठपुत्री विवर्जयेत्
भौजंगी पञ्चमी चन्द्रार्कसंगमोऽप्यमावस्या पितृदैवतेऋक्षे मघानक्षत्रे॥ मघायाम् पिण्डदानेन ज्येष्ठपुत्रो विनश्यति॥
इति पिण्डनिषेधे॥ विशेषमाह शातातपः॥ पिण्डनिर्वापरहितम् यत्तु श्राद्धम् विधीयते॥ स्वधावचनलोपोऽत्र विकरस्तु
न लुप्यते॥ अप्रसव्यं दक्षिणाशान्ति सौमनस्यं स्वस्यः यमस्तथाक्षिति॥ अत्र विभक्तानाम् मघात्रयोदश्याम् अपि पृथक् श्राद्ध
माह श्राद्धचिन्तामणौ स्मृतिः॥ विभक्ता अविभक्ता वा कुर्युः श्राद्धमदैविकम्॥ मघासु च तथान्यत्र नाधिकारः पृथक् विना इति॥

४२ इदं प्रथिकं अमावस्या प्रेतपक्षान्यतर स्मृतस्य पार्वणविधिक सांवत्सरिकस्य संग्रहः ॥ यद्यपि एकोद्दिष्टस्य तन्नाभिषिक्तत्वात् तदपि एकोद्दिष्टं
५४ अदैविकमित्यस्य दैवपक्षरहितस्वरूपयोग्यताकत्वमित्यर्थः ॥ अदैविक प्रत्याहिकैकोद्दिष्टम् अन्यत्र कृष्णपक्षादौ नाधिकारो ननित्या
धिकारः ॥ सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश ॥ पृथक् नैव सुताः कुर्युः पृथक् द्रव्या अपि क्वचित् ॥ इत्यत्रापि नसमुच्छिन्नस्य
अपृथक्द्रव्यस्य पुंसः सपिण्डीकरणान्तानि इति विशेषणात् तदुत्तरः श्राद्धानां फलातिशयार्थत्वेन पृथक्त्वमपि यतः
प्रतीयते ॥ अत्र गजच्छाया योग फलातिशयार्थः ॥ नभस्यस्यापरे पक्षे मघास्विन्दुकरे रविः ॥ यदा तदा गजच्छाया श्राद्धे
पुत्रैर्वैरवाप्यते ॥ इति स्मृतिः ॥ करे हस्तानक्षत्रे कन्यादशमांशोपरि विंशति दण्डाधिक त्रयोविंशति दिनाभ्यन्तरे ॥ इति
अत्र दशमदिवसे मघायुक्तात्रयोदशी सत्वे परदिवसे कुञ्जरच्छाया योगः ॥ त्रयोदश्यामित्येव ब्रूयात् ॥ योगो मघात्रयोदश्यां
कुञ्जरच्छायसंज्ञितः ॥ भवेन्मघायामस्तं स्वेच्च शशिन्यर्के करे स्थिते ॥ इति मघापदवैयर्थ्यापत्तेः ॥ मघात्रयोदशीनिमि
त्तक श्राद्धमेव कुञ्जरच्छायाविधानात् ॥ ननिमित्तान्तरम् ॥ एतेन पूर्वदिने मघात्रयोदशी श्राद्धमकृत्वा परदिने कुञ्जरच्छाया श्राद्धम्

कर्त्तव्यम् इति मिश्रोक्तम् हेयम् ॥ अत्र कुञ्जरच्छायायोगजच्छाययोः पर्व्वापत्यात् मत्समासे गजच्छाया प्रतिप्रसूत श्राद्धस्य इति मतं
चिन्त्यम् वस्तुतो असम्भवात् ॥ अर्कात् ॥ रवेश्चित्रा नक्षत्रे अवस्थानात् करस्या का सम्भवः ॥ नतथा इति धेयम् ॥ अथाष्टकाश्राद्धम्
वायुपुराणम् ॥ पित्र्यदानाय मूलेस्पुरष्टकास्त्रिस्त्र एव च ॥ कृष्णा पक्षे वरिष्ठा हि पूर्वा चैन्द्री विभाव्यते ॥ प्राजापत्या द्वितीया स्यात्
तृतीया वैश्वदेविकी ॥ अपूपैः सदा कार्य्या मांसैरन्या भवेत् सदा ॥ शाकैः कार्य्या त्रितीया स्यात् एष द्रव्यगतो विधिः ॥ मूले प्रधान
स्थाने ॥ अमावस्या हि श्राद्धस्य प्रधानकालः तद्वदिति यावत् ॥ ऐन्द्री माघेः ॥ कर्त्तव्यानुरूद्देवतोक्त यागसम्बन्धात् ॥ एवम् प्राजापत्या
वैश्वदेविकी च ॥ मांसैः पशोः ॥ तथा च गोभिलः ॥ पशुवाल्पतरसम्भवः । स्यादपि पशुनैव कुर्य्यात् ॥ पशुवा निपात समुदायः पक्षार्थः ॥
पशुरपिच्छाग एव छागो ऽनादेशो पशुरिति गोतम मते ॥ नचैतस्य उद्ध मघस्यादिकम् ॥ मृगोऽपि विहितम् ॥ गोरिति पद गोभिल
सूत्रेण गोपदोपदेशात् ॥ कथमनुपदिष्टम् इति वाच्यम् ॥ तदसम्भवे पशुना इत्यनेन यः पशुरुद्दिष्टस्तस्य विशेषतः अनुपदिष्ट
त्वात् ॥ वक्तान्तस्तु हरिवंशे ॥ इक्ष्वाकुस्तु विकुक्षिमेवं अष्टकायामथादिशत् ॥ मांसमानय श्राद्धार्थं मृगान् हत्वा महाबलः इत्यनेन

४९ मर्गोऽपि विहितः पशुलाभावे स्थालीपाकेन यथा गोभिलः ॥ अपि वा स्थालीपाकं कुर्वीत इति ॥ तद्विधानन्तु स्थालीपाकं पशुस्थाने
५२ कुर्य्यात् यथानुकल्पिकम् ॥ श्रावयेत्तं सवत्सायास्तरुण्या गोः पयस्विनी ॥ इति छन्दोगपरिशिष्टीयं ग्राह्यम् ॥ अन्नु इति ओदन
चरोः पश्चात् ॥ अथ नवान्नश्राद्धम् ॥ तत्रादौ शातातपः ॥ नवोदकेन वा नैव उह प्रच्छादने तथा ॥ पितरः स्पृहयन्त्यन्नम् अष्टकासु
मघासु च ॥ तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥ नवोदक वर्षोपक्रमे आर्द्रास्थ रवाविति ॥ यावत् ॥ आर्द्रोदितो विशा
खान्तम् रविचारेण वर्षतीति ॥ वचनात् रविचारेण रविगत्या प्रा[illegible]व्द काले समायाते रौद्रर्क्षगते रवौ ॥ नातियेध समायोगे नल
योग वदाम्यहम् ॥ इति रुद्रयामलोक्ते ॥ रौद्रमाद्रा नवान्नेन वा नागमे ॥ अन्नागमश्चात्र तेन कर्म्मानुष्ठानम् ॥ इति मिश्रीरत्नातकी
लंकारः ॥ नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने ॥ इच्छाश्राद्धानि कुर्वीत नवशस्यागमे तथा ॥ इति विष्णुपुराणम् ॥ वक्ष्यमाणवहुतर
वचनेषु नवान्नश्रुतेर्नवान्नागमत्वेन निमित्तत्वम् लाघवात् ॥ अमावस्यास्तिस्रोऽष्टकामाघीप्रोष्ठप[illegible]र्द्धम् कृष्णात्रयोदशी व्री
हियवपाकौ च ॥ एतान् स्त्र श्राद्धकालान्वै नित्यानाह प्रजापतिः ॥ श्राद्धमेतेषु कुर्वाणो नरकं प्रतिपद्यते ॥ इति विष्णुवचनम् ॥

नवान्नागमश्राद्धस्य व्रीहियवोभयप्राप्तिविषयकत्वेन विध्यायकत्वस्यात् यास्यादिधान्यमुदासाय शालिधान्यस्यतु प्राप्ति इति बोध्यं
शरद्वसन्तयो केचित् नवयज्ञम् प्रचक्षते ॥ धान्यपाकवसादन्ये श्यामाको वनिनः स्मृतः ॥ इति छन्दोगपरिशिष्टे ॥ व्रीहिअप्राप्त्या नव
नवसस्ये ऽ ष्टौ शालिविधानात् पर्यन्तं[illegible] अन्यन्यायात् ॥ श्राद्धे ऽ पितृणां कल्पनात् ॥ वृश्चिके शुक्लपक्षेतु नवान्नम् सस्यतेवुधैः ॥ अपरे क्रिय
मानंहि धनुष्येवकृतं भवेत् ॥ धनुषि यत्कृतं श्राद्धम् स्मज्ञाने त्वासुरान्त्रिषु ॥ पितरस्तान्नगृह्णन्ति नवान्नामिषकांक्षिनः ॥ इति कच नाद्य ॥
श्यामाको व्रीहिविशेषः ॥ वलीवाराप्रश्यः अपरे क[illegible]स्न पक्षे ॥ धनुषि धनुस्थार्के पौषमासे ॥ पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः
भवेज्जन्मान्तरे रोगी पितृणाम् नोपतिष्ठते ॥ इति भोजराजवचनैकवाक्यत्वात् ॥ एवञ्च सौरपौषवच्चैत्रो ऽपि ॥ सौर एव साहचर्यात्
अत्र धनुर्मीनपर्युदासादयः वश्राद्धे मुख्यकालपर्य्यन्तम् माघफाल्गुणवैशाखेष्वपि नवान्नश्राद्धम् कर्तव्यम् ॥ तथाच हरिहरपद्धतौ
एवमागामीयाजीयमुख्यकालादर्वाक्तनः ॥ स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्म्मणः ॥ यद्वागामि क्रियामुख्यकालस्याप्यन्त
रालवत् ॥ गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि ॥ इति ॥ अर्वाक्तनः पूर्वतनः ॥ दशवत् शास्त्रे प्रवृत्तेः ॥ अन्तरालवत् ॥ मध्यकालस्येव

५० वक्तव्यता उत्तर क्रियामुख्यकालम् विनापि उत्तर क्रिया करणात् एव पूर्वकाले पूर्वक्रिया कर्त्तव्या संस्कारा प्रतिपत्तेरनन्यकालाद्येत्कथ
50 न्यन ॥ कुर्यात्तद्देयकूर्वीत येनूपनयनादिवत् ॥ इति छन्दोग परिशिष्टात् ॥ संस्कारापन्नो न तथा व्यवहारात् ॥ अत एव श्राद्ध विवेके धनु
मीनयोः पर्य्युदासात्तमघादावितिसामान्यतउक्तम् ॥ एवम् यवश्राद्धमपि हरिशयनात् पूर्वकम् कर्त्तव्यम् ॥ नवान्नम् नैवनन्दायां
नचसुप्ते जनार्दने ॥ नकृष्णपक्षे धनुषि तुलायाम् नैव कारयेत् ॥ इति ज्योतिषवचनात् ॥ नचात्र हरिशयन पर्य्युदासः ॥ यवनवान्न
आश्विन शुक्लपक्ष विधानादिति वाच्यम् ॥ यवनवान्नोऽपि यद्भागामि क्रियामुख्य कालस्यापि इत्यनेन आश्विन शुक्लपक्ष प्राप्ते
शयन निषेधस्य विषमा सम्भवात् तस्माद् आश्विन शुक्लपक्षेतरत्वेन विशेषस्य हरिशयनम् नवान्नमात्र पर्य्युदासत्त इत्युक्तम् ॥
नचसुप्ते जनार्दने इति आश्विन शुक्लपक्षेतरम् ॥ आश्विनाधिकारे ॥ शुक्लपक्षे नवं धान्यम् पक्वम् ज्ञात्वा सुशोभनम् ॥ गङ्गाक्षेत्रे वि
धानेन गीतवाद्यपरः सरः ॥ इत्यभिधायते ॥ तदेवान् पितॄंश्चैव तर्पयेदर्च्चयेत् तथा ॥ इति ब्रह्मपुराण वचनात् ॥ मृगनेत्रासु
मृगनेत्रा प्रापको यासाम् रात्रीणाम् इति सुतपसा गदत्राल्लेषुः इत्यनेन विधानात् तत् पदम् सिद्धम् ॥ ततश्च मृगशिरः पूर्वदिन

वृश्चिक शेषे षट् रात्र्यारम्भाच्चत्वारिंशद्दण्डाधिका वशिष्टः षट् रात्रयो मृगनेत्रा इति तथोक्तम् ज्योतिषे ॥ ज्येष्ठांशे चार्द्रगे सूर्ये मृगनेत्र
निशात्मके ॥ नवान्ने भोजनम् श्राद्धम् गजच्छाया तिथौ न च ॥ सूर्ये चैव विशाखगे स्मर तिथौ पापत्रिजन्मान्विते ॥ नन्दामन्दमहीजदिवसे
पौषमघो कार्तिके ॥ मेषुग्राहि शिवेषु विष्णुशयने कृष्णो शशिन्यष्टमे ॥ श्राद्धम् भोजनकम् नवान्नविहितम् पुत्रार्थिना सम्प्रदम्
श्रप्रसार्थः क्रियते ॥ सूर्ये चैव विशाखगे मार्गशीर्षस्य विंशतिदण्डाधिक प्रथमदिनत्रया वस्थिते सूर्ये ॥ स्मर तिथौ त्रयोदश्याम्
पापे पञ्चमताराद्रयो ॥ नन्दा प्रतिपत् षष्ठी एकादशी ॥ मन्दः शनिश्चरः ॥ महीजो मंगलः ॥ काव्यः शुक्रः ॥ उग्रगणाः पूर्वात्रय
मघा भरणयः ॥ अहिः आश्लेषा ॥ शिवः आर्द्रा ॥ भोजराजः ब्रह्मा विष्णुः बृहस्पती शशधरो मार्तण्ड पौष्णादितौ ॥ मैत्रे चैत्र विशाख
कण्ठ धनभे मूला स्थिवह्नौ तथा ॥ शत्रूवारणा ऋक्षके शुभदिने श्राद्धम् नवं शस्यते ॥ नन्दा भार्गव भूमिजेषु न भवेत् श्राद्धम् नवान्नोद्भवं ॥
ब्रह्मादयश्च ॥ रोहिणी श्रवणा पुष्य मृगशिरा हस्ता रेवती पुनर्वसू अनुराधा चित्रा विशाखा स्वाती धनिष्ठा मूला अश्विनी कृत्तिका
ज्येष्ठा शतभिषा ॥ नवान्नश्राद्धे मूला कृत्तिका ज्येष्ठा विधानात् तच्छेष भोजन प्राप्तेः ॥ आश्लेषा कृत्तिका ज्येष्ठा मूला जपदग्रेषु च

५१ भृगुभौमदिने रिक्ता तिथौ नास्या नवोदनम् ॥ इति श्राद्धकाण्डमिल्लपरम् ॥ अथ जपदम् पूर्वभाद्रपदाः चंद्रताराबल्य शुद्धौ प्रतिकारमाह देवलः
51 कर्म्म कुर्य्यात् फलावाप्त्यै चन्द्रादिशोभने बुधः ॥ सुप्तकाले विदम् सर्वम् नार्तिकाममपेक्षते ॥ चन्द्रे च शंखम् नवराञ्च नारे तिथावम्द्रेशित
नराएं गांश्च ॥ धान्य पञ्च दध्यात् कनक नक्षीयोरे यौ जे तिलान्हेम महिषीञ्च लग्ने ॥ अक्षम विहित नक्षत्रम् ॥ राजमार्तण्डे ॥ तयोरभेदात्
नवरात्परिमाणमाह ॥ एकत्रिपञ्चसप्तद्विजायदध्यात् मराणि नवराज्य ॥ क्रमशो जन्मनि विपदि प्रत्यरि मरणाख्य ताराम्तु ॥ परन्तु
लौकिकैर्मानैः साक्षरानि द्विमांसकम् ॥ तोलकम् त्रितयम् सैयम् ॥ नोति ज्ञैः स्मृतिसम्मतम् ॥ वामनपुराणाच्च ॥ विघ्नयो व्यति
पाताश्च ये चान्ये नीति सम्भवाः ॥ ते नाम स्मरणाद्विष्णोः नाशं यान्ति महात्मनः ॥ विष्णुधर्म्मोत्तरे ॥ सर्वं शुभानां परिमोक्षकारी
सम्पूजनम्देववरस्य विष्णोः ॥ इति ब्रह्मपुराणे ॥ प्राश्नीयाद्दधि संयुक्तम् नवं विप्राभिमंत्रितम् ॥ अभिमंत्रितम् मंत्रणादेशे
गायत्री वचनात् ॥ गायत्र्याः स्मृतिः ॥ उद्दीप्ता ब्राह्मणानुज्ञाम् सद्धि प्राशयेन्नवं ॥ अत्र व्रीहि अभावे शालिना ॥ नूतनाभावे
पुरातनेनापि श्राद्धादिकमाह मन्त्रभाष्ये श्रुतिः ॥ उद्दृ मेधी व्रीहियवाभ्याम् शरद्दशानो योर्यजेत् ॥ एषा मार्कंडेय लियर्मा स्वापर

कल्पे अन्येन पुरातनेनैवेति ॥ श्राद्धचिन्तामणौ अपि एवम् ॥ गृहमेधी ॥ इति द्विकमेदमेधा हिंसनयोर्मेधृम् संकोचे इत्यस्मात्पूर्व
गृहास्थ मेधा हिंसनयोरनुवर्त्तते मेधा हिंसार्थः ॥ तेन गृहनिमित्तेन जातायाः पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्कार ॥ कण्डनी चोदकुम्भश्च
बध्यते याश्च वाहयन् ॥ इति मनु उक्ताः पञ्च सूनाः ॥ तासु हिंसायाः कारी गृहमेधी गृहस्थ इत्यर्थः ॥ सूदयन्ति प्राणैर्वियोजयन्तीति सूना
वधस्थानानि ॥ चुल्ली पाकस्थानम् पेषणी दृषदुपलादि उपस्कार गृहसंमार्जन्यादि ॥ कण्डनी मुषलउदूखलादि ॥ याः सूना वाहयन्
स्वस्वकार्ये योजयन् बध्यते पापेन सम्बध्यते पुरुष इत्यर्थः ॥ प्रेतस्य मातापितृकस्य पुरातनधान्याभावेन नवैर्वैश्वदेवम्
कृत्वा नवञ्च ब्राह्मणेभ्यो दत्वा ब्राह्मणानुज्ञया गृही सा भोजनादिकं कर्तव्यमाह ॥ रेणुकाचार्य्य नव्यवर्द्धमानध्वना स्मृतिः
दत्वैवं ब्राह्मणेभ्यश्च हुत्वा वा वैश्वदैविकम् ॥ अन्यो नवान्नमश्नीयात् इति बोधायनो ऽब्रवीत् ॥ अन्यः श्राद्धकरणासमर्थः
नवान्नश्राद्धानधिकारी च ॥ अत एव विधवया नवमेकोद्दिष्टे दीयते भुज्यते च ॥ इति ॥ अधिकाराभावः प्रकृते ऽपि तुल्यः
एवञ्च ॥ अकृताग्रहणाश्चैव धान्यजातं नरोत्तम ॥ इत्यादिवचनञ्च नवान्नश्राद्धाधिकारिपरम् ॥ अथ पौर्णमासी श्राद्धम् ॥

५२ विष्णुधर्मोत्तरे ॥ पौर्णमासी तथा माघी श्रावणी चनरोत्तम ॥ प्रोष्ठपद्यामतीतायां तथा कृष्णात्रयोदशी ॥ एतांस्तु श्राद्धकालान्वै नित्यानाह
52 प्रजापतिः ॥ प्रोष्ठपद्युर्ध्वं कृष्णा त्रयोदशी मघायुक्तैव पूर्वोक्त वचनात् ॥ अन्यथा विध्यन्तर कल्पनापत्तेः ॥ अथ श्राद्धवेलाः ॥ अथापरा
ह्णे ॥ पूर्वाह्णे मातृकं श्राद्धम् अपराह्णे तु पैतृकम् ॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ मातृपदमन्वष्टका श्राद्धम्
यथाशंखः ॥ पित्रादित्रयपत्नीषु भोज्या मातृ प्रतिद्विजा ॥ स्त्रीणामेव तु तदस्मान्मातृश्राद्धमिहोच्यते ॥ एतच्चान्वष्टका श्राद्धम्
साग्निमात्रेन कर्तव्यम् ॥ तथाच ॥ अन्वष्टकायाम् मातृ प्रतिद्विजा भो[redacted]ज्या इति यदुक्तम् तत् पित्रादित्रयपत्नीष्वेव न मातामह
पत्नीषु यस्मात् तत् श्राद्धम् स्त्रीणां प्राधान्येन विहितम् तस्मात् तत् श्राद्धम् मातृ श्राद्धमुच्यते इत्यर्थः ॥ अजहत् स्वार्था
लक्षणाया मातृ शब्दस्य स्त्रीत्रय पाठत्वात् ॥ इति ॥ तथाच विष्णुः ॥ अन्वष्टका स्वष्टकावत् अग्नौ हुत्वा मात्रे पितामह्यै प्रपितामह्यै
पूर्ववत् ब्राह्मणान् भोजयित्वा इति आदि ॥ अत्र होमत्वात् एव अग्नि प्राप्ते पुनरग्नि ग्रहणात् तन्नियमार्थम् ॥ तथाग्नौ करणा
होमेऽनग्नीनाम् पिण्डपरायणोदे विधानात् अत्रापि तथेति वाच्यम् ॥ प्रकृतिभूत श्राद्ध विधिं उक्त्वा पार्वणान्तरस्य [redacted]कृति
वि

भूतश्राद्धविहितांधारेन वाधात् ॥ सर्वयागानां मध्ये दर्शपौर्णमासियागः प्रकृतिः ॥ अत्र बर्हिर्विधानम् तद्विकृतिभूते पशुयागे
प्रकृतिवत् विकृतिरिति न्यायेन षट्कुश बर्हिः प्रापते शरमय बर्हिः विधानम् तेन यथा तानि बाध्यन्ते तत्र वा अत्रापि अप्राप्य
विधानम् विप्रपरायोध्याः ध्यावोत्तरस्य इति ॥ शरमय बर्हिषा कुशमय बर्हिर्बाधवत् ॥ न वा लौकिकाग्नौ होमः ॥ न पैत्र्य
यज्ञियो होमो लौकिकाग्नौ विधीयते ॥ इति मनुना निषेधात् ॥ श्राद्धचिन्तामणौ अपि एवम् ॥ अपराह्णे तु पैतृक
मिस न्वष्टका शुक्लपक्षविहित पार्वणेतर पार्वण सपिण्डकरणपरम् ॥ शुक्लपक्षस्य पूर्वाह्णे श्राद्धम् कुर्याद्विचक्षणः
कृष्णपक्षे पराह्णे तु रोहिणान्तु न लंघयेत् ॥ इति वायुपुराणवचनात् ॥ अत्र शुक्लपक्षस्य इति अंगांगीभावबोधक
षष्ठी निर्देशात् शुक्लपक्षत्वमात्रेण यद्विहितम् ॥ माघपौर्णमास्यादि विहित पार्वणश्राद्धम् तदेव पूर्वाह्णे कर्तव्यम्
अतएव कृष्णपक्षत्वेन विहिता विहित पार्वणयोरविशेषाद् अपराह्णे कर्तव्यत्वात् कृष्णपक्षे षष्ठी निर्देशो न कृतः
अतोऽस्मन्ताह विहित पार्वण सपिण्डीकरण श्राद्धयोः शुक्लपक्षः कृष्णपक्षयोरविशेषेण वा पराह्णे कर्तव्यता बोध्यम् ॥

५३ अत्र पूर्वाह्न पदम् संगव परम्॥ प्रातःकालो मुहूर्तां स्त्रीन् संगवस्तावदेव तु॥ मध्याह्नस्त्रीन् मुहूर्तः स्यात् अपराह्नस्ततः परम्॥ सायाह्नस्त्रिमुहूर्तः स्या
53 त् श्राद्धं तत्र न कारयेत्॥ राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु॥ इति मत्स्यपुराणे॥ मध्याह्नापेक्षया परकालस्य अपराह्नत्ववत् तत्
पूर्वकालस्य संगवापरनाम्नः पूर्वाह्नत्व प्रतीतेः॥ अत एव ब्रह्मपुराणे न मत्स्यपुराणोक्तः प्रातःकालादिभेदे ब्रह्मादि श्राद्धमुक्त्वा
तत्रापि संगव मतिक्रमं धारयेत्॥ पूर्वाह्न इत्युक्तम्॥ तत् संगवपरम् अत्र पूर्वाह्न श्राद्धमभिधाय रौहिणं तु न लंघयेत्॥ इत्यभिधानेन
पूर्वाह्न श्राद्धस्य संगवात् परो रौहिणो पर्यन्तो गौणकालः प्रतीयते॥ तेन रौहिणी पूर्वाह्न श्राद्धस्य गौणकालत्वेन उत्तरावधि
अपराह्न श्राद्धस्य पूर्वावधि रिति मिगम्यते॥ पूर्वदिने संगवात् परम् रौहिणा पर्यन्तम् तिथिलाभे परदिने मुहूर्तत्रयमात्र
तिथि लाभे पूर्वदिने श्राद्धम् रौहिणानापा गौण पूर्वाह्न लाभात् न परदिने तथात्व अभावात्॥ उभयदिने संगवलाभे
परदिने शुक्लपक्षे तिथिर्ग्राह्या इति वचनात्॥ रौहिणश्च दिवसस्य नवमे मुहूर्तः॥ तस्य ज्योतिषोक्त रौहिणो देवतार्के सात्॥
रौहिणिलमिति॥ एवञ्चौद्धं मुहूर्तात् कुतपात् यन्मुहूर्तम् चतुष्टयम्॥ मुहूर्त पञ्चकं वापि स्वधा भवन नीष्यते॥ इति॥

मत्स्यपुराणे अपराह्णिक श्राद्धे ॥ अह्नो मुहूर्ता विख्याता दश पञ्च च सर्वदा ॥ तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥ इति तद्व
चनात् तदुक्त कुतपस्य पञ्चमत्वे नाभिधानम् ॥ ततः रौहिणादेः पि गौणकालत्वपरम् ॥ तच्चोर्द्ध्वं मुहूर्त्तात् कुतपात् मुहूर्त्तपञ्च
कम् ॥ इत्यत्र कुतपात् इति ल्यप्लोपे पञ्चमी ॥ ते न कुतपमारभ्य इत्यर्थः ॥ इति त्रयोदशमुहूर्त्तात्मक मे नारायणोपाध्यायैरुक्तम्
युक्तमित्युपेक्ष्यम् ॥ अपराह्णे तु संप्राप्ते अभिजिद्रौहिणोदये ॥ यदत्र दीयते जन्तोः तदक्षयमुदाहृतम् ॥ इति मत्स्य
पुराण विरोधात् ॥ तस्मात् मुहूर्तपञ्चकम् इत्यर्थः ॥ अपराह्णे तु संप्राप्ते इत्यत्र अभिजित्रौहिणोदये अष्टमनवम
मुहूर्तयोरुदयाच्च सम्बन्धे गौणापराह्णः रूपे यद्दीयते तदपि अक्षयम् इत्यर्थः ॥ एतत्प्रशंसनीयम् ॥ रात्रौ श्राद्धं
न कुर्वीत राक्षसी कीर्तिता हि सा ॥ सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ॥ इति मनूक्तपर्युदास्त उत्तरकालापेक्षया न तु
मुख्य अपराह्णापेक्षया मुहूर्त्तचतुष्टयम् मुहूर्त पञ्चकम्वा इत्यनयोः गौणकालत्वाभिधानात् ॥ ततश्च रात्र्यादि पर्यु
दास्त उत्तरकाल कुतपादि मुहूर्त पञ्चकमादि करौहिणादि मुहूर्तश्चतुष्टय दशमादि मुहूर्तत्रय रूपकलः ॥ इति

चतुर्थ्या नाम पराह्णिक श्राद्धविहित प्रसक्तानाम स्तेन बोध्यम् ॥ अदापादिफलश्रुतेः ॥ एवमन्यस्मिन् पूर्वाह्णादि विहिते श्राद्धे यथापथ्यं
५४ बोध्यम् ॥ अक्रूरतिथि विशेष विहितानाम् श्राद्धानाम् उभयदिवसीय श्राद्धे प्रसक्तानाम काले तत्तिथि लाभे अपराह्णिक श्राद्धस्य
54 पूर्वतिथौ कर्तव्यता ॥ इति बोध्यम् ॥ यथा स्तम्भस्त वित्ता याति पितरस्तानुपासते ॥ तिथिम् तोभ्यो पराह्णोहि स्वयं दत्तः स्वयम्भुवा
इतिग्रन्थ्यपरिशिष्ट वचने ऽ पराह्णो दत्त इति हेतुम् अन्तिगद्देन अस्तगामि तिथिवेन पितॄणामुपास्यत्वाभिधानात् ॥
उभयदिने प्रसक्ता तम कालालाभे तु परदिने गौणापराह्णाभावात् तत्रैव श्राद्धम् ॥ एवम् पूर्वदिने यत्र किञ्चित् अधिक
एकादश मुहूर्त गते तिथेर्लाभः ॥ परदिने किञ्चित् न्यूनाष्टमो मुहूर्ते योर्लाभः तदा परदिने एवरात्रिसन्ध्या सायाह्न तर
कालस्य अपराह्णिक श्राद्धे विहितत्वात् ॥ अपराह्णिकेतर श्राद्धे तु उभयदिने प्राप्ति अप्राप्त्योः शुक्ल कृष्ण भेदेन व्यवस्था
शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥ इति विष्णुधर्मोत्तर विधा
नात् ॥ द्विती[illegible]यादिक पुज्ञानाम् युज्यत्व नियमादिषु एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादियोदने ॥ इतिव्यासवचनाच्च ॥

नियमादिषु व्रतादिदैवकर्मसु ॥ एकोद्दिष्टादिश्राद्धनिमित्तीभूततिथिविशेषस्य वृद्ध्यादौ आदिशब्दात् ॥ क्षयसम्भवे ग्राह्ये तथाम
ति श्राद्धकरणस्य सन्देह पूर्वोक्त सारेण ह्रासवृद्ध्यादि विधायको नियामक इति यावत् ॥ तत्र ह्रासवृद्धिचन्द्रस्य ताभ्याम् शुक्ल
कृष्णा पक्षौ लभ्यते ॥ पूर्ववचनैकवाक्यत्वात् आदिशब्देन यथाप्रस्तमिति उक्तम् सूर्यास्तसम्बद्धि तिथिरिति ॥ एवञ्च द्विप्र
हरनुव्यापिनी चेत् स्यात् मताहस्य तु या तिथि पूर्वस्यां निर्वपेत् पिण्डम् इति अङ्गीरसा कथितम् ॥ इति सुमन्तवचने मत
तिथेः उभयदिने श्राद्धकालव्यापित्वे पक्षभेदमनादृत्य यत् पूर्वदिने श्राद्धविधानम् तत् मताहविहित पार्वण सपिण्डी
करणउभयश्राद्धपरम् ॥ यथाप्रस्तम् इति एकवाक्यत्वात् ॥ नतु एकोद्दिष्टविषयम् ॥ एकोद्दिष्टादि वृद्ध्यादौ इति बोध्यम्
इति उक्तवचन विरोधात् ॥ एकोद्दिष्टन्तु मध्याह्ने इति प्रागुक्त विरोधाच्च ॥ मध्याह्नेतु विशेषमाह कालमाधवीये व्यासः
कुतप प्रथमे भागे एकोद्दिष्टमुपक्रमेत् ॥ आवर्तन समीपे वा तत्रैव नियतात्मवान् ॥ आवर्तनम् पश्चिम दिगवस्थित छायायोः
पूर्वदिगगमनारम्भः कालः तत्समीपे कुतपशेषदण्डे ॥ तत्रादौ गौतमः ॥ आरभ्य कुतपे श्राद्धम् कुर्यादारौहिणम् बुधः ॥

५५ 55 विधितो विधिमास्थाय रोहिणीमनुलंघयेत् ॥ इति एतद्वचनद्वयम् अभवल्भीमे भोजदेवेन ध्वस्तं ॥ तेन पूर्वदिवसीय कुतपरोहिण्यो
र्व्याप्तिलाभे परत्र कुतपमात्रलाभे शुक्लपक्षेऽपि पूर्वदिने एकोद्दिष्टम् उभयप्राप्त्यनुरोधात् ॥ पूर्वदिने कुतपालाभे परत्र तल्लाभे कृष्ण
पक्षेऽपि परदिने समाप्तीकालोदारंभ कालस्य बलवत्त्वात् ॥ तथा च बौधायनः ॥ यो यस्य विहितः कालः कर्म्मणस्तदुपक्रमे ॥ तिथिर्या
भिमता सा तु कार्य्या नोपक्रमोज्झिता ॥ अत एव मदनपारिजाते लौगाक्षिः ॥ यां तिथिं समनुप्राप्य उदयं याति भास्करः ॥ गाणाता जत्तायत्ते कालो यत्र तिष्ठन्ति देवताः ॥ वरमेका
कृतिः काले नाकाले लक्षकोटयः ॥ उभयत्र कुतपमात्रालाभे शुक्लपक्षेऽपि पूर्वदिने समाप्तिकालानुरोधात् ॥ पूर्वदिने रौहिणा
लाभे परत्र सप्तम मुहूर्त लाभे कृष्णपक्षेऽपि परदिने मध्याह्नानुरोधात् ॥ ग्रहणादौ रात्रावपि स्नानश्राद्धादिकमाह देवलः ॥
राहुदर्शन संक्रान्ति विवाहात्ययवृद्धिषु ॥ स्नानदानादिकम् कुर्युः निशि काम्यव्रतेषु च ॥ आदिशब्दः श्राद्धादिपरम् ॥ इसर्पः
स्नानदानम् तपः श्राद्धम् अनन्तम् राहुदर्शने ॥ आसुरीरात्रिरन्यत्र तस्मात्ताम् परिवर्जयेत् ॥ इति यम वचनेन तथा समभिव्याहारात्
अथ आमावस्या श्राद्धकालः ॥ तत्रादौ छन्दोग परिशिष्ट कात्यायनः ॥ पिण्डान्वाहार्य्यकम् श्राद्धम् क्षीणे राजनि शस्यते ॥

वासरस्य तृतीयांश नात्तिसन्ध्यासमीपतः ।। पिण्डान्वाहार्य्यकमिति ।। ततः प्रभृति पितरः पिण्डसंज्ञानुलेभिरे ।। इति मत्स्य
पुराणात् ।। पिण्डानाम् पितॄणाम् अन्वाहार्य्यम् ।। मासैकाहमिजनकम् यत्तथा ।। तथा च मनुः ।। पिण्डानाम् मासिकम् श्राद्धम्
अन्वाहार्य्यम् विदुर्बुधाः ।। राजनि चन्द्रे ।। शस्यते ।। इत्यनेन क्वचित् चन्द्रदायाभावे ऽपि श्राद्धम् सूचितम् ।। एतादृग्व्युत्पत्तेः
साग्नि निरग्नि साधारणत्वेन वक्ष्यमाण कालायनोक्त रीत्या क्षीणा सम्वत्ता वर्द्धमानाभेदः साधारणः ।। वासरस्य तृतीयांशे
त्रिधा विभक्त दिनस्य तृतीय भागे ।। नात्तिसन्ध्या समीपत इति सन्ध्या समीपो मुहूर्तो ऽपराह्णे ऽपि वर्जनीयः इत्यर्थः ।।
ननु कथमत्र द्वैधम् उभयत्र वासर तृतीयांश लाभे पूर्वदिन एव क्षीणे राजनि इत्यनेन प्राप्तौ संशयाभावात् नच पूर्व
दिने सप्तविंशति ।। तेन राक्षसी वेलायामपि मुहूर्त द्वयमप्यनु ज्ञातमिति शब्दस्य वसा ।। अत एवाहेरीतः ।। त्रिमुहूर्तापि
कर्तव्या पूर्वा दर्शाच वह्निचैः ।। तेन पूर्वदिने मुहूर्तत्रय मात्र लाभे परदिने वासर तृतीयांश लाभे पूर्वदिने एव श्राद्धम्
दर्शद्वैधे कुतः श्राद्धम् ।। तत्रादौ ।। छन्दोग परिशिष्टे कात्यायनः ।। यदा चतुर्दशीयाममतुरीय मनुपूरयेत् ।। अमावास्या

५६ व्याप्नोति ॥ तेन प्रहरत्रयाभ्यन्तरे किञ्चिदधिकत्रये वा चतुर्दशी इत्यवगम्यते ॥ ततश्च उभयदिने वासरत्रितीयांशसम्बन्धि पञ्चधा
56 विभक्तापराह्णिय एकादशद्वादशमुहूर्तयोः क्षीयमाणाः तदैव श्राद्धमिष्यते ॥ चतुर्दशीयाममिति चतुर्दशी सम्बन्धिदिन
याममू तद्दिनस्य अमावास्यासम्बन्धे चतुर्दशी इति निर्देशोऽधिकेन व्यपदेशाः भवन्ति इति न्यायात् ॥ तेन चतुर्दशी
सम्बन्धिदिनस्य चतुर्थं प्रहरम् कृत्स्नम् किञ्चिन्न्यूनम्वा अमावस्यानुपूरयेत् ॥ व्रतोपवासस्नानादौ घटिकैका यदा
भवेत् ॥ सा तिथिः सकला ज्ञेया पित्र्ये चापराह्णिकी ॥ इति भविष्यपुराणवचनात् ॥ मुहूर्तात् न्यून दर्शलाभे द्विधम् ॥
नतु एकदिनमात्रे तल्लाभे वासरत्रितीयांश ॥ इत्यनेनैव तत्र द्वैध्यानुदयात् ॥ एवम् द्वैध्ये पूर्वदिने चतुर्दश्यापेक्षया
परदिनेऽमावास्याक्षीयमानेनात् अन्यूनकालव्यापिनी ततु पूर्वं परदिवसीय यावच्चतुर्दशी अपेक्षयाऽनुपस्थितिः ॥
एवम् साम्ये तत्वा वर्द्धमानयोरपि ॥ तदैव पूर्वदर्श एव ॥ ततचन्द्रक्षयः चतुर्दशी अष्टम यामात् ॥ प्रवृत्ति अमावास्या सप्त
म याम पर्यन्तम् इति वक्ष्यते ॥ अतश्च क्षयानुरोधात् ॥ पूर्वदिने श्राद्धम् ॥ तदैवं ■सेव कारेणातिथि द्वैधे खण्डविशेषो + ९
+ नियम्यते ९
५५

कर्म्मशिखराउन्तरो सुरासाप ॥ एवञ्च यत्र पूर्वापरदिने वासरस्य तृतीयांशीयमुख्यापराह्णमुहूर्त्तो न दर्शलाभः तत्रापि पूर्वदिने श्राद्धम्
वासरतृतीयांशचन्द्रक्षयात्तिशब्दस्य सार्धत्रिमुहूर्तापीत्यनेन अनुरोधात् ॥ यत्र पूर्वदिने त्रिमुहूर्तव्यापिनी अमावास्या परदिने वर्तती
यांशमुहूर्तव्यापिनी सती क्षीयमाना तत्र परदिने चन्द्रक्षयाभावेऽपि मुख्यापराह्णलाभात् श्राद्धम् ॥ अन्यथा यदा चतुर्दशीया
मस्तु शेषमनुपूरयेदिति विशेषाभिधानम् व्यर्थं स्यात् ॥ ० ॥ अथ यत्र पूर्वाह्णे श्राद्धम् तत्र यदहस्त्वेव च चन्द्रमा न दृश्यते ॥
तामामावास्यां कुर्वीत इति गोभिलविरोधः ॥ तथाविधचतुर्दशीयुक्तामावास्यायाः क्षीणीवालीयेन प्राप्त चन्द्रदर्श
नात् ॥ तत्राह स एव ॥ यदुक्तं यदस्त्वेव दर्शनं नेति चन्द्रमाः ॥ तत्क्षयापेक्षया तेया क्षीणौ राजनि चन्द्रमपि ॥ यदहस्त्वेव
चन्द्रमा न दृश्यते ॥ तामामावास्यां कुर्वीतेति यद्गोभिलसूत्रम् ॥ तच्चन्द्रक्षयाभिप्रायकम् ॥ अन्यथा गोभिलीय
तादृशसूत्रान्तरेण सह पौनरुक्त्यापत्तेः ॥ तस्मात्प्रथमसूत्रम् कुहूपरम् ॥ न च चन्द्रमाना पक्षे नियतम् ॥ क्षीणा
न्तर्गतयोस्तया यथायोग्यमनुसरणीयम् ॥ एवञ्च यदहस्त्वेव चन्द्रमा न दृश्यते तामामावास्यां कुर्वीत इति श्रुति

५० एतत् प्रमाणार्थकम् अस्मत्सम्बा तदपि वर्द्धमानापरम् ॥ नतु कात्यायनवचनात् ॥ तत्र क्षयलक्षणम् ॥ कल्पतरुप्रभृतिभिरुक्ता युक्ता श्रुतिस्मृति
५१ विरोधेनु श्रुतिरेव गरीयसी इतिविरोधात् ॥ क्षीणा इति कात्यायनेन ॥ मया यत क्षीणा राजनि इत्युक्तम् ॥ तदपि चन्द्रक्षयाभिप्रायकम् ॥
अतएव दृश्यमानेऽपि एकदा इति गोभिलसूत्रानन्तराभ्यर्थम् ॥ यदह स्त्वेव इत्यादि द्वितीयसूत्रप्राप्तति थेः सिनीवालित्वेनैव चन्द्रद
र्शनप्राप्ते रित्यत आह ॥ सत्य ॥ यद्यौक्तम् दृश्यमानेऽपि तत्र चतुर्दशी अपेक्षया अमावास्याम् प्रतीक्षेत तदन्ते वापि नि
र्वपेत् ॥ दृश्यमानेऽपि एकदा इति यदुक्तम् तत् चतुर्दश्याम् श्राद्धाय पूर्वसूत्रम् अमावास्यापदोपादानात् ॥ चन्द्रस्य क्षये सति
अमावास्याविषयम् इदम् पुनरिधम्भूत चतुर्दशीविषयम् ॥ इति श्राद्धविवेक तात् किममावास्या वत्र चतुर्दशी ॥ इत्यत्राह
अमावास्याम् प्रतीक्षेतेति उभयतिथिप्राप्तौ श्राद्धाय अमावास्यास्य प्रतीक्षणीया ॥ यदा पूर्वदिने दिवसार्द्धमुहूर्तमात्र
अमावस्यापरदिने च सार्द्धदशममुहूर्तमात्रे तत्र चोभयदिने श्राद्धयोग्या ऽमावास्या न प्राप्यते ॥ तत्र तदन्ते चतुर्दश्यन्ते
निर्वपेत् दद्यात् ॥ अत्रैव विषये ॥ साग्निनिरग्न्योर्विशेषमाह कालमाधवीये जाबालिः ॥ अपराह्णद्वयाव्यापी यदि दर्शतिथि

क्षये ॥ आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूमता ॥ आदिशब्दादनुपनीतशूद्रयोर्ग्रहणम् ॥ क्षयमाह कात्यायनः ॥ अष्ट
मांशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः ॥ अमावस्याष्टमांशे च ततः किल भवेदणुः ॥ चतुर्दश्या ष्टमे यामे चन्द्रमाः क्षीणः ॥ चतुर्थ
भागेन कलावशिष्टो भवति ॥ अत्र दुन्दुराध्ये प्रहरे, वसिष्ठनि इत्यादिस्वरसात् ॥ अमावस्याष्टमे चाणुर्भवति उनहार्यपप्यते ॥ किल इत्यादि
आगमवार्तामात्र ॥ तेन अमावास्यासप्तमे यामे कलाक्षयो सर्वगम्यते ॥ ततः अणुः अन्त्यकलावयवनाशोत्पत्तिरेव क्षयः ॥ सा च सूक्ष्मता
याम् । विनाशोपयसीति श्राद्धविवेकः ॥ उत्पत्तिराध्यक्षणसम्बन्धस्तेन विनाशस्य अनन्तत्वेऽपि नास्ति व्याप्तिः ॥ अत्र विशेषमाह ॥ सएव
अपराह्णायति अमावस्या तथाऽष्टमस्य याम भवेत् ॥ विशेषमाभ्यामन्वुवते चन्द्रविदो जनाः ॥ आभ्यामिति न्यपलोपे पञ्चमी इमे
प्राप्य इत्यर्थः ॥ चन्द्रचारविदो ज्योतिर्विदः ॥ अत्र पौर्णमास्यन्तमासः ॥ इति परिशिष्टप्रकाशः ॥ अत्र इदमवीजम् ब्रह्मपुराणीयतिथि
कृत्यम् ॥ तथा च श्राद्धमधिकृत्य ब्रह्मपुराणम् ॥ पयोमूलफलैः शाकैः कृष्णपक्षे तु सर्वदा ॥ इति कृष्णपक्षे चतुर्दशी व्यति
रिक्तायाम् यस्यां कस्याञ्चित् तिथौ श्राद्धविधानात् आमावास्याऽपि लभ्यते ॥ इति ॥ को विशेषः ॥ इत्यत्र आह सएव ॥

अत्रेन्दुराध्ये प्रहरे वर्त्तिष्यते चतुर्थभागान्नकलावशिष्टः॥ तदन्ता एव क्षयमेति क्रमात् एवम् ज्योतिश्चक्रविदो वदन्ति॥ अत्र अमावस्यायाः
चतुर्थभागो नकलावशिष्टः॥ चतुर्थभागेन ऊनाया कला तया अवशिष्टः॥ कला भागत्रयमात्ररूपतया वशिष्टः सन आद्ये प्रहरे अव
तिष्ठते॥ अर्थात् चतुर्दशी अष्टमयामेन क्षयारम्भः॥ इति तदन्त एव अमावस्यान्त्यामस्य वक्रमात् क्षयमेति॥ इति॥ अन्यत्र
अमावास्या सप्तमयाम इति विशेषः॥ तेन मार्गशीर्षज्येष्ठयोरुभयदिने चन्द्रक्षयलाभे यद्यपि यदा चतुर्दशीयामम् इति वचनात्॥
पूर्वदिन एव प्राप्नोति॥ तथापि तद्वचनम् चन्द्रक्षयानुरोधमूलक इति क्रमात् क्षयानुरोधात्॥ क्षीणायामपि परत्रापराह्णलाभे
आह्नम् अन्यथा इति तद्वचने विशेषणाभिधानम् व्यर्थम् स्यात्॥ अत्रापि विशेषान्तरमाह॥ स एव यस्मिन्नब्दे द्वादशैकश्च यत्प्रसाक्षि
न तृतीयया परदृश्यो लोपो जायते॥ यस्मान्मास तृतीयया मात्रया चतुर्थभागो नकलया परिदृश्यश्चन्द्रो न भवति॥ किन्तु तदधिकन्यूने
कलया इति॥ तेन मलमासयुताब्दे अन्यमासवत् अनयोरपि चतुर्दश्यन्तयामादि दर्शसप्तमयामपर्यन्तम् क्षय इति॥ मलमास
युताब्दस्थ एकस्मात् मलमासात् अब्दद्वयान्तर तृतीयाब्दे मलमासस्य अवश्यम्भावात् इति॥ चन्द्रक्षयानुरुद्धम् क्षीणो पक्षसुप

संहरतीति ॥ सयेव ॥ एवञ्चारम्भ चन्द्रमसो विप्रदिताश्ची सो तस्मिन्न पराह्णे च यदृश्यात् ॥ एवञ्चारम्भ गति विशेषम् ॥ साम्भितायाम् व्यवस्थामाह स एव
सन्निश्रायाचतुर्दश्याऽमावस्या भवेत् क्वचित् ॥ खर्विताम् ताम् विदुः केचित् उपेध्वम् इति चापरे ॥ क्षीणायाः पूर्वमुक्तत्वात् वर्द्धमानायाश्च
वक्ष्यमाणत्वात् ॥ अस्य वचनस्य साम्भितापरत्वम् ॥ खर्विताम् नीचाम् ॥ पितृलोकप्रसन्ना हीनाम् इत्यर्थः ॥ केचित् यजुर्वेदिनः ॥
अपरे ऋग्वेदिनः तामेवोपेध्वम् उपगच्छत श्राद्धाय इति शेषः ॥ उपेध्वम् इत्यत्र गतध्वम् इति पाठे गतः प्राप्तपितृलोक
अनया इति गतध्वा इति प्रशस्ता इत्यर्थः ॥ तस्माच्छन्दोगानाम् उभयानुरोधात् इत्यतो उभयाद्यम् कुर्वन्ति इति कात्यायनः
सारसः ॥ व्यक्तमाह लघुहारीतः ॥ त्रिमुहूर्तापि कर्त्तव्या पूर्वा दर्शाच्च बह्वृचैः ॥ कुरध्वर्य्युभिः कार्य्या यथेष्टम् सामगैरिति
भिः ॥ अत्र त्रिमुहूर्तोपादानात् ॥ साम्भितायाम् पूर्वदिने त्रिमुहूर्तमात्रलाभेऽपि बह्वृचानाम् श्राद्धम् कर्त्तव्यम् ॥ इति
नमुख्यापराह्णलाभादपि परदिने सामगानाम् तत्रापि नियमः ॥ एतादृग्विषय एवोभयत्र पराह्णलाभेऽपि इयम् व्यवस्था
इति श्राद्धविवेकः ॥ मुख्यापराह्णस्यैकदिनलाभस्यापि उभयदिनलाभात् ॥ वर्द्धमानायाम् व्यवस्थामाह स एव ॥ इति ॥

वर्द्धमानामावास्यायां लक्षये दपरे हनि ॥ यामास्त्री नधिकात्त वापि पितृयज्ञो स्तातो भवेत् ॥ यामास्त्रीतिति पूर्वदिवसीय यामत्रय
न्यूनचतुर्दशापेक्षया ॥ अत्रैवम् वासरतृतीयायांशस्तुरोधेन श्राद्धविधानात् कथमामावस्या श्राद्धे पर्य्युदास्त रात्र्यादि
इतरकालस्य परिग्रहः ॥ सत्यम् ॥ तिथिद्वैधे क्षीणादिभेदेन खराउ विशेष परिग्रहार्थम् ॥ वासरस्य तृतीयांशापेक्षा
अन्यथा उभयदिने वासरतृतीयांश प्राप्तौ श्राद्धलोपापत्तेः ॥ प्राग्युक्त निरग्न्यादेः कुतुर्मते तस्यानिविषयतापत्तेश्च ॥
अतः पर्य्युदास्त उत्तरकालस्य परिग्रहः ॥ यदा तु पूर्वापर खराउयोरन्यतरस्यैव प[illegible] ग्रस्तापदा यथायोग्यम् ॥ तत्रैव
सायाह्न मुहूर्त्तद्वय पर्य्युदास्त उत्तरकालकुतपादि मुहूर्त्त पञ्चक रौहिणादि मुहूर्त्तचतुष्टय वासरतृतीयांशीय
अपराह्न मुहूर्त्तः द्वयकाला यथाक्रमम् प्राप्तस्या मान्य प्रसक्तातर प्रशस्ततमत्वेन ज्ञेयाः ॥ एतद्विचारस्तु तिथितत्वे
मलमासपर्य्युदास्त एवो विचारैश्च मलमासतत्वे ऽनुसन्धेयो ॥ अथ एकोद्दिष्ट श्राद्ध विचारः ॥ तत्रादौ गोभिलः ॥
अथ एकोद्दिष्टमेको पवित्रमेकमर्घ्यम् एकः पिण्डगुनवाहनम् नाग्नौकरणम् ॥ नात्र विश्वेदेवाः इत्यादि तमितितत्वि:

प्रत्न उपतिष्ठ तामिति अप्रशस्यस्य स्थाने अभिरम्यताम् इति ॥ विसर्गो अभि[?]तो स्मीति प्रतिवचनम् ॥ एतत्प्रेतश्राद्धमिति अथ इत्यनेन
एकोद्दिष्टस्य पार्वणात् तत्पर्य्याभिधानम् ॥ तयोः प्रकृति विकृतिर्भावं भूतत्वम् सूचयन्ति ॥ अत एव एकोद्दिष्टे पार्वणाद्धर्म्मप्राप्त्या वाहना
दि प्राप्तौ नवाहनमित्यादि निषेध उपपद्यते ॥ अन्यथा प्राप्ति अभावात् निषेधोऽनुपपन्नम् स्यात् ॥ एतत् प्रेतश्राद्धम् ॥ इति उपसंहारा
दिकम् प्रेतमुद्दिश्य यद्दीयते श्राद्धम् तदेकोद्दिष्टम् ॥ इति वैदिक प्रयोगाधीनम् यौगिकम् ॥ अत एव प्रतिसाम्वत्सरीकस्यै
कोद्दिष्टत्वम् ॥ किन्तु एकोद्दिष्ट विधिकत्वम् ॥ अत्र अर्घ्येक्यात् द्विदल रूपम् ॥ शंकेतित पवित्रकम् प्राप्तौ एकम् पवित्रम् इति पुनः
अभिधान सार्थकत्वाय तद्वयपवद्दलपरम् ॥ आज्योत्पवन प्रकरणे तत एव वर्हिषः प्रादेशमात्रे पवित्रे कुरुते ॥ इति गोभिलसूत्रे
पवित्रशब्दस्य द्वयपरत्वात् ॥ नच तत्रापि शंकेतित द्विदल पवित्रद्वयपरम् ॥ प्रादेशमात्र इति ॥ विशेषणावैयर्थ्यात् ॥ अनन्तर्गर्भि
नम् साग्रम् कौशम् द्विदलमेव च ॥ प्रादेशमात्रम् विज्ञेयम् पवित्रम् यत्र कुत्रचित् ॥ इति शंकेति तद्विदलात् एव तद्दलाभावात् ॥
दलत्वराणां तु ॥ पवित्रे स्थो ^ वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ^ पवित्रपते: पवित्रपूतस्य

? पवित्रे स्थो ६ — ? तस्य ते ६

यत्कामहः पुनेनद्धके यम् ।। इति विष्णो र्मनसा पूतेस्थ इति मंत्रद्वयोः द्विवचनोपपत्तये ।। एवञ्च छन्दोगपरिशिष्टेन ।। यद्विशिष्टद्वि
दले पवित्रपदमसंकेसाज्योत्पवनार्थम् यत्तदपि एतावदेव द्विदले स्थिति ।। अनेन प्रागुक्त गोभिलसूत्रोक्तैकदल पवित्रयोः
एकपवित्राभिधानम् ।। तद्देवस्य सवितोत्पुनास्वछिद्रेण पवित्रेण ।। इति मंत्रस्य पवित्रेण इत्येकवचनोपपत्तये ।। अत्र नावाह
नम् नाग्नौ करणम् इति निषेधयोः ।। यौ वा पर्य्यादग्नौ करण पूर्वकालीनम् प्रधान सम्बन्धि श्राद्धसूत्रोद्दिष्ट आवाहन
निषेधते ।। ननु अप्रधान सम्बन्धि ।। पिण्ड पितृयज्ञवदिति अतिदेश प्राप्तम् ।। पिण्डार्थावाहनम् इति ।। एतेन पिण्डार्थ
आवाहननिषेधो मैथिलोक्तो हेयः ।। अत्र अग्नौ करण निषेधेन कृतशेषस्य अलाभे कृतशेषम् दत्वा पात्रमालभ्य जप
तीति ।। पृथिवी इत्यादि स्वाहि सन्त सूत्र प्राप्त ।। पात्रालम्भनस्यापि बाधः ।। अन्नस्याभावात् अमृतमिति मंत्रलिंग विरोधात्
स्वदितमिति तृप्ताः प्रश्न इति त्वमाध्य इति प्रश्ने स्वदितमिति प्रश्नः ।। कुशमय ब्राह्मणेतु प्रतिवचनानुपपत्त्या प्रश्नस्यापि
निवृत्तिः ।। अक्षय्यस्थाने अक्षय्य शब्द स्थाने ।। उपतिष्ठताम् इति प्रयोगः ।। अत्र उपतिष्ठतामिति अनेन अन्नादिकम्

इति अस्य अन्वये ऽस्ति इत्यस्य अन्वयानुपपत्त्या तस्यापि अप्रयोगः ॥ अत एव पितृदयितायाम् अन्नादिकमुत्तिष्ठतामिति लिखितम्
ततश्च प्रेतायाक्षय्यमस्त्विति वृद्धपराशरीयम् ॥ ततो यद्दत्त्वा पुनर्विमानं स्वस्य मुपतिष्ठतामिति मार्कण्डेयपुराणीयश्च ॥ इति
गोभिलविरोधात् शाख्यन्तरीयम् ॥ अभिरम्यताम् वाजे वाजे इति स्थाने अभिरम्यतामित्यनेन विसर्जनम् एतेन प्रेतश्राद्धेषु
तस्यैवा इत्यवगम्यते ॥ इति ॥ तथाच ॥ अभिरम्यताम् स्वस्त्यस्तु विसर्जयेदेवम् सकृत् प्रणववर्जितम् ॥ इति आश्वलायनगृह्य
परिशिष्टे ॥ प्रणववर्जित स्वस्त्यस्तु विसर्जनेन यद्विसर्जनम् तत् प्रेतश्राद्धविषयम् ॥ अभिरम्यतामिति तु सांवत्सरिकवि
षयम् ॥ इति कल्पतरु श्रीदत्त वाचस्पतिमिश्राद्युक्तम् निरस्तम् ॥ इति ॥ वृद्ध्याचारामेव पार्वणेऽभिरम्यतामिति विसर्ज
नस्य प्राप्तत्वात् एकोद्दिष्टेऽपि तत्प्राप्तेः ॥ सर्वशाखिसाधारण निषेधानुपपत्तेश्च ॥ एतदिति पूर्वोक्तकर्तव्यताकम्
श्राद्धमिति सर्वः ॥ प्रेतश्राद्धम् प्रेतस्य श्राद्धम् ॥ ननु पार्वणविकृतित्वेन प्राप्तपितृलोकरूपपितुः श्राद्धम् अकृतसपिण्ड
नस्य तथाविधपितृत्वाभावात् ॥ अत एव न्यायमूलकमेव आश्वलायनगृह्यपरिशिष्टवचनेऽपि लिखितमस्ति ॥

५९ पितृश्राद्धम् न युञ्जीत पितृहा चोपजायते ॥ इत्युक्तम् ॥ एवम् विष्णुनापि ॥ प्रेतस्य नाम गोत्राभ्याम् दत्वाऽक्षय्योदकेष्विति ॥ इत्यत्र
६। प्रेतस्य नाम गोत्राभ्यामिसमेन प्रेतस्येत्युक्तम् ॥ ननु सम्बन्धि न इत्युक्तम् ॥ ततश्च मन्त्रे प्राप्त पितृ लोकोपाधिक पितृपदस्थाने
प्रेत पदोहः ॥ ननु अग्नि ष्वात्तौ ष्वपाधिके ॥ एवमभिलापवाक्येऽपि असम्बन्धित्वेन नोल्लेखः ॥ किन्तु प्रेतत्वेन असम्बन्धितो
ऽत्र ॥ स च ब्राह्मणादेरपि प्रेतक्रियाधिकारित्वात् ॥ अत एव शातातपेन ॥ प्रेतानां नाम गोत्राभ्याम् उत्सृजेत् इत्युक्तम् ॥
अत्र प्रेतस्यान्तः प्रेतान्तः ननु सम्बन्धवाचक स्यान्तः ॥ न वा मैथिल लोकः ॥ अत्र बहुव्रीहि तत्पुरुषापेक्षया बहुव्रीहिर्जघन्य
त्वात् ॥ प्रेत पदस्य सम्बन्धिपद स्थानीयत्वेन तत्पुरुषस्यैव युक्तत्वाच्च ॥ ततश्च प्रेतान्त नामधेयो गोत्रश्चेति द्वन्द्वः ॥ अत एव
तर्पणे विष्णुः ॥ अपः सर्वे शवस्पर्शिनो गत्वा पितृपदस्थाने प्रेत पदोहेन द्वितीयान्तम् तर्पयेयुः ॥ पितृ पदोच्चारणे पितृहा
भवतीति ॥ एतेषां वचनानाम् ॥ न्यायमूलकत्वात् सांवत्सरिक श्राद्धे एकोद्दिष्ट विकृतिभूते प्राप्त पितृ लोकउपाधिक
पितृपदवन्मन्त्रे अभिलापे च पितृ सम्बन्धि बोधक पित्रादि पदेनैवोल्लेखः ॥ एवञ्च देवताभ्यः पितृभ्यश्च इत्यत्र न प्रेत

पदोहः पितृपदस्य दिव्यपितृपदत्वात् ॥ एवम् न एकवचनोहोऽपि ॥ तथा मधुद्यौरस्तु नः पिता ॥ इत्यस्य द्यौः स्वर्गः पिता पितेव
सर्वस्याधिगम्यत्वात् ॥ सर्वन्तु मधुमयी भवत्विति भाष्यव्याख्याने द्यौरिति पितेति पदयोः सामानाधिकरण्यम् प्रतीयते
अत्रञ्च स्तुत्यपितृत्व द्वयोर्भेदेऽपि सामानाधिकरण्यादवगमाद्दिवः पितृसाधर्म्य प्राप्तिरिति पितृपदम् पितृतुल्यपरम् ॥ ननु
जनकपरम् ॥ प्राप्तपितृलोकपरम्वा इति ॥ तेनात्र मंत्रे पितेति वक्तव्यम् ॥ ननु प्रेतपदोहः न चापितृशब्दम् नत्रयुञ्जीत इत्यनेन
निषेधः ॥ एवम् आमावेति मंत्रे पितरि इत्यत्र नोहः ॥ यदहं श्राद्धम् करोमि तदा माता पिता वागच्छताम् ॥ इति अत्र व्रजने क्रियमाने
श्राद्धफलस्य प्रार्थनीयत्वात् ॥ एवम् वृद्धिश्राद्धेष्वपि एतेषु नान्दीमुख विशेषणम् नदेयम् ॥ इति ॥ अन्यत्र मंत्रे उत्सर्गवाक्ये च सर्वत्र
पितृपदनिषेधात् ॥ प्रेतपदोहः कार्य्यः ॥ अत्र एकोद्दिष्टे श्राद्धे ॥ गोभिलेनोक्तो विशेषो अभिधीयते ॥ तथा च विष्णुः ॥ एकवन्मन्त्रा
नूहेतो एकोद्दिष्ट इति ॥ एकवत् एकवचनवत् ॥ यथा स्यात् तथा ऊहेत ॥ अपूर्वोत् प्रेक्षणामूहः ॥ अपूर्वस्य प्रकृतौ अप्राप्त
स्य एकवचनादेः उत्प्रेक्षणाम् विकृत समवाय इति करणाम् ॥ ऊहः उत्प्रेक्षणेन पूर्वप्राप्तैकवचनात् तत्कल्पनेन बहुवचनान्तात्मन्त्रात् ॥

६२ विकृतान्कुर्य्यात् ॥ अत्र एकस्मिन् पितरि बहुवचनस्य असमवेतत्वात् ॥ प्रकृतौ अर्थप्रकाशनार्थं आरब्ध दृष्ट प्रयोजनस्य मंत्रस्य विकृतौ
62 बहुवचनस्थाने एकवचनोहः कर्तव्य ॥ इति न्यायमूलकमिदंवचनम् ॥ इति ॥ यथा पवित्रेस्थो वैष्णव्यौ इत्यत्र पवित्रासि वैष्णवी इति
नचात्र पवित्रमसि वैष्णव्या इति ॥ पितृदयितोक्तम्स्युक्तम् ॥ पवित्रेस्थो वैष्णव्यौ इति मंत्रस्य हे पवित्रे युवां विष्णु देवताःस्थो अर्था
त् विष्णुर्देवताययोस्तौभवथः ॥ स्त्री लिंगत्वम् ॥ वैष्णव्यौ इत्यस्य छन्दसम् ॥ इति सायनाचार्य्यव्याख्याने गुरणा विरणौ रपि तथा व्या
ख्याने ॥ सम्बुद्धि अनन्ता प्रतीतेः ॥ एवम् विष्णुर्मनसा पुतेस्थ इत्यत्रापि पूतमसि ॥ इति ॥ अत्र पितरो मादयध्वम् ॥ यथाभागमावृषा
यध्वम् ॥ इतिर्मंत्रे ॥ अत्र प्रेत मादयस्व यथाभागमावृषायस्व इत्यूहम् ॥ प्रार्थनार्थक छिती येन लकारीय मध्यमपुरुष बहुवचन
स्थाने तदेकवचनस्यैव युक्तत्वात् ॥ ननुभूतार्थ चतुर्थ लकारीय मावृषा यथा ॥ इति अनिरुद्ध भट्टोक्तोयुक्तः ॥ अतएव श्रीदत्तादि
भिरपि मादयस्व इत्युक्तम् ॥ अमीमदन्तः पितरः इत्यत्र अमीमदत प्रेत इति मावृषायिषत इत्यत्र मावृषायिष्टेति एत पितर
इति पिण्डार्थावाहनमंत्रे एहि प्रेत इति सौम्यास इत्यत्र सौम्येति दत्तास्मभ्यामित्यत्र देह्यस्मभ्यामिति नियच्छते त्यत्र नियच्छेति

नमो वः इत्यादिमंत्रेषु पितर इति स्थानचतुष्टये प्रेत इति ऊहम् ॥ एवमत्र वः इत्यत्र ते इति ॥ आशीः प्रार्थने येभ्य इत्यत्र यस्मै इति ॥ तेषां
इत्यत्र तस्य इति ऊहम् ॥ एतद्वः पितरो इत्यत्र तु प्रेता इति प्रकृते ऊहो न बहुवचनस्य एतत्त्वः पितरो वास इति जल्पन् पृथक् पृथक्
इति अहल्पुराणे न ॥ प्रकृतावेव पार्वणे पित्रादिषु प्रत्येकम् एतद्वः पितर इति बहुवचनान्त मंत्रप्रयोगात्तु तत्र आनर्थक्येन तत्
विकृतौ एकोद्दिष्टेऽपि असमवेतार्थबहुवचनस्यैवमुक्तत्वात् ॥ ततश्च प्रकृतौ समवेतार्थस्यैव विकृतौ ऊहः ॥ सांवत्सरिके
पितर इति स्थानचतुष्टये एकवचनस्यैव ऊहः ॥ ननु पितृ पदे ऊहः ॥ पितृपदस्य तत्र प्राप्ते पितृलोकपरत्वेन तस्यैवमुक्तत्वात्
तत्र स्मृतिः ॥ प्रेतश्राद्धे यदुच्छिष्टम् गृहे पर्युषितञ्च यत् ॥ दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन ॥ उच्छिष्टम् पाकपात्रे
अवशिष्टम् ॥ ग्रहे उपरागे ॥ पर्युषितम् स्थितम् ॥ दम्पत्यो रास मस्वामिनो भोजनानन्तरम् ॥ पाकस्था(ल्या)मवशिष्टम्
इति श्राद्धचिन्तामणिः ॥ यत्तु देवल वचनम् ॥ एकोद्दिष्टस्य शेषन्तु ब्राह्मणेभ्यः समुत्सृजेत् ॥ पश्चात् स्वयञ्च भुञ्जीत
पुनर्मंगलभोजनम् ॥ इति ॥ तस्य एकोद्दिष्ट शेषम् ब्राह्मणेभ्यः समुत्सृजेत् ॥ न तु अवशेषयेत् ॥ स्वयंपुन मंगलभोजनम्

६३ अर्थात् पाकान्तरम् कृत्वा भुंजीत ॥ इत्यन्वयः ॥ अत्र अशौचान्तद्वितीयदिने आद्यश्राद्धात् पूर्वकृत्यम् आह देवलः ॥ आद्याहः श्रुति
63 स्मृतिचोदितेषु सुस्नाताः कृतमंगलाः ॥ आश्रुत्यादि प्रभृत्यन्ते ब्राह्मणान् स्वस्तिवाचच ॥ मंगलस्पर्शाः स्वोक्तशान्त्युदकगोभूहिरण्यादि
स्पर्शः ॥ जलादिस्पर्शमाह मनुः ॥ विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् ॥ वैश्यः प्रतोदरश्मीन् वा यष्टिं शूद्रः कृतक्रि
यः ॥ कृतक्रिय इति अशौचकालीनाम् कृतस्नानम् इति मिताक्षरा ॥ आद्याहः श्रुतिचोदितेषु इत्यनेन एकादशाहादेरशौचान्त
द्वितीयाहत्वम् सूचितम् ॥ सुस्नाता इत्यादिना ॥ विप्रः शुध्यत्यपः स्पृष्ट्वा ॥ इत्यादिना च यथाशक्ति समुच्चयविकल्पौ
स्याताम् तेन तत्करणे न वैदिककर्म्महानिः इति बोध्यम् ॥०॥ अथ आद्यश्राद्धमाह याज्ञवल्क्यः ॥०॥ मृताहनि तु कर्त्तव्यम्
प्रतिमासन्तु वत्सरम् ॥ प्रतिसम्वत्सरञ्चैवमाद्यमेकादशेऽहनि ॥ एकादशेऽहनि इति स्वस्वाशौचान्तद्वितीयदि
नोपलक्षणम् ॥ क्षत्रादिः सूतकान्ते तु भोजयेत् अयुजो द्विजान् ॥ इति मत्स्यपुराणैकवाक्यात् ॥ आद्यम् षोडश
श्राद्धानामादिभूतम् ॥ तथा च छन्दोगपरिशिष्टम् ॥ श्राद्धमग्निमतः कुर्य्यात् दाहादेकादशेऽहनि ॥ ध्रुवाणि तु प्रकुर्वन्ति

प्रमीताहनि सर्वदा ॥ द्वादश प्रतिमास्यानि आद्यम् षाण्मासिके तथा ॥ सपिण्डीकरणञ्चैव इत्येतत् श्राद्धषोडशम् ॥
एकाहेन तु षाण्मासा यदा स्युरपि वा त्रिभिः ॥ न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तदा ॥ अग्निमतः श्रौताग्निमतः
दाहादेकादशेऽहनि श्राद्धम् कर्तव्यम् ॥ तस्य दाहावधि दशाह आशौचश्रवणात् ॥ अन्येषां तु मरणावधिः ॥
तथा च शंखः ॥ मरणादेव कर्तव्यम् संयोगो यस्य नाग्निना ॥ दाहादूर्ध्वमशौचम् स्यात् यस्य वैतानिको विधिः
वैतानिकः श्रौतहोमः ॥ तस्मादग्निपदम् श्रौताग्निपरम् ॥ ततश्च केवल स्मार्ताग्निमतो निरग्नेश्च मरणादेवाशौचं
ध्रुवानि एतानि षोडशश्राद्धानि नित्यानि ॥ सर्वदा मृतधनालाभेऽपि प्रमीताहनि मृततिथौ आद्य षाण्मासिक श्राद्ध
द्वयेतर श्राद्धानि कार्याणि ॥ आद्य श्राद्धस्य एकादशाह विधानात् षाण्मासिकयोस्तु वक्ष्यमाण वचने कालान्तराभि
धानात् ॥ अत्र आशौचान्त द्वितीयादिवसीय श्राद्धस्य आदि भवत्वम् समाख्यानुरोधात् ॥ तदुत्तर कर्तव्य मासिके तिथे
र्मृततिथित्वानुपपत्तेः सजातीयत्वम् एव प्रतीयते ॥ तेन प्रथमम् मृततिथिम् विहाय अन्य मृततिथिमादाय

६४ 65 मासिकादिसिद्धिरिति ॥ एवञ्च ॥ एकाहेन तु षण्मासा न्यूनाः इत्यनेनमृततिथेः पूर्वतिथिः प्रतीयते ॥ एवम् त्रिभिरित्यत्रापि ॥ तथा
सम्वत्सरस्यापि एकाहादिन्यूने ॥ अत्र सम्वत्सर कर्त्तव्यस्यपि षण्मासिकत्वम् ॥ द्वितीय षण्मासत्वानानुपपन्नम् ॥ सम्वत्
सरविधानन्तु आदिमध्यादिमासयुक्तः ॥ प्रथमाब्दस्य द्वादशमासाः सम्वत्सरः क्वचित् ॥ त्रयोदशमासाः सम्वत्सर ॥
इति श्रुत्यनुसारेन त्रयोदशमाससम्पादितत्वात् त्रयोदशमास एव द्वितीय षण्मासिक करणाय ॥ तत्र सप्तममासभव
स्यापि षाण्मासिकत्वम् ॥ षष्ठ्यां तु दिवसैर्मासः कथितो बादरायणैः ॥ इत्यनेनाविरुद्धम् ॥ ननु षोडशश्राद्धगणने तु
द्वादशमासिकमुक्तम् कथम् मलमासयुताब्दे त्रयोदशमासिकत्वमिति चेन्न ॥ सम्वत्सरस्य मध्ये तु यदि स्यादधि
मासकः ॥ तदा त्रयोदशम् श्राद्धम् कार्यम् तदधिकम् भवेत् ॥ इति सत्यव्रतवचनेन द्वादशमासिकादधिकम्
त्रयोदशमासिक श्राद्धमित्युक्तेः ॥ एतत् वचनम् न्यायमूलम् ॥ मृताहनि प्रतिमासम् कुर्यात् ॥ मृताहनि तु कर्त्त
व्यम् प्रतिमासन्तु वत्सरम् ॥ इति वचनद्वयेन पूर्वोक्तश्रुतिप्राप्ते त्रयोदशमासात्मकम् सम्वत्सरम् वापि अमृत

तत्र
तिथिर्मृततिथिर्यावच्चान्द्र उक्तमासिकानुरोधेन तत्पक्षीयतिथिषु श्राद्धम् बोधयता त्रार्थापत्त्या वैशाखादि मृतस्याब्द
मासिकम् तन्मासीय तत्पक्षीय तत्तिथौ कर्तव्यम् ॥ इति बोधनात् ॥ मध्ये अधिमासपाते द्वादशमासी मृतमासीय
तिथि अप्राप्त्या वर्षान्तविहितस्य मासिकस्य सपिण्डनस्य च अप्राप्तेः एवमाद्याधिमासेऽपि ॥ अत एव आद्याब्दे
अधिमासपातेऽपि लघुहारीतेन यत् द्वादशमासिकमुक्तम् ॥ तदन्याधिमासे विषयम् ॥ तत्र द्वादशमासे मृत
मासीय मृततिथिप्राप्तेः ॥ यथा लघुहारीतः ॥ प्रत्येकम् द्वादशे मासि कार्या पिण्डक्रिया द्विजैः ॥ क्वचित् त्रयोदशे
ऽपि स्यात् आद्यंतु त्वा तु वत्सरम् ॥ आद्यसपिण्डकरणम् ॥ चक्रवत् परिवर्तेत सूर्य्यः कालवशात् यतः ॥ अतः
संवत्सरम् श्राद्धम् कर्तव्यम् मासचिह्नितम् ॥ मासचिह्नन्तु कर्तव्यम् पौषमाघाद्यमेव हि ॥ यतस्तत्र विधानेन
मासः परिकीर्तितः ॥ दर्शान्त एव ॥ असंक्रान्तेऽपि कर्तव्यम् आब्दिकम् प्रथमम् द्विजैः ॥ तथैव मासिकम् पूर्वम् सपि
ण्डीकरणं तथा ॥ गर्भे वार्द्धुषिके क्लेशे मृतानाम् पिण्डकर्मसु ॥ सपिण्डीकरणे चैव नाधिमासविदुर्बुधाः ॥ इति

६५ सपिण्डीकरणादूर्द्ध्वम् यत् किञ्चित् श्राद्धिकम् भवेत् ॥ इष्टम् वाप्यथवापूर्त्तम् तन्न कुर्य्यान्मलिम्लुचे ॥ पिण्डक्रियासाम्वत्सरिकश्राद्धम्
65 क्वचित् मलिम्लुचस्तादृ आब्दवार्षिकन्तु तत्रयोदशे मासि किन्तु द्वादशमासीत्यर्थः ॥ ननु ॥ यस्मिन् राशौ गते भानौ विपत्तिम्
यान्ति मानवाः ॥ तेषां तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया ॥ इति ॥ सत्यव्रतेन सौरमासविशेषचिह्निते मृताहश्राद्धम् विहितम्
तत् कथन्त्रयोदशे मासि तत्करणे तन्मासीयमृताह एव श्राद्धम् कृतम् स्याद् इत्याह ॥ चक्रवदिति राशिचक्रे चक्रवत् परिभ्रमणात्
सूर्य्यगतेर्मन्दत्वामन्दत्वाभ्याम् कदाचिदेकराशौ भोगसमाप्तौ अपि मृततिथिम् नस्पृशति तिथिद्वयम्वा एकराशौ
स्पृशति ॥ यदा नस्पृशति तदा श्राद्धलोपः स्यात् ॥ यदा चोभयम् स्पृशति तदा संशयः स्यात् ॥ अतः सौरमासचिह्नितं
श्राद्धम् न कर्त्तव्यम् ॥ किन्तु चान्द्रमासचिह्नितम् कर्त्तव्यम् ॥ तथाच लघुहारीतः ॥ इन्द्वग्नी यत्र हूयेते मासादि
सः प्रकीर्त्तितः ॥ अग्निसोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ ॥ तमतिक्रम्य तु यदा रविर्गच्छेत् कदाचन ॥ आद्यो
मलिम्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृतः ॥ तस्मिंस्तु प्रकृते मासि कुर्य्यात् श्राद्धम् यथाविधि ॥ तथैवाभ्युदये

कार्य्यम् नित्यमेकम् हि सर्वदा ॥ शुक्ल प्रतिपदि इन्द्राग्नि यागः कृष्ण प्रतिपदि अग्नी सोम यागः ॥ अमावास्यायाम्
पितृसोम यागः एतेषाम् प्रमाणाम् मलमास न त्वे अनुसन्धेयम् ॥ पुत्ति ॥ यत्र आद्यमध्य समाप्ति कीर्त्तनात् शुक्ल प्रतिपदा
दि दर्शान्त एव मास पदस्य शक्तिः प्रतीयते ॥ ततश्च तथाविधमासमभिधाय ॥ चक्रवदित्यनेन शौरे दोषम् प्रदर्श्य दर्शान्त
एव मासिकम् साम्वत्सरिकम् कार्य्यमित्युक्तम् ॥ तत्र एकस्यास्तिथेः द्विवलोपे उभयोरमावास्त्व ॥ तत्र दर्शान्तस्य अनेक
त्वात् कुत्र श्राद्धमित्यनध्यवसाये सामविशेष चिह्नमाह ॥ पौषमाघ्योरिति ॥ सोपीष्यादि कीदृक् तस्य चान्द्रं वा कथम्
शक्तिरित्यत आह ॥ यतस्तत्रविधानेनेति ॥ विधानेन श्रुत्यादिना ॥ तथा च श्रुतिः ॥ सा वै शारवस्य अमावस्या या रौहिण्या
सम्बध्यते ॥ इत्यत्र वृषराशी भोग्य रौहिणी नक्षत्रयुक्ताममावस्या वैशारवस्येति गोभिलसूत्रात् चन्द्रार्कयोरेक राशस्थवस्था
नम् : प्रतिपादयन्ती श्रुतिश्चान्द्र एव शक्तिम् वोधयतीति ॥ शौर वैशाखे तदसम्भवात् ॥ तथा हि चन्द्र सुर्य्ययोर्यः परः सन्निकर्षः
सा अमावस्या इति गोभिलसूत्रात् चन्द्रर्कयोरेक राश्यवस्थानम् अमावास्येति वृषस्थ रवावेव रौहिणीयुक्ता वैशारवस्य अमा

वस्ययोः सम्भवात् ॥ कस्यचिन्तामणौ व्यासः ॥ मीनादिस्थो रविर्येषामारम्भप्रथमे क्षणे ॥ भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृ
ताः ॥ येषां शुक्लप्रतिपदादिदर्शान्तानाम् आरम्भप्रथमेक्षणे ॥ आद्यक्षणेति रूपं रूपस्य आरम्भस्य आद्यसमये मीनमेषादि
स्थो रविर्भवेत् ॥ अब्दे वर्षे ते शुक्लप्रतिपदादिदर्शान्ताश्चान्द्रमासाश्चैत्रवैशाखादिसंज्ञका द्वादश मासाः स्मृताः ॥ द्वादश इति न पुन
र्मलमासे संज्ञान्तरम् किन्तु चैत्रादि इति ॥ तथा च ज्योतिषे ॥ मिथुनस्थो यदा भानुरमावस्या द्वयं स्पृशेत् ॥ द्वितीयाषाढः
सविज्ञेयो विष्णुः स्वपिति कर्कटे ॥ त्रयोदशापि द्वादशसंज्ञका ॥ इति व्याससंन्प्रोपदेशिको सङ्क्रान्तादि मासे चैत्रादि शक्ति
रभिहिता इति ॥ अनन्तस्य श्राद्धविवेके ॥ मीनादिस्थ रविः प्रारब्ध शुक्लप्रतिपदादि दर्शान्तश्चैत्रादिरिति ॥ एवम
असंक्रान्तमासोऽधिमासः स्फुटः स्यात् ॥ द्विसंक्रान्तमासः [illegible] क्षयाख्यः कदाचित् क्षयः ॥ कार्तिकादित्रये नान्य
दस्यौ तदा वर्षमध्ये अधिमासद्वयं स्यात् ॥ इति ज्योतिषशास्त्रोक्तक्षयमासे ॥ व्यासोक्तलक्षणसंगति
र्मलमासनाम्नो अनुसंधेयम् ॥ मीनादिस्थ इत्यादिव्यासोक्तलक्षणानां संगतिः [illegible] ख्यैव्ला याथेन मलमास

तये उक्ता इति ॥ अप्रसंक्रान्त इति अप्रसंक्रान्तो मलमासे आब्दिकम् प्रथमम् सपिण्डीकरणम् ॥ सपिण्डीकरणमिति
पञ्चम्यर्थे प्रथमा ॥ सपिण्डीकरणात् पूर्वम् मासिकम् प्रेतस्य कर्तव्यम् ॥ ननु सपिण्डीकरणात् परम् ॥ प्राप्तपितृलोकस्य
प्रतिमासविहितम् पार्वणम् कर्तव्यम् ॥ गर्भे गर्भे कृते पुंसवनादौ ॥ वार्द्धुषिके कृते वैश्यानाम् गोभिलाख्यक्रमम् । पिण्डकर्म प्रेतपिण्ड
दानम् पुनः ॥ सपिण्डीकरणाद् ग्रहणम् ॥ मलमासेऽपि सपिण्डीकरणाख्य कर्मार्थम् ॥ अत्र ॥ आवश्यकान्नप्राशनादि कृत्यर्थे
मिसर्थः ॥ श्राद्धमेव श्राद्धिकम् स्वार्थे च कः ॥ यत् किंचिदित्यर्थः ॥ इत्यनेन पार्वणादि सकल श्राद्ध निषेधः ॥ सामान्यतो निषे
धेऽपि मघाश्राद्धस्य प्रति प्रसवमाह ॥ माधवाचार्य्यधृतो यमः ॥ जातकर्म्मणि राय कर्म्मणि नवश्राद्धम् तथैव च ॥ मघात्रयोदशी
श्राद्धम् श्राद्धान्यपि च षोडश ॥ चन्द्रसूर्य्यग्रहे स्नानम् श्राद्धम् दानम् जपो जपः ॥ कार्य्याणि मलमासेऽपि नित्यं नैमित्तिकम् तथा
तथा च ॥ मलमासे मघात्रयोदशी श्राद्धम् ॥ यत्र भाद्रमासस्तत्र सम्भवति आश्विनमासे तदसम्भवात् ॥ त्रयोदश्याम् मघासम्ब
न्धे अमावास्यायाम् एकवस्त्रेण स्नानम् न स्यात् ॥ जातकर्म्मणि जातकर्म्म अन्नप्राशन नामकरण कर्म्मणि मुख्यकाल कर्तव्यानि

६७ 67 अन्यथा नामान्नप्राशनम् चौडम् विवाहम् मौंजीबंधनम् ॥ निष्क्रमम् जातकर्म्मापि काम्यम् वृषविसर्जनम् ॥ असंगते गुरौ शुक्रे बाले वृद्धे
मलिम्लुचे ॥ उपायनमुपारम्भम् व्रतानाम् नैव कारयेत् ॥ इति गर्ग वचन विरोधः स्यात् ॥ अत एव नामान्नजातकर्म्मणा यथा कालमस
माचरेत् ॥ अतिपाते तु कुर्वीत प्रसक्तो मासि पञ्चदे ॥ इति गर्ग वचनम् संगच्छते ॥ निषेधविधौ वृषोत्सर्गस्य काम्य विशेषणा
त्वात् ॥ अशौचान्तम् द्वितीयेऽह्नि यस्य नोत्सृज्यते वृषः ॥ पिशाचत्वम् ध्रुवम् तस्य दत्तैः श्राद्धशतैरपि ॥ इति मैथिलधृत वचन
बोधिताशौचान्तद्वितीयदिनाविहित वृषोत्सर्गः काम्यः इत्यर्थः ॥ इष्टम् अग्निहोत्रादि पूर्तम् वापि प्रपादि ॥ तथा जातूकर्णः
वापीकूपतडागादि देवतायतनानि च ॥ अन्नप्रदानमारामाः पूर्तमित्यभिधीयते ॥ संकल्पपूर्वकमन्नप्रदानमित्यर्थः ॥ अग्नि
होत्रम् तपः सत्यम् वेदानाञ्चानुपालनम् ॥ आतिथ्यम् विश्वदेवस्य इष्टमित्यभिधीयते ॥ नित्यमेकम् हि सर्वदा इति नित्यम्
एकम् केवलम् ॥ नित्यम् अहरहः ॥ क्रियमानम् श्राद्धम् ननितनैमित्तिक पार्वणश्राद्धादि ॥ अत एव नित्यान्नैमित्तिकयोः
मेध्ये नित्यस्य भेदमाह ॥ तथाच ॥ मार्कण्डेयपुराणम् ॥ नित्यम् नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा ॥ गृहस्थस्य च यत् कर्म्म

तन्निशामय पुत्रक॰ ॥ पंञ्चयज्ञाश्रितम् नित्यम् यदेतत्कथितम् मया ॥ नैमित्तिकम् तथाप्यन्यत् पुत्रजन्मक्रियादिकम् ॥ नित्य
नैमित्तिकं ज्ञेयम् ॥ पर्वश्राद्धादि परिगतेः ॥ सर्वदा मलमासे प्रकृतमासेऽपि आद्यश्राद्ध इति कर्तव्यतायाम् ॥ यहृहृपुराणम्
आसन्नोपकल्पेन मंत्रेण विधिपूर्वकम् ॥ मंत्रस्तु अत्रासने देवराजेत्यादि ॥ तथाऽप्रावरणार्थम् तत्र छत्रम् ब्राह्मणेभ्यः प्रदी
यते ॥ पश्चादुपानहौ दद्यात् पादस्पर्शकरे शुभे ॥ संतप्तवालुकाम् भूमी मरुसिकता[illegible]किताम् तथा ॥ संतारयति दुर्गाणि
प्रेतम् यद्दद्युपानहौ ॥ इति तिलोपचारम् ॥ अर्घ्यम् सत्वात्तु विप्रस्य नियतात्मना ॥ नियतात्मना विप्रस्य सम्बन्धेन तिलोपचारम्
कृत्वा अपहता इति मंत्रेण तिलान् विकीर्य नामगोत्रसमुच्चार्य प्रेताय अर्घ्यात् अर्घ्यम् दातव्यम् इत्यर्थः ॥ तदनन्तरम् ॥
आवाहयेदित्यन्वयः ॥ तथाच ॥ नामगोत्रमुदाहृत्य प्रेताय तदनन्तरम् ॥ शीघ्रमावाहयेद्भूमिम् दर्भहस्तोऽथ भूतले ॥ तत्र छत्रम्
प्रेतायदत्तम् छत्रं प्रतीयते ॥ प्रेतमित्यस्य ददेदित्यभिसम्बन्धात् ॥ संतारयति इत्यभिसम्बन्धेन कर्मत्वेव ॥ अपादानम् सम्प्र
दानम् तथाधिकरणम् पुनः ॥ करणम् कर्तव्यताच द्वयोर्योगे परस्मैपदे इति सूत्रे ॥ भूमिमिति पृथिव्याः सम्बोधनम् ॥ आवाहन

६२ मंत्रस्तु ॥ इह लोकम् परित्यज्य गतो सि परमाम् गतिम् ॥ अथ यत्तु स्त्रीश्राद्धे अधिकृत एव पठनीयः ॥ एवमाच्छादिते गन्धपुष्पादीन् समर्पयेत्
६४ गन्धमंत्रस्तु सर्वः सुगन्धः इति ॥ पुष्पमंत्रस्तु श्रियादेव्या इति ॥ धूपमंत्रस्तु वनस्पतिरस इति ॥ दीपमंत्रस्तु ज्योतिः पश्यताम् इति ॥ इदञ्च
गन्धादिसमर्पणम् ॥ प्रेतायगन्धादिदानानन्तरम् ॥ आच्छादनं कार्य्यम् ॥ तत्रादौ लघुहारीतः ॥ सपिण्डीकरणम् यावत् प्रेतश्राद्धानि
षोडश ॥ पक्वान्नेनैव कार्य्याणि सामिषेण द्विजातिभिः ॥ तत्रादौ वृहस्पतिः ॥ वस्त्रालंकारशय्यादम् पितुर्यद्वाहनायुधम् ॥ गन्ध
पुष्पैः समभ्यर्च्य श्राद्धभोक्त्रे निवेदयेत् ॥ भोजनस्यानेकविधिम् कारयेत्स्य ज्ञुतान्नि च ॥ तथाच जाबालः ॥ पितृयज्ञन्तु निर्वर्त्य
मासिके श्राद्ध एव च ॥ श्राद्धम् प्रतिरुच्यौ चैव मातापित्रोर्मृताहनि ॥ असपिण्डीकृतम् प्रेतमेकोद्दिष्टेन तर्पयेत् ॥ पितृयज्ञम्
पितृतर्पणम् ॥ निर्वर्त्ये क्रियमाने श्राद्धे अपरः क्रियमाने इत्यर्थः ॥ तेन अम्बुघटश्राद्धे मृताहविहिते मासिके ॥ तथा विशिष्ट
तीर्थद्रव्यादि प्राप्तौ प्रेतश्राद्धकरणेच्छायाम् मातापित्रोर्मृताहनि च असपिण्डीकृतम् प्रेतम् एकोद्दिष्टेन तर्पयेत् ॥ षोडशश्रा
द्धानाम् पतत्पतितम् तत्र कृष्णैकादश्याम् कर्तव्यम् ॥ श्राद्धविघ्ने समुत्पन्ने मृताहा विदिते तथा ॥ एकादश्याम् प्रकुर्वीत

कृष्णपक्षे विशेषतः ॥ विशेषात् आमावस्यापेक्षया ॥ तस्यापि विघ्न विधानात् यथा हेमाद्रिधृतम् षट्त्रिंशन्मतम् ॥ मासिके चाब्दिके
केह्यह्निः सम्प्राप्ते मृतसूतके ॥ वदन्ति शुद्धिं तत्र कार्य्यम् दर्शेवापि विचक्षणाः ॥ राजमार्तण्डे तु ॥ श्राद्धविघ्ने समुत्पन्ने अन्तरा मृत
सूतके ॥ एकादश्याम् प्रकुर्वीत कृष्णपक्षे विशेषतः ॥ श्राद्धविघ्ने समुत्पन्ने तस्या विहिते दिने ॥ आमावास्याम् प्रकुर्वीत
तदप्येके महर्षयः ॥ तत्र मृतसूतकोपाधानादृष्ट्वा ॥ ऋष्यश्रृंगवचने अशौचपदमेतत्परम् ॥ यत्तु अन्तरा मृतसूतके
अपि एकादश्याम् श्राद्धविधानम् ॥ तत्तदेये ॥ अर्थात् विघ्ने पिण्डदेये पितृणाम् श्राद्धे तु अशौचम् जायते यदि ॥ तदशौच
व्यतीते तु तेषाम् श्राद्धम् प्रतीयते ॥ शुचीभूतेन दातव्यम् या तिथिः प्रतिपद्यते ॥ सा तिथिस्तस्य कर्तव्या न त्वन्या वै कदाचन ॥
इति ऋष्यश्रृंगवचनविरोधात् ॥ अशौचानन्तरदिने मलमासादिरूपविघ्नान्तरे तद् करणीयं बोध्यम् ॥ अत एव श्राद्धविवेके ॥ अ
पारवाशौचाभ्याम् अपि पतितमेकोद्दिष्टमेकादश्याम् अशौचान्ते मलमासे कर्तव्यम् ॥ किन्तु मलमासाव्याप्तकृष्णैका
दश्यामेव सुकरम् ॥ यत्तु जातकर्मणि यत् श्राद्धम् नवश्राद्धम् तथैव च ॥ प्रतिसम्वत्सरम् श्राद्धम् मलमासे पि तत् स्मृतम् ॥ इति

श्रा॰ तत्त्वम्

६९ प्रतिसम्वत्सरम् श्राद्धम् अशौचात् पतितन्तु यत् ॥ मलमासेऽपि तत् कार्य्यम् इति भागुरि भाषितम् ॥ इति ज्योतिष वचनद्वयम् ॥ तत्र पूर्ववच
69 चन शेषार्द्धस्य असंक्रान्तेऽपि कर्त्तव्यम् आब्दिकम् प्रथमम् द्विजैः ॥ इति लघुहारीत वचनैकवाक्यतया अस्यन्ता अधिमासविष
यत्वात् ॥ मलमासे कर्त्तव्य सपिण्डकरणस्य मलमासमृत सांवत्सरिकस्य च एतयोरुपस्थितत्वन्तु मलमासपदसमभिव्याहारात्
एव इत्यर्थः ॥ मलमासमृतानान्तु श्राद्धम् यत् प्रतिवत्सरम् ॥ मलमासेऽपि कर्त्तव्यम् नान्येषान्तु कदाचन ॥ इति कालमाध
वीयधृत पाठान्तर वचनैकवाक्यतया मलमासमृत विषयकत्वाच्च ॥ परवचनेनापि तदुभय श्राद्धस्यैव अशौच पतितस्य
मलमासाभ्यन्तरे कर्त्तव्यता उक्ता ॥ ननु तद्भिन्नस्य अनुपस्थितस्य तस्य च ॥ राजमार्त्तण्डेन एकादश्याम् कर्त्तव्यता उक्तेः ॥ ए
वम् ॥ मृताहे अविदितेऽपि अविज्ञातेऽपि अमावास्यायाम् ॥ आषाढादिवसे वा इति ॥ प्रचेतो वचनोक्तामावास्यापेक्षया विशे
षत्व इत्यनेन कृष्णैकादश्याः प्राधान्यम् प्रतीयते ॥ ननु शुक्लैकादशी अपेक्षया इति मैथिलोक्तम् युक्तम् वाक्यभेदा
पत्तेः ॥ मृतशब्दोऽत्र मृताहः परः ॥ अनिश्चित मरणस्य और्द्ध्वदैहिक अभावात् ॥ इति श्राद्धविवेकः ॥ मृताहनि इत्येव सूत्रे

पाठो मैथिलपाश्चात्यदाक्षिणात्यानाम् ॥ तत्रामावश्यायामिति मलमाससम्बन्धिन्याम् ॥ प्रवासवासरे ज्ञेयम् तन्मासेन्दु
क्षये एव ॥ इति स्मरणात् ॥ इति मिताक्षरा ॥ एतच्च मृतदिनमासयोरज्ञाने वक्ष्यमाणबृहस्पतिवचनात् ॥ मृतमासे ज्ञाते मरणादिनाज्ञा
ने तु तदीयामावास्यायाम् ॥ तथा च हेमाद्रिकालादर्शनिर्णयामृतगच्छवर्द्धमानधृतवचनानि बृहस्पतिः ॥ न ज्ञायते मृताह
श्चेत् प्रोषिते संस्थिते सति ॥ मासश्चेत् प्रतिविज्ञातस्तद्दर्शः स्यान्मृताहनि ॥ मृताहनीत्यत्र यत्कर्तव्यमिति शेषः ॥ प्रोषि
त इति ॥ अज्ञानकारणोपलक्षितम् ॥ मासाज्ञाने तिथि अज्ञाने तु स एव ॥ यदि मासो न विज्ञातो विज्ञातम् दिनमेव हि ॥
तदा मार्गशिरमासि माघे वा तद्दिनम्भवेत् ॥ कालादर्शनिर्णयामृतयोर्मार्गशिर ॥ इत्यत्राषाढक इति पाठः ॥ भविष्य
पुराणे तु मृतदिनमेव तु जानाति मासम् नैव तु यो नरः ॥ मार्गशीर्षे, पवा भाद्रे माघे वा तद्दिनम् भवेत् ॥ एवं मृताहावधारणा
सान्निध्यात् मासविशेषो ग्राह्यः ॥ मृतदिनमासयोरज्ञाने तु बृहस्पतिः ॥ दिनमासौ न विज्ञातौ मरणस्य यदा पुनः ॥ प्रस्थानदिन
मासौ तु ग्राह्यौ पूर्वोक्तया दिशा ॥ इति यथा मरणादिनमासयोरज्ञाने तदुद्ग्रहणम् तयोरेकतरज्ञाने यथा व्यवस्थापितम् तथा।

७० 70 अत्रापि इति तेन प्रस्थानदिनमासज्ञाने तदग्रहणम् ॥ प्रस्थानमासमात्रज्ञाने तदीय अमावास्याग्राह्याः प्रस्थानतिथिमात्रज्ञाने
तु मार्गशीर्षीय तत्तिथिर्ग्राह्या ॥ सन्देहे तु आह यमः ॥ ज्ञातस्य न भवेद्यूर्नायावद्द्वादशवार्षिकी ॥ प्रेतस्य धारणम् तस्य कर्तव्यम्
सूतवान्धवैः ॥ यद् मासि यदहर्यातस्तन्मासि तदहः क्रिया ॥ दिनाज्ञाने तु कुहूस्तस्य आषाढस्याथवा कुहूः ॥ स्यच्च मरण
प्रस्थानदिनमासाज्ञाने श्रवणादितस्य विषयः ॥ प्रभासखण्डे ॥ मृतस्याहर्न जानाति मासमेवापि कथञ्चन ॥ तेन कार्य्यम्
अमावास्याम् श्राद्धम् माघे च मार्गके ॥ कथञ्चन इति मरण प्रस्थानदिनमासरूपेण श्रवणादिनरूपेण च केनापि अज्ञाते
एवञ्च सर्वत्र तन्मासीय कृष्णैकादशी अभावेव अमावास्याग्राह्या ॥ श्राद्धविघ्ने समुत्पन्ने इति वचनात् ॥ अन्यथा तद्वच
नस्य मृताह अविदितत्वस्य विषयानुपपत्तेः ॥ तस्याश्च प्राधान्यम् तद्वचने विशेषतत्त्वेनाभिधानात् ॥ पतिते कादशा
ह्रादि श्राद्धानाम् कृष्णैकादशीकरणं श्राद्धान्तरदिने कर्तव्यतामाह हेमाद्रिधृतो देवलः ॥ एकोद्दिष्टे तु सम्प्राप्ते
यदि विघ्नः प्रजायते ॥ मासेऽन्यस्मिन् तिथौ तस्मिन् दद्यात् प्रयतात्मनः ॥ यद्यपि तस्मिन् तिथौ तत्सजातीय तिथौ इति

प्रोक्तो यान्मासिकाले पतितश्राद्धस्य करणाक्षम् नायाति तथाप्येतद्वचनस्य तदादिकालक्न्यायमूलकतया यान्मासिकालेऽपि तत्करणम्
सिद्ध्यतीति अतएवचान्यत्र कृतापि श्राद्धान्तरदिने कर्तव्यत्वमाह उशनेनस्पष्टीकृतम् ।। उशनश्च लघुहारीत वचने मताह अविदित उ
त्सादिना षान्मासिकसांवत्सरिकश्राद्धमेकादश्याम् विहितम् ।। उपस्थितत्वाद्विघ्नेऽपि तस्यैव श्राद्धस्य एकादश्याम् कर्तव्य
त्वम् प्रतीयते ।। ननु अमावास्याश्राद्धादेरनुपस्थितत्वात् ।। एवञ्च ऋष्यशृङ्गवचने ।। देये पितृणाम् श्राद्धे तु ।। उशनत्रदेय उश
नेन यस्य विघ्नेऽपि अवश्यदेयत्वमुक्तम् तस्यैव अशौचान्तिककर्तव्यम् न तु अमावास्याश्राद्धे ।। तत्र सौचोत्तर प्रशस्त
काल प्राप्ततिथावेव श्राद्धमाह ।। शुचीभूतेन दातव्यमित्यत्र शतीयवत् श्राद्धम् ।। दातुमर्हति अप्रसिद्ध कृत्सनुटो अन्य
त्रापीति ।। अर्हतायिसंधिकृत्य शक्तिच कृत्सा उशनाभ्याम् सूत्राभ्याम् अर्हता विसंधिकरणे कृत्स प्रत्ययः ।। अन्यथा पूर्व
वचन पराद्ध पौनरुक्त्यापत्तेः ।। ततश्च दातव्यम् श्राद्धम् पुन्यकालम् मध्याह्नादिकम् प्राप्य यान्तिथि ।। शुचि
भूतेन प्राप्यते सा तिथिस्तस्य श्राद्धस्य कर्तव्या करणार्हा तत्सन्या कृष्यौकादशी अशौचविघ्ने प्रतीक्षणीया ।। ततश्च ।।

श्रा॰तत्त्वम्

७१ शुचीभूतावत्तद्विहितदिवसीयश्राद्धम् प्रशस्तकालप्राप्ततिथावेव ॥ एवञ्चाशौचान्ते संगवाभ्यन्तरसमाप्ततिथौ मैथिलोक्तम् नयुक्तम् ॥ इति
श्री किन्तु तदुत्तरप्रशस्तकालतिथावेव ॥ ननु अशौचे तु व्यतीते वै इति यमवचनात् ॥ अशौचान्त इति वक्तव्यम् ॥ तथाच श्राद्धचिन्तामणिः ॥
नैवम् यथा मृताहनि तु कर्तव्यम् ॥ इत्यादिना मृताहादेरेव निमित्तत्वेऽपि तत्तिथिविशेषे नैवोल्लेखः ॥ ननु मृताहस्यैवोल्लेखः ॥
यथा वा ॥ तत्र मृताहनि विघ्ने जाते एकादश्यादिरूपेणैव निमित्तत्वे तत्र तथैव एकादश्यादिरूपेणैवोल्लेखः ॥ तथापि अत्र ॥
तदशौचव्यतीत इत्यादिना अशौचान्तविहितश्राद्धे शुचीभूतेन दातव्यम् इत्यादिना श्राद्धप्रशस्तकाले प्राप्ते तिथिविशेषस्यैव
निमित्तत्वात् तथैवोल्लेखः ॥ ननु अशौचान्तत्वेन व्यवहारोऽपि तथा ॥०॥ अथ सपिण्डीकरणम् ॥०॥ तत्रादौ गोभिलः ॥ पूर्णे संवत्
सरे षण्मासे त्रिपक्षे यदहर्वा वृद्धिरापद्यते तदहश्चतुरुदकपात्राणि सतिलगन्धपुष्पोदकानि पूरयित्वा त्रीणि पितॄणाम्
एकम् प्रेतस्य प्रेतपात्रम् पितृपात्रेषु आसिञ्चतीति ॥ ये समानाः सुमनसः पितरो यमराज्ये तेषाम् लोकः स्वधा नमो यज्ञो देवेषु
कल्पताम् ॥ ये समानाः सुमनसो जीवा जीवेषु मामकास्तेषाम् श्रीर्मयि कल्पन्ताम् अस्मिन् लोके शतसमाः ॥ एतेन पिण्डो ७१

पिराडो व्याख्यात इति ॥ पूर्णे सम्वत्सर इति मुख्य कल्पः ॥ तदशक्तौ सम्वत्सरान्ते विसर्जनम् नवममास्यपि स्येके इति पैठीनसि वचनात्
नवमो मासः ॥ तदशक्तौ षष्ठो मासः ॥ तत्रापि अशक्तौ त्रिपक्षः ॥ तत्रापि अशक्तौ प्रथममासस्य अशौचापगमे द्वादशभिर्दिनैः
द्वादश मासिक श्राद्धानि निर्वर्त्य त्रयोदशाहः सपिण्डीकरणकालः ॥ शूद्रस्य द्वादशाहः एवम् मासिकार्थवत् ॥ द्वादशाहे
द्वादशश्राद्धम् कृत्वा त्रयोदशेऽह्नि वा कुर्यात् ॥ वाशब्दस्तु एकाहे द्वादश मासिक सहित सपिण्डीकरणस्य सूचकः ॥ मंत्रवर्जम्
हि शूद्राणाम् द्वादशेऽह्नि ॥ इति विष्णुस्मरणात् ॥ मासिकार्थं यदिति मासिकार्थो मासि मासि क्रियमान श्राद्ध प्रयोजनम् ॥
ये नापि न्याय नादि तदपकर्षम् द्वादशाह क्रियमानम् श्राद्धमित्यर्थः ॥ यत्र तु एकादशमासाभ्यन्तरे अधिमास पातस्तत्र
त्रयोदशादिनेषु त्रयोदशमासिकानि कृत्वा चतुर्दशेऽह्नि सपिण्डनम् कार्यम् ॥ इति सम्वत्सराभ्यन्तरे यदि अधिमासो भ
वति ॥ तदा मासिकार्थम् दिनमेकम् वर्द्धयेत् ॥ इति विष्णुवाक्यात् ॥ शूद्रस्य त्रयोदशसु दिनेषु त्रयोदशमासिकानि कृत्वा त्रयो
दशे सपिण्डीकरणम् इष्ट परिकल्पनात् प्रथममास लोभस्तु प्रथमो पस्थितत्वात् कल्पनाधिकरणम् न्याय इति भावः ॥

७२ 72 एकस्य श्राद्धवृद्धिमासम् नवृद्धिवृद्धिरिति ।। मिश्रोऽस्कम् ह्येयम् ।। तद्युक्तविषय सूत्रे ।। दिनमेकम् वर्द्धयेदिति श्रुतेः ।। श्राद्धाधिक्यमाह
ससभूतः ।। सम्वत्सरस्य मध्ये तु यदि स्यादधिमासकः ।। तदा त्रयोदशम् श्राद्धम् कार्य्यम् तदधिकम् भवेत् ।। इति तत्रापि अशक्तौ प्रथम
मासस्यैकाहम् एव द्वादशमासिक सहितमपि राशीकरण कालः ।। मुख्यम् श्राद्धम् मासिमासि अपर्य्याप्त इत्याम् प्रति ।। द्वादशाहे तथा
कुर्य्यात् एकाहे द्वादशाथवा इति मरीचिवचनात् ।। अत्र द्वादशाह साहचर्य्यात् एकाहे सर्वापकर्षस्तदनुरोधात् एकाहपदम् मावना
दिनपरम् न तु तिथिपरम् तथात्वे सर्वापकर्षो नस्यात् ।। प्रथममासिकस्य मृततिथौ करणात् ।। ननु कथम् प्रथममासस्य
द्वादशाहे सर्वापकर्षः ।। इति चेत् ।। आनन्त्यात् कुलधर्माणाम् पुंसाञ्चैवायुषः क्षयादिति वचनात् ।। मरणाशंकया
प्रथममासस्य द्वादशाहे एव सर्वापकर्षविधानात् ।। अत एव एकाहेऽपि तथा कल्प्यते ।। अपर्य्याप्तौ अशक्तौ क्रतुः
मासद्वयम् प्रति ।। अत्र कल्पे षष्ठमासिकदिने पञ्चममासिकम् कृत्वा अन्यूनषाण्मासिकञ्च कृत्वा षष्ठमासिकम्
कार्य्यम् ।। तदादितदन्तस्येति न्यायात् ।। न तु पूर्वदिने न्यूनषाण्मासिकम् युतक्रमापत्तेः ।। अपर्य्याप्त इत्याम् प्रति इत्यत्र ।।

अपि मृततिथावेव श्राद्धद्वयकरणम् प्रथमषाण्मासिकदिने पञ्चममासिककरणेतु न तत्सम्भवतीति भावः ॥ ननु पतितपूर्वश्राद्धस्य गौण
कालानुरोधेन परश्राद्धस्य मुख्यकालबाधो न ॥ इति ग्रन्थकृता एव तिथितत्त्वे सपिण्डीकरणप्रकरणे लिखितम् ॥ अत्र कामम् प्रथम
षाण्मासिकस्य मुख्यकालबाधेन षष्ठमासिकदिने पञ्चमासिककरणम् प्रतीयते ॥ चेत् सत्यम् ॥ अपकर्षप्रसक्तम् प्रति विधानं
षाण्मासिकमुख्यकालबाधम् विना अनुपपन्नम् ॥ अतो एतद्बाधम् ॥ अन्यत्र तु षाण्मासिकमुख्यकालस्य बाधेन षाण्मासिक
दिन एव तदादि तदन्तस्येति न्यायेन पतितम् मासिककरणम् ॥ अत एव अत्र कल्पे इति कथितम् ॥ तथा पञ्चममासिकमपि पूर्व
दिने मृततिथि अभावात् ॥ एवमपरषाण्मासिकेऽपि एवमेव वाचस्पतिमिश्राः ॥०॥ अथ अपकर्षनिमित्तमाह व्याघ्रः ॥ आ
नन्मात् कुलधर्माणाम् पुंसाञ्चैवायुषः क्षयात् ॥ अस्थिते श्व शरीरस्य द्वादशाहः प्रशस्यते ॥ एतच्च द्वादशाह पदम् ॥ शा
वाशौचान्त तृतीय दिनमात्रपरमिति प्राचीनैर्मैथिलाः कथयन्ति ॥ अजहत्स्वार्थलक्षणया स्वस्वजात्युक्ताशौचान्तदिनी
यदिनमात्रोपलक्षणम् ॥ इति श्राद्धप्रदीप श्राद्धचिन्तामणौ तदुभयमपि अयुक्तम् ॥ द्वादशाहेन वा कुर्य्यादिति ॥ मरीचि

७३ वचनेन द्वादशाहे द्वादश श्राद्धम् कृत्वा त्रयोदशेऽह्नि वा कुर्यात् ॥ इति विष्णु सूत्राभ्याम् एक वाक्यतया द्वादशाह इत्यस्य द्वादशदिन
73 परत्वात् ॥ कुलधर्म्मभ्यो रागमादि सिद्धान्तर भावि नाशसिद्धि: परचक्रभयोत्पन्न म्लेच्छदेशगमनादिभिर्निमित्तै: ॥ अशौचापगमोत्त
रा द्वादशदिनानि षोडश श्राद्धोपकर्ष काल ॥ इति महामहोपाध्याय शूलपाणि व्याख्यातं ॥ मरीचिना एव एकाहे द्वादशेऽथवा ॥ इ
ति सामान्यत एव एकाहविधानाच्च ॥ अतएव एकाह अपेक्षया प्राशस्त्यमपि संगच्छते ॥ अतएव प्रथम मासस्य एकाह एव
द्वादश मासिकसहित सपिण्डीकरणकाल: ॥ इति श्राद्ध विवेक: ॥ अत्र यानि एकाहकर्त्तव्यतया द्वादश मासिक द्वादशदिन
परत्वादेव श्राद्धानि उक्तानि ॥ तानि शूद्रेणापि आद्यमासिकदिन एव कार्य्याणि ॥ नतु आद्यमासिकम् कृत्वा ततपरदिने ॥
एकादश मासिका नीतिकार्य्याणि ॥ इति ज्ञेयम् ॥ एवञ्च तेषामपकर्षे तन्मध्यवर्त्तकाल कर्त्तव्यतया षाण्मासिकद्वय सपि
ण्डीकरणापकर्ष: ॥ सिद्ध इति इति सुधीभिर्भाव्यम् ॥ गोभिलोक्तम् मंगलजनकत्वम् ॥ वृद्धिराशास्यमानम् कर्म्मपुंसवनादि
रापद्यते सन्निहिता भवन्ति तद्दिने सपिण्डीकरणम् ॥०॥ तथाहि ॥ प्रागावर्त्तनादह्न: कालम् विद्यादिति गोभिलगृह्य ७३

सूत्रेण एवं सवत्नादिरूप दृष्टेर्योम दृष्यान्तर्विधानात्॥ सपिण्डी करणस्य अपराह्णे विधानात् तयोरवाधाय॥ अर्थात् मुख्य
कालकरणाय दृष्ट्वा सन्नपूर्वदिने ऽपकर्षः॥ ननु सपिण्डी करणस्य अपराह्णिकत्वे किम्प्रमाणम्॥ इति चेत्॥ अपराह्णेतु पैतृकम्
इति उत्सर्ग वचनम्॥ किञ्च यद्यपि अदन्तकः पूषा पिष्टम् अत्ति सदाचरुम्॥ अग्नीन्द्रेश्वर सामान्यात् तराडुलौऽत्र विधीयते॥
इति छन्दोग परिशिष्ट वचने॥ यथा वहूनामनुरोधात् तराडुल चरुर्नैकानुरोधात् पैष्णावरुः॥ विरुद्धधर्म्म समवाये भूयसाम्॥
स्यात्॥ सधर्म्मकत्वमिति जैमिनि सूत्रात्॥ तद्वदत्रापि वहुदेवताक पार्वणानुरोधात् एकोद्दिष्ट काल वाधः॥ एवम् सम्व
त्सरमध्यकृत॥ सपिण्डीकरणम्॥ तस्मिन् कालेराजेन्द्र तत् श्रणु॥ एकोद्दिष्ट विधानेन कार्य्यन्तदपि पार्थिव॥ इति
विष्णुपुराणीय एकोद्दिष्टांशेनदिति कर्तव्यता परम् ननु तत्कालपरम्॥ सपिण्डी करणस्य एकोद्दिष्टरूप भावे॥ तस्य एको
द्दिष्टस्य इतिकर्तव्यता परम्॥ इतिकर्तव्यत्वञ्च कृतिसाध्यत्वम् तद्धि कालस्य न सम्भवतीति भावः॥ तथाच॥ वशिष्ट
प्रकाश धृतम्॥ श्राद्धद्वयमनुपक्रम्य कुर्वीत सह पिण्डताम्॥ तयोर्पार्वणावार पूर्वमेकोद्दिष्टमथा परमिति॥ एवञ्च शुद्धि

श्री नारक

७४ तथलिखितस्य मन्तकोपाख्यानवत् वृद्धिम् निश्चित्य कृतम् सपिण्डनम् तदानीम् विघ्नेन तदभावेऽपि तदारम्भ कालानन्तरम् ॥ पूर्णा
७५ सम्वत्सरम् वा प्राप्य पितृत्व प्रापकमिति तत्सपिण्डनानन्तरम् ॥ अत्रस्वः कर्त्ता स्मीति निश्चित्य दाता विप्रान् निमंत्रयेत् ॥ इति वत्
निश्चित्य इति ॥ उत्कट कोटिक सम्भवेन उपलक्षणम् ॥ भविष्यत् निमित्तस्य कर्म्मणः प्रसूहार्हत्वात् ॥ एवम् वृद्धि श्राद्धम् ॥ यदर्थम्
कृतम् ॥ तत्कर्म्म चेत् विघ्नेन तद्दिनेन क्रियते तदादिनान्तरेस्व तत्रकर्म्मणि तदंगत्वात् ॥ पुनर्वृद्धिश्राद्धम् कर्तव्यमेव ॥ तथा च ॥ प्रधा
नस्या क्रिया यत्र सांगम् तत्र क्रियते पुनः ॥ तदंगस्याक्रियायान्तु नावृत्तिर्नैव तत्र क्रिया ॥ इति छन्दोगपरिशिष्ट वचनेन सांगकर
णाभिधानात् ॥ हेमाद्रिध्वृतम् ॥ पूर्णे सम्वत्सरे श्राद्धम् षोडशम् परिकीर्तितम् ॥ अत्र षोडश पदम् प्रेत-चरम श्राद्ध परम् ॥ तेनैव
च सपिण्डत्वम् तेनैवाब्दिकमिष्यते ॥ तेनैव ॥ प्रेतत्व परिहारक-चरम प्रेत श्राद्धेन ॥ सपिण्डत्वम् पितृत्वम् ॥ अत्र पूर्ण सम्वत्सर शि०
र् क्रियमाणात् ॥ श्राद्धात् यथोभय निर्वाहस्तथा पञ्चम सपिण्डीकरण श्राद्धादपि उभय निर्वाहात् न पूर्ण सम्वत्सरे आब्दिका
न्तरम् ॥ एवम् पञ्चदश श्राद्धकृतेऽपि अन्याद्यम् ॥ उदकपात्राणि अर्घ्यार्थमुदकपात्राणि अत्र त्रीणि पितृणाम् एकम् प्रेतस्य इति

पाठे तु क्रमदर्शनात् ॥ सर्वत्र छन्दोगानाम् यजुर्वेदिनाञ्च सपिण्डीकरणे प्रेतकर्म्मकरणम् पितृकर्म्मपूर्वकम् ॥ तयोः पार्वणवत् ॥ पूर्व
मेकोद्दिष्टमथापरमिति पूर्वलिखितवचने शब्दार्थक्रमदर्शनात् देवकृत्यपितृकृत्ययोर्मध्ये प्रेतकृत्येन व्यवधानस्य अयुक्तत्वात् ॥
अथ सपिण्डीकरणमुच्यते ॥ संवत्सरमेकम् पिण्डम् समुद्दिश्य संवत्सरान्ते चत्वारि उदकपात्राणि प्रयुञ्जीत ॥ तत्र एकम् प्रेतस्य
त्रीणि पितॄणाम् ॥ इति आश्वलायनदर्शनात् ॥ सर्वशाखिनाम् सपिण्डीकरणे प्रेतादित्वम् मैथिलोक्तम् निरस्तम् ॥ तद्वचनस्य
तत्शाखिपरत्वात् ॥ अर्थात् ऋग्वेदपरत्वात् ॥ किन्तु अर्घदानमात्रे पाठिकक्रमात् शाब्दिकक्रमस्य बलवत्त्वात् ॥ ब्रह्मपुराणे
तु ॥ प्रेतार्घदानानन्तरम् ॥ ततः पितामहादिभ्यः ॥ इति शब्दक्रमस्य अबाधेन अर्घ्यपात्रेषु गन्धपुष्पदानपर्यन्तम् पितृपूर्व
कता ॥ उत्सर्गे तु प्रेतपूर्वकता ॥ तथा च ब्रह्मपुराणम् ॥ चतुर्भ्यश्चार्घपात्रेभ्यः एकम् वामेन पाणिना ॥ गृहीत्वा दक्षिणेनैव पाणि
ना च तिलोदकम् ॥ मध्वाज्य सम्मार्जयित्वा पृथिवीम् ये समाना इति स्मरन् ॥ प्रेतविप्रस्य हस्ते तु चतुर्भागम् जलम् क्षिपेत् ॥ ततः पितामहादि
भ्यस्तामन्त्रेण पृथक् पृथक् ॥ ये समाना इति द्वाभ्याम् तत्जलं तु समर्पयेत् ॥ अर्घम् तेनैव विधिना प्रेतपात्राच्च पूर्ववत् ॥ तेभ्यश्चार्घम्

निवेद्यैव पश्चाद्यथयमाचरेत् ॥ प्रथमम् प्रेतपात्रम् आदौ वामेन अनन्तरदक्षिणेन गृहीत्वा इति सम्बन्धः ॥ ये समाना इति मंत्रद्वयम् ॥
परन्तु प्रेतपात्रस्थम् उत्सृष्टजलम् कुशैरवान्वयेन चतुर्द्धा विभज्य भागमेकम् जलम् प्रेतस्य ब्राह्मणहस्ते क्षिपेत् ॥ दद्यात् ॥ इति
दत्तजलपिण्डयोर्विभागे मंत्रस्य करणत्वमाह शातातपः ॥ निरूप्य चतुरः पिण्डान् पिण्डदः प्रेतनामतः ॥ ये समाना इति
द्वाभ्याम् अर्घ्यन्तु विभजेत् त्रिधा ॥ एष एव विधिः पूर्वं अर्घ्यपात्रे चतुष्टये ॥ ततस्तदनन्तरम् तन्मंत्रैः पितामहादिभेदेन त्रि
रावस्थे यथादिक्षा ॥ इति मंत्रप्रकाशात् ॥ पितामहादि उत्सर्गवाक्येन उत्सृज्य ये समाना इति द्वाभ्याम् मंत्राभ्याम् अर्घ्यजलम्
प्रेतपात्रस्थजलम् तेनैव विधिना प्रत्येकेन पूर्ववत् चतुर्थभागरूपम् प्रेतपात्रात् समर्पयेत् ॥ तेभ्यः पितामहादिभ्यः तन्निस्त्रीणि ति
लोदकरूपम् अर्घ्यम् निवेद्य तत् ब्राह्मणहस्ते प्रक्षिप्य पश्चादाचमेत् ॥ इत्यर्थः ॥ तेन प्रेतब्राह्मणहस्ते उत्सृज्य दत्तस्यैव अ
र्घ्यजलस्य तदवशिष्टजलस्य भागत्रयम् पितामहादिभ्य उत्सृष्ट अर्घ्यजलेषु मिश्रीकरणम् ॥ इति प्रतीयते ॥ अत एव उत्
सृष्टजलस्य मिश्रीकरणादेव दत्तस्यैव प्रेतपिण्डस्य मिश्रीभावः ॥ इति शूलपाणिः ॥ यच्च न चात्र दैवम् योजयेत् ॥ अर्घ्यात् ॥

देवपक्षीय अर्घ्यकाण्डं समाप्य पितृपक्षीय अर्घ्यं कुर्यात् ॥ एवं देवपक्षीय अन्नकाण्डं समाप्य पितृपक्षीय अन्नकाण्डं कुर्यात्
न तु पितृपदार्थे दैवं संयोजयेत् ॥ देवपक्षीय अर्घ्यस्य पात्रपातनादिरूपं किञ्चिदङ्गं कृत्वा पितृपक्षीय अर्घ्यस्य पात्रे पातना
दिरूपं किञ्चिदङ्गं न कुर्यात् इत्यर्थः एवमन्नादावपि ॥ तथा च प्रागेव दैवे अर्घ्यं अन्नादिकं च दत्वा गन्धमाल्यैः पात्रं अर्चयित्वा
कृतशेषं पितृभ्यः पाणिषु दद्यात् ॥ इति ॥ अत्र पितृपदार्थे दैवं न मिश्रयेत् ॥ इति कल्पतरुव्याख्यानानुरोधेन मैथिलोक्तम्
सर्वशाखिनां तथाचरणम् ॥ तन्न युक्तम् ॥ आश्वलायनेन काण्डानुशयस्य उक्तत्वात् ॥ बह्वृचानाम् एव तथात्वं युक्तम्
न तु सामगयजुर्वेदिनो ॥ तयोः सामगयजुर्वेदिनोः पदार्थानुशयस्य उक्तत्वात् ॥ सामगयजुर्वेदिनोः श्राद्धसूत्रे समयतन्त्रे मन्त्रा
दर्शनात् ॥ तत्रैव मन्त्रान्वयः ॥ पितृदयिता दावुक्तः ॥ वस्तुतस्तु ॥ पौराणिकत्वात् दैवतान्यत्वस्य पाठः द्विभागेऽपि मन्त्रा
न्वयो युक्तः ॥ साधारणस्मृतिकारैः शातातपोक्तत्वात् ॥ अत एव मैथिलैरपि तथा लिखितम् ॥ इति ॥ एवं च पार्वणे प्राग्
कृतयजने शेषद्रव्येनैव पिण्डविधानात् ॥ तद्धि कृतौ अपि सपिण्डीकरणे तत्र नियमात् ॥ यदपि शेषाभावे पिण्डनिवृत्तिः ॥

स्वापाति ॥ तथापि यथोक्तवस्तु असम्प्राप्तौ ग्राह्यम् तदनुकारी यत् ॥ यवानामिव गोधूमा व्रीहीनामिव शालयः ॥ इति छन्दोगपरिशिष्टात्
मुख्यालाभे प्रतिनिधिः शास्त्रार्थ इति न्यायाच्च ॥ मध्वादि अभावे गुडादि ग्रहणा यत् ॥ द्रव्यान्तरेणापि पिण्डदानम् ॥ शेषद्रव्यनियम
स्तु ॥ तत्सम्भवे द्रव्यान्तरस्यागाय ॥ अप्र… न्यथा तदंगाभावे कर्म्म वै गुणाय न स्यात् ॥ सकृत्पिण्डक्रिया या तु इति मनूक्ते: ॥ पिण्डस्य
प्रेतपिण्डेन सह मिश्रीकरणात् ॥ यत्रेति सपिण्डकरणं समाख्या सिद्धार्थम् ॥ समाख्या यौगिक अयं यद: ॥ इति उत्तर भाष्यदर्शि
नात् ॥ सुतराम् तत्र तथाचरणम् ॥ अर्थात् ॥ शेषद्रव्याणाम् तदभावे द्रव्यान्तरेणापि पिण्डदानाचरणम् ॥ प्रतिपत्तिरूप कर्म्मा
त्तु एव प्रतिपाद्याभावे तल्लिप्सेति: ॥ अदृष्टजनकत्वे सति द्रव्याश्रितक्रियात्वम् प्रतिपाद्यस्य द्रव्याश्रितक्रियाविशिष्टस्य अ
भावे इतिया यत् ॥ पशुयागेनोहितम् निरस्यति ॥ स्वकृत निरस्यति इति आद्यैरुक्ता ॥ अत एव यत्र वाक्यरूप प्रतिपत्तियागे
ऽपि यज्ञो यस्मिन् वसतीति यत्र वाक्य समाख्यानुरोधेन आस्तृत कुशानाम् विनाशेऽपि कुशान्तर प्रतिनिधिः ॥ भट्टनारा
यणो गोभिलभाष्य उक्तः ॥ प्राक् स्विष्टकृत आवाप ॥ इति गोभिलसूत्रव्याख्यानेऽपि आउक्ते इति आवापः ॥ प्रधानहोमः

सतु स्विष्टकृत्होमात् प्राक् न तु पश्चात् इत्यर्थः ॥ एवञ्च मुख्यहोमस्य कृते यदि चरु नष्टो दुष्टो वा भवेत् ॥ तर्हि तदा अन्यः पाच्य
मुख्ये कृते चरु नाशदुष्टीस्यातां ॥ तदा आज्येनैव स्विष्टकृत्होम इति शरणा ॥ एतेन शेषनाशे पिण्ड निवृत्तिः ॥ इति वाचस्पति
मिश्रोक्तं हेयम् ॥ ननु प्रधानहोमे निष्पन्ने चरौ नष्टे कथम् द्रव्यान्तरेण स्विष्टकृद्धोमः ॥ इत्यत्र ॥ प्रतिपत्ति इत्यादिना तस्य निराकृतत्वात्
अत्र उच्यते ॥ होमस्य इति ॥ कर्तव्यतायाम् स्विष्टकृद्धोम पर्यन्तम् कथयित्वा पुनर्यत् प्राक् स्विष्ट कृत् आवाप इत्युक्तम् ॥ अतः
तस्य द्रव्यान्तरेण अवश्य कार्य्यत्वम् ॥ इति न दोषः ॥ एतेन पिण्ड इति ॥ एतेन अर्घ्य विधानेन पिण्डः पिण्डमिश्री करणप्रकारो
व्याख्यातईउक्तः ॥ तथा च ब्रह्मपुराणम् ॥ अथ तेनैव विधिना दर्भमूले अवनेजनम् विस्तरम् ॥ पितुर्दत्वा तु पिण्डं तु स्थात्
भस्मात् तु पूर्ववत् ॥ दत्वा पिण्डान् पितृभ्यस्तु पश्चात् प्रेताय पार्वतः ॥ तत्तु पिण्डम् त्रिधा कृत्वा आनुपूर्व्या यसन्ततम् ॥ निदध्यात्
त्रिषु पिण्डेषु एवम् संसर्जने विधिः ॥ तम् प्रेतपिण्डम् आनुपूर्व्या पितामहादिक्रमेण संसर्जने प्रेतपिण्डेन सह मिश्रणे ॥
अत्र शेषम् अंगजातम् पार्वणांशे पार्वणेन तुस्यम् एकोद्दिष्टांशे एकोद्दिष्ट तुस्यम् ॥ तथा च भविष्य पुराणम् ॥ जाह्नेयक

७७ तिलैर्युक्तम् कुर्यात् पात्रचतुष्टयम् ॥ अर्घ्यार्थम् पितृपात्रेषु प्रेतपात्रम् प्रसेचयेत् ॥ ये समाना इति द्वाभ्याम् एतज्ज्ञेयम् सपिण्डनम् ॥
77 एतत् परिपाटिका ॥ नित्ये न तु स्यम् शेषम् स्यात् एकोद्दिष्टम् स्त्रिया अपि ॥ नित्येन आवश्यकेन पार्वणांशेन एकोद्दिष्टेन शेषम् मंगल
जातम् तुल्यम् ॥ तत्र मिश्रकरणेन पृथक् पृथक् पिण्डाभावात् ॥ प्रेतपक्षे पिण्डे सपवित्रकुशाग्रकरणपूर्वकम् ॥ ऊर्जम् वहन्ति
इत्यनेन पृथक् गन्धसेचनम् नास्तीति शेषः ॥ एकोद्दिष्टमिति एकोद्दिष्टम् नष्टम् आहितत्वात् सपिण्डीकरणात् उभयपरम् ॥ एतत्
सपिण्डीकरणमेकोद्दिष्टम् स्त्रिया अपि इति याज्ञवल्क्यवचनैकवाक्यत्वात् ॥ तेन श्राद्धेषु मध्ये एतत् श्राद्धद्वयम् स्त्रिया कर्तव्यम्
ननु आभ्युदयिकश्राद्धादि ॥ अत्र वा कर्तरि क्त इति कर्तरि षष्ठी इति कर्तृत्वनियमः ॥ शास्त्रभेदे वृद्धिश्राद्धादि स्त्रीणाम् भोजन
दर्शनात् नभोलत्व नियमः ॥ पितरि पूर्वम् मृते तु नष्टी व्यन्तरे पितामहे प्रपितामहे च मृते यत् कर्तव्यम् ॥ तदाह छन्दोग
परिशिष्टे कात्यायनः ॥ पितुः सपिण्डनम् कृत्वा कुर्यात् मासानुमासिकम् ॥ असंस्कृतौ न संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः ॥
पितरम् तत्र संस्कुर्यात् इति कात्यायनोऽब्रवीत् ॥ पापिष्ठमपि शुद्धेन शुद्धम् पापकृतापि वा ॥ पितामहेन पितरम् कुर्यात्

इति विनिश्चयः ॥ पितुः सपिण्डनं कृत्वा प्रेतीभूतयोरपि ॥ अपि शब्दाद् श्राद्धयोग्रहणम् ॥ पितामहप्रपितामहयोः सतोर्मा
सानुमासिकं प्रतिमासं विहितम् ॥ पार्वणम् पितृ ऊर्ध्वं पितामह प्रभृति ऊर्ध्व प्रपितामहानाम् कार्य्यम् ॥ ननु तयोः सपिण्डनापेक्षा
कर्त्तव्या ॥ ननु सपिण्डनेनासंस्कृताभ्याम् पितामहप्रपितामहाभ्याम् सह पितुः कथं सपिण्डनाख्य संस्कार तस्मात् तदर्थम् ॥ तयोः
सपिण्डीकरणम् अपकर्षणीयम् ॥ पितुरेव वा सपिण्डनम् उत्कर्षणीयम् ॥ इत्यत आह असंस्कृतौ इति ॥ उत्कर्षापकर्षणे कार्य्यौ
इत्यनेन वचनेन उक्तम् ॥ कथम् असंस्कृतेन सह संस्कार इत्यत आह ॥ पापिष्ठमपि इति ॥ पापिष्ठम् अकृत सपिण्डीकरणम् ॥ अत्र
मृते भर्तरि प्रेतीभूते अकृत सपिण्डने सति मातुः सपिण्डनम् प्रेतीभूतेनैव भर्त्रा सहैव ॥ इति पापिष्ठमपि शुद्धेन इत्यनेन तुल्य
न्यायसिद्धम् ॥ इति श्राद्धविवेकः ॥ शुद्धेन कृतसपिण्डीकरणेन पितामहेन पापकृता वा अकृतसपिण्डीकरणेनापि शुद्धम् कुर्यात्
इति शास्त्रनिर्णयः ॥ अतो वचनवशात् अदोषः ॥ यतः ॥ वाचनिके अर्थे न्यायाः नावतारः ॥ इति तात्पर्य्यम् ॥ अत्र मातुः सपि
ण्डनमपि शुद्धेन पित्रा अशुद्धेन वा कुर्य्यात् ॥ इत्यर्थः ॥ पितरि स्थिते सति ॥ असपिण्डीकृतया पितामह्या सपिण्डीकृतया वा

७२ कुर्य्यात् इति शेषः ॥ इति श्राद्धविवेकः ॥ अत्र मातुः सपिण्डने श्वश्र्वार्य्यश्वशुरयोः पिण्डे कुशैराच्छाद्यौ ॥ तथा च गार्ग्यः ॥ पतिनैकेन
78 कर्त्तव्यम् सपिण्डीकरणं स्त्रियाः ॥ सा गता हि मृते नैकत्वम् कुशैरन्तरयन्नपि ॥ नूनं श्वशुरस्याग्रतो यस्मात् शिरः प्रच्छादनं क्रिया
पुत्रैर्दर्भैन साकार्य्या मातुरप्युदपात्रिभिः ॥ मंगलार्थिभिरित्यर्थः ॥ अन्तरयन्तीदुस्मर्थे अन्तरयन् ॥ इति लिंगस्व संतानपुंस्त्वश्रुति
हलायुधः ॥ परवचनम् ॥ गोभिलं श्राद्धसूत्रभाष्यकृतापि लिखितम् ॥ अत एव ॥ अर्थात् स्त्रीसपिण्डने नस्य पत्न्या सहैव
कर्त्तव्यत्वादेव ॥ प्रव्रजिते ॥ पतिते वापि पितरि मृते नापि पितामहादिभिर्मातुः सपिण्डीकरणम् ॥ किन्तु पितामह्यादिभिरेव
स्वेन भर्त्ता सहैवास्याः सपिण्डीकरणं स्त्रियाः ॥ एकत्वम् सा गता यस्मात् चरुमन्त्राहुतिव्रतैः ॥ तस्मिन् सति सुताः कुर्य्युः पिताम
ह्या सहैव तु ॥ इत्यत्र तस्मिन् सति ॥ इति श्राद्धनाह ॥ भर्तृरूपलक्षणम् ॥ अत एव तस्या जीवत्सु जीवन्त्याम् तस्याः श्वश्रूनि
निक्षेपः ॥ इति लघुहारीतवचने ॥ श्वश्रूजीवने तस्याः श्वश्रूः इत्युक्तम् ॥ न तु श्वशुरेण इति क्वचिदपि उक्तम् ॥ पितामह्या
दिभिः मातुः सपिण्डीकरणे पितामहेन पित्रा न्नदानमनुपपन्नम् तस्मै नमः स्वधा इति मंत्रो न पाठ्यः ॥ मंत्रलिंगविरोधात्

अतएव आभ्युदयिके मातृपक्षे छन्दोगानाम् शौदत्तादिभिः मंत्रान्तरम् लिखितम् ॥ नयेचात्रत्वामिति ॥ वस्तुतस्तु आभ्युदयिके
छन्दोगानाम् मातृपक्ष एव नास्ति इति वक्ष्यते ॥ एवञ्च अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रम् प्रसेचयेत् ॥ ये समाना इति द्वाभ्याम्
शेषम् पूर्ववदाचरेत् ॥ एतत् सपिण्डीकरणम् एकोद्दिष्टम् स्त्रिया अपि ॥ इति याज्ञवल्क्येन पार्वणैकोद्दिष्ट विकृतिभूत पुंस
पिण्डनातिदेशात् ॥ तत्र विकृतभूत स्त्री सपिण्डने ऽपि ये समाना इति मंत्रद्वयस्य पार्वणोक्तयेचात्रत्वामित्यस्यच लिंगसम
वेतत्वे ऽपि प्रकृत्यर्थस्य समवेतत्वात् ॥ समवेतम् कृत्वा पाठः ॥ ततश्च मातामहानामप्येवम् ॥ एवमित्यनेन पितरि जीवति यथा
पितामहादित्रयाणाम् श्राद्धम् कर्तव्यम् ॥ तथा मातामहजीवति प्रमातामहादित्रयाणाम् श्राद्धम् कुर्यात् ॥ इत्यर्थः ॥ ततश्च
मातामहानामप्येवम् श्राद्धम् कुर्यात् विचक्षणः ॥ मंत्रोहेण यथान्यायम् शेषाणाम् मंत्रवर्जितम् ॥ इत्यनेन शेषाणाम्
पात्रादीनाम् ॥ यन्मंत्रवर्जनमुक्तम् ॥ तत् ॥ सुखन्ताम् पितरः सुखन्ताम् पितामहा इत्यादि ॥ प्रकृतसूहयोग्य मंत्रवर्जपरम्
प्रकृतौ ऊहः न तु प्रकृतेः ऊहः ॥ न तु लिंगाद्यूह वर्जनपरम् ॥ तथा च मार्कण्डेयपुराणम् ॥ सर्वाभावेस्त्रियः कुर्युः स्वभर्तृनाम

मंत्रकम् ॥ तदभावे च पतिः कारयेत् स्वकुटुम्बवत् ॥ स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतम् ॥ मृताहनि यथान्यायम् नृणाम् यद्व-
दिहोदितम् ॥ स्त्रियोऽत्रा सवर्णोढा अपरिणीता वा इति श्राद्धविवेकः ॥ सवर्णोढायाश्च पुत्रपौत्रप्रपौत्राभाव एव विधानान्तर ॥ यथा
शंखः ॥ पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया ॥ तदभावे च पत्नी स्यात् तदभावे सहोदरः ॥ स्त्रीणामिति तु सम्प्रदानपरम् ॥
स्त्रीकर्तृकस्य पूर्वार्द्धे उक्तत्वात् ॥ एवमेव अमन्त्रकम् उत्कर्षः ॥ इति श्राद्धविवेकः ॥ अत्र स्त्रियः इत्यस्य असवर्णोढा अपरिणीता
परत्वव्याख्या नात ॥ स्त्रीणाम् मंत्रनिषेधोऽपि तत् सम्प्रदानकश्राद्ध एव आगम्यते ॥ न स्त्री सम्प्रदानकमात्रे ॥ इति कल्पतरौ
स्त्रीणामप्येवम् अपि यादृशेन सम्बन्धेन पितृव्यत्वादिनाम् पुंसाणाम् एकादशाहादिश्राद्धम् तादृशेनैव सम्बन्धेन स्त्रीणाम्
एतत् कर्तव्यम् ॥ एतत् व्याख्याने स्त्रीसम्प्रदानकश्राद्धे सुतरां मंत्राः पाठ्याः ॥ याज्ञवल्क्येनापि समंत्रकमेकोद्दिष्टम् सपिण्डनम्
च उक्त्वा एतत् सपिण्डीकरणम् एकोद्दिष्टम् स्त्रिया अपि इत्यनेन स्त्रिया अपि तथैव इत्युक्तम् ॥ मातुः सपिण्डीकरणम् पितामह्या
सहोदितम् ॥ यथोक्तेनैव कल्पेन पुत्रिकाया न चेत् सुतः ॥ अत्र ॥ पुत्रिकायाः पुत्रेण मातृसपिण्डनम् मातामहेन सह कर्तव्यम्

यदि पुत्रिकापुत्रेण न तदापि पिता मया सह इति ॥ तथा च ॥ मातुः प्रथमतः पिण्डम् निर्वापयेत् पुत्रिकासुतः ॥ द्वितीयन्तु पितुस्तस्यास्तृती
यन्तु पितुः पितुः ॥ इति वचनात् ॥ पार्वणे प्रथमतो मातुः पिण्डम् दद्यात् तदनु मातामहस्य तदनु प्रमातामहस्य अनेन मातामहेन
पार्वणोपदेशमुखेन मातामहेन सह सपिण्डीकरणम् ॥ तथा च उशना ॥ पितुः पितामहे यद्वत् पूर्णे संवत्सरे शुभे ॥ मातुर्माता
महे तद्वत् एषा कार्या सपिण्डिता ॥ मातामहे मातामहादित्रये ॥ मातामहे जीवति पितामह्यादिभिः ॥ कुर्यात् ॥ इत्यर्थः ॥ इति
छन्दोगपरिशिष्टेन अपि ॥ यथोक्तेनैव कल्पेन ॥ इत्यनेन मंत्रादिकमतिदिष्टम् ॥ व्यवहारोऽपि तथा ॥ अमंत्रकम् स्त्रीकर्तृकमंत्र
पाठरहितम् ॥ अमंत्रा हि स्त्रियो मताः ॥ इति बोधायनेन सामान्यतो अभिधानात् ॥ न तु ब्राह्मणकर्तृकमंत्रपाठरहितम् ॥ तथा
च वराहपुराणम् ॥ अयमेव विधिः प्रोक्तः शूद्राणाम् मंत्रवर्जितः ॥ अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यते ॥ अत्र मंत्रस्य
इति विशेषणस्य यावदमंत्रव्याप्ति अर्थत्वेन परिभाषारूपत्वात् ॥ अत्र परिभाषा च ॥ प्रकरणेन न नियम्यते न शूद्रस्य स्नान
दानो अपि ब्राह्मणेन मंत्रः पठनीयः ॥ अन्यथा प्रकरणात् एकोद्दिष्ट एव ब्राह्मणस्य मंत्रपाठः स्यात् न तु पार्वणादौ ॥ इति ॥

अमंत्रस्य इति विशेषणोपादानम् ॥ यावदमंत्रव्यापनार्थम् ॥ तेन स्त्रियापि क्रियमाने ब्राह्मणारस्य मंत्रपाठः ॥ तुल्यन्यायाच्च ॥ यदा अर्थः
प्रकाशनार्थम् इष्टम् अर्थक्रमस्य ध्यानादिना भवति तदा मंत्रपाठेन क्वचित् क्षतिः ॥ ब्राह्मणापठितमंत्रस्य दृष्टिमात्रजनकत्वात् ॥
अदृष्टस्य नमस्कारेणाजनितत्वात् ॥ न प्रेतश्राद्धविषयः न च शूद्रकर्तृकमंत्रपाठमात्रविषयः ॥ किन्तु स्त्रीकर्तृकश्राद्धमपि अ
स्य विषयः ॥ पिता इति उपलक्षणम् ॥ मात्रादयोपि यदि स्नेहात् कुर्वन्ति सपिण्डनम् न कुर्युः इत्यर्थः ॥ व्यक्तम् ब्रह्मपुराणे ॥ स्त्रीभि
श्चावरवर्णैश्च श्राद्धम् विप्रानुशासनात् ॥ मंत्रवत् विधिपूर्वन्तु वह्निपाकविवर्जितम् ॥ विप्रानुशासनात् अत्र विप्रपठनात् ॥
मंत्रवत् मंत्रयुक्तम् ॥ वह्निपाकविवर्जितम् ॥ इत्यत्र असवर्णा स्त्रीकर्तृकश्राद्धपरम् ॥ पतिकर्तृकश्राद्धेऽपि पत्न्याः पाकाधिकार
दर्शनात् ॥ तथाच ॥ छन्दोगपरिशिष्ट वचनात् ॥ शाकञ्च फाल्गुनाष्टम्याम् स्वयं पत्न्याऽथवा पचेत् ॥ पत्नीत्वञ्च सवर्णा
याः ज्येष्ठापत्नीति वचनात् ॥ ज्येष्ठमाह मनुः ॥ यदि स्वाश्च पराश्चैव विन्देरन् योषितो द्विजाः ॥ तासां वर्णक्रमेणैव ज्येष्ठं
पूजा च वेश्म च ॥ कुवेरोपाध्यायपद्धतम् ॥ असंस्कृतप्रमीतानाम् स्वपिता श्राद्धमाचरेत् ॥ यदि स्नेहेन कुर्वीत सपिण्डीकरणम् विना

असंस्कृत प्रमीतानाम् अनुपनीतानाम् तानाम्॥ तत्रादौ लघुहारीतः॥ पुत्रेनैव तु कर्तव्यम् सपिण्डीकरणं स्त्रीयाः॥ पुरुषस्य पुनस्त्वन्ये भ्रातृ
पुत्रादयोऽपि ये॥ आदिशब्दस्त्राह्य नाम् स एव॥ औरसेन विहीनायाः स्त्रीयाः नास्ति सपिण्डनम्॥ सपिण्डन विना क्वापि पति
लोकम् न गच्छति॥ इति धर्मविवेकीयम्॥ औरसत्वाविद्धत्वे पुत्रेणैव न तु उपदिष्यातिदिष्ट पुत्रेण इत्यर्थः॥ भ्राता व भ्रातृपुत्रो वा
सपिण्डः शिष्य एव च॥ सह पिण्ड क्रियाम् कृत्वा कुर्यादाभ्युदयम् ततः॥ भ्राता वा इति वा शब्दो भ्रातृ अपेक्षया प्रधानत्वेन प्रधा
नाधिकारिणाम् दौहित्रादीनाम् समुच्चयः॥ अत एव सपिण्डत्वेनैव भ्रातृ भ्रातृपुत्रयोरधिकार संसिद्धौ पृथगुपादानम्
प्राधान्यमस्तापनार्थम्॥ एवञ्च महागुरौ प्रेतीभूते वृद्धिकर्म न युज्यते॥ इति भूल्लपाणिलिखित वचनेन॥ प्रमीतौ पितरौ
यस्य देहस्तस्याशुचिर्भवेत्॥ नापि दैवम् न वा पैत्रम् यावत् पूर्णो न वत्सरम्॥ इति देवीपुराने च प्रेतीभूत मातापितृकस्य
पितुः प्रेतीभूत मातापितृकस्य संस्कार्यस्य च अनूढायाः प्रेतीभूत मातापितृकायाश्च वैदिक कर्मत्व अनर्हत्वेन तत्परि
हाराय॥ यद्वृद्धिरापद्यते॥ इत्यनेन पूर्वदिन सपिण्डनम् कृत्वापि त्रादिपरदिने आभ्युदयम् नामकरणादिकञ्च कुर्यात्

२१ ऊढायास्तु ॥ पतिरेको गुरुः स्त्रीणाम् इति वचनोक्तैकपदेन पत्युरेवम् महागुरुत्वाभिधानात् तत्प्रेतत्वमात्रे तस्याः कर्माधिकारः ॥ तथाच ॥
४। पतिः प्राणप्रदो नित्यम् पतिरेव परा गतिः ॥ पतिरेव परम् ब्रह्म पतिः प्राणाधिकः प्रभुः ॥ सर्वतीर्थमयः स्वामी सर्वदेवमयः पतिः
सर्वपुण्यमयश्चैव पतिरेव महागुरुः ॥ इति विष्णुधर्मोत्तर वचनम् ॥ एवञ्च पितृमात्रोर्महागुरुत्वव्याघातेन तयोर्मरणे ऊढायाः
कर्मानधिकारः ॥ अत्र आभ्युदय सपिण्डनयो रानन्तर्य्य मात्रम् वाच्यप्रत्ययार्थः नत्वेककर्तृत्वमिति ॥ अन्यथा सपिण्डाधिकारि
णयाः पत्न्याः सत्वे आभ्युदयिककर्मिणोः भ्रातुः अर्थात् मृतभ्रातुः तेन संस्कार्यस्य पितृव्यस्येति वाच्यम् ॥ सपिण्डनाधिकारी पतिः ॥
यथा जातिष्वातु पितृणां श्राद्धैः कर्म्म वैदिकमारभेत् ॥ इति शातातप वचने पितृकर्तृक वृद्धि श्राद्धानन्तरमेव पुत्रेण विवाहः क्रियते ॥
ननु पुत्रे श्राद्धान्तरम् क्रियते ॥ अत्र पुरुषस्य नपुंसकत्व इत्यनेन पुत्र वाशिष्ठ्य तस्य सपिण्डने सामान्यतो ऽधिकारः प्रतिपादनात् आभ्युदयं
विनापि पुरुषस्य सपिण्डनम् प्रतीयते ॥ सहपिण्ड क्रियां कृत्वा कुर्य्यादभ्युदयम् ततः ॥ इति सपिण्डनकरणात् पूर्वम् ॥ अभ्युदयाभा
वार्थम् ॥ नत्वभ्युदय सत्वस्यैव सपिण्डीकरणार्थम् ॥ इति यावत् ॥ यानि पञ्चदशाद्यानि अपुत्रस्येतराण्यपि ॥ अन्त्यानि आद्य वर्षे ॥

कर्तव्य पञ्चदशश्राद्धानि ॥ एकस्यैव तु दातव्यम् अपुत्रायाश्च योषितो ॥ इति छन्दोगपरिशिष्टीयम् सपिण्डीकरणोत्तर पञ्चदशश्राद्ध
विधायकम् ॥ ततः शिष्यपर्य्यन्ता सत्वे एतस्य बोध्यम् ॥ उत्तरार्द्धा एकोद्दिष्टविधाने नैव यानि प्राप्तानि प्रत्याब्दिक श्राद्धानि
तानि एव दातव्यानि ॥ उत्सर्पः ॥ अपुत्रायाश्च इति चकारे उक्तम् ॥ दातव्यमिति अनुक्तम् पतिरहितायाः इति च समुच्चिनोति ॥
अपुत्रायाम् मृतायां तु पतिः कुर्यात् सपिण्डनम् ॥ इति पैठीनसी वचनैकवाक्यत्वात् ॥ छन्दोगपरिशिष्टे तु ॥ अपुत्रायाः पञ्च
दशश्राद्धविधानात् ॥ सपिण्डीकरणम् तासाम् पुत्राभावेन विधत्ते ॥ इति मार्कण्डेयपुराणाच्च ॥ बालकपुत्रसत्व एव सपिण्डी
करणम् अन्येनापि कर्तव्यम् ॥ इति ॥ प्रतीयते ॥ बालकपुत्रसत्वे अन्येन कर्तव्यमिति पर्युक्तम् ॥ तत्र प्रतिनिधिविषया नस्वातन्त्र्ये
ण कर्तृत्वम् संस्कारे संस्कार्य्यस्य भिन्नस्य प्रतिनिधिर्विषया कर्तृत्वदर्शनात् ॥ एवम् पतिः कुर्यादित्यत्र अपि पतिः सत्तामात्र
विवक्षितम् ॥ तेन पतिसत्वे अन्येनापि कार्य्यम् ॥ अत्र सर्वासाम् एकपत्नीनाम् एका चेत् पुत्रिणी भवेत् ॥ सर्वास्तास्तेन पुत्रेण
प्राह पुत्रवती र्मनुः ॥ इति वचने सपत्नीपुत्रस्य पुत्रत्वातिदेशेन तत्सत्वेऽपि स्त्रीणाम् सपिण्डनम् ॥ इति मैथिलैरुक्तम् ॥ तन्न:

८१ प्रागुक्तलघुहारीतवचने ॥ पुत्रेणैव इति एवकारेण अप्रतिदिष्टपुत्रनिषेधात् ॥ अत एव तदुत्तरार्द्धे भ्रातृपुत्रोपादानम् संगच्छते ॥
४२ अन्यथा भ्रातृपुत्रस्य यदि एकजाता बहवो भ्रातरश्च सहोदराः ॥ एकस्यापि सुते जाते सर्वे ते पुत्रिणो मताः ॥ इति वृहस्पतिवचने
भ्रातृपुत्रस्य पुत्रत्वातिदेशात् ॥ पितृव्यश्राद्धाधिकारप्राप्ते भ्रातृपुत्रोपादानम् व्यर्थम् स्यात् ॥ पुत्रत्वातिदेशफलन्तु ॥ तत्सर्वे
पुत्रान्तराकरणम् पुन्नामनरकत्राणञ्च ॥ तथाच लघुहारीतः ॥ सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश ॥ पृथक् नैव सुताः
कुर्य्युः पृथक्द्रव्या अपि क्वचित् ॥ प्रेतसंस्कारकर्म्माणि यानि षोडश श्राद्धानि यथाकालन्तु कार्य्याणि तान्यन्यथा मुच्यन्ते ततः
अर्थात् षोडश श्राद्धानि विना तु सर्वः ॥ पृथक्द्रव्या अपि विभक्तधना अपि न पृथक् कुर्य्युः ॥ सुतराम् अपृथक्धनाः पृथक्
न कुर्य्युः ॥ किन्तु अपृथक् कुर्य्युः ॥ तत्र विशेषयति मरीचिः ॥ मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः ॥ बहवः स्युर्यदा
पुत्राः पितुरेकत्र वासिनः ॥ सर्वेषामनुमतम् कृत्वा ज्येष्ठेनैव तु यत्कृतम् ॥ द्रव्येण चाविभक्तेन सर्वैरेव कृतम्भवेत्
पुत्रेण इति अविशेषात् ॥ सर्वेषामधिकारप्राप्ते ज्येष्ठस्य साक्षात् कर्तव्यत्वमाह ॥ बहव इति ॥ ज्येष्ठेनापि सर्वेषाम्

आन्द्यानाम् मतकरणेनैव करणम् भवतु इति मतम् ॥ इति ज्ञानम् कृत्वा विभक्तत्वे द्रव्यसंश्लेषेनच कृतम् ॥ कर्म्म सर्वैरेव कृतम् भवेत् ॥
तदानीम् द्रव्यसंश्लेषेनच द्रव्यसंमिश्रितत्वेनच ॥ तस्मात् द्रव्यम् प्राप्तव्यम् इति कृत्वा कर्तव्यम् ॥ यद्दिने तत्र परिशुध्येति ॥
तदा सङ्करणी भवति ॥ प्रत्यवायी च भवति ॥ ननु तेन श्राद्धान्तरम् कर्तव्यम् ॥ इति श्राद्धविवेक उक्तम् युक्तम् ॥ पृथक्नैव सुताः
कुर्युः ॥ इत्यनेन पृथक्करणेन पर्युदासत्वेन अनधिकारात् ॥ यथाकालमिति ॥ अशौचान्त द्वितीयदिन द्वादशमासमत
तिथि एकाहन्यूनया न्यासद्वितय सम्वत्सरेषु ॥ ननु विधान सामर्थ्यादेव तत्तत्काल प्राप्ते रनर्थकमिदमिति वाच्यम्
तत्तत्कालानाम् द्वादशाह अपेक्षया प्राधान्यबोधनार्थत्वात् ॥ एवम् आनन्त्यात् कुलधर्म्मानाम् पुंसां चैवायुषः क्ष
यात् ॥ अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते ॥ इति ॥ प्रशस्यते इत्यनेन व्याघ्रवचनोक्त कुलाचारः ज्योतिः शास्त्रादि
ज्ञातम् अदिति मरणाशौच पञ्चयादि म्लेच्छदेश गमनाद्यनुसारादेव सपिण्डनापकर्षे द्वादशाह अपेक्षया प्रागुक्त नवम
गौणकाले परिग्रहः ॥ यथाकालम् इत्यनेन गौणकालस्य मध्ये द्वादशाह अपेक्षया प्राधान्येन नवममासादि गौणकालः

परिग्रहः ॥ अपवादस्तु वृद्धिरापस्तम्ब इत्यनेन आवश्यकनामकरणादि वृद्ध्यर्थमेवापकर्षः ॥ ननु आवश्यक इच्छापूर्तादि अर्थापकर्षः
अत एव लघुहारीतेन ॥ नद्यैकाम्यम् यत्कर्म वत्सरात् प्रथमादृते ॥ इत्यनेन काम्यस्यापि अपकर्षः निमित्तात्तु नास्तीति उक्तम् ॥
यदि तु आवश्यक निमित्ते नापकर्षः कृतस्तदा इच्छा पूर्तादिकम् काम्यम् वत्सराभ्यन्तरेऽपि कार्य्यम् ॥ इति श्राद्धविवेकोऽपि एवं
न च नापि दैवम् नच पैत्र्यम् यावत् पूर्णो न वत्सर ॥ इत्यनेन वत्सरे पूर्णो वैध कर्म निषेधेन सह विरोध इति वाच्यम् ॥ या
वत् पूर्णो न वत्सर इत्यनेन प्रेतीभूत महागुरुक नाम वैधकर्म निषेधात् ॥ अन्यथा कृतेऽपि सपिण्डीकरणे कन्यादानादिर्न स्यात्
युक्तिसाम्यात् ॥ यद्यपि गोभिलसूत्रादौ सपिण्डनापकर्षः प्रागुक्तस्तथापि सपिण्डनापकर्षे तत्र पूर्वकर्त्तव्य श्राद्धानामपि
तदादि तदन्तन्यायेन अपकर्षः ॥ सपिण्डीकरणान्ताहि ज्ञेया प्रेत क्रिया बुधैः ॥ इति शातातपवचने प्रेत क्रियायाः सपिण्डी
करणान्तत्वप्रतीतेः ॥ अत्र वृद्धिनिमित्तम् विनापि सपिण्डनापकर्षे पूर्णसम्वत्सर कालम् प्राप्य प्रेतत्व परिहारमाह ॥
विष्णुधर्मोत्तरम् ॥ कृते सपिण्डीकरणे नरः सम्वत्सरात्परम् ॥ प्रेतदेहम् परित्यज्य भोज्यदेहम् प्रपद्यते ॥ वृद्धिनिमित्तक

सपिण्डनापकर्षे कृते तत्क्षणादेव प्रेतत्वम् परिहार्यं तदर्थमेवापकर्षः ।। एवञ्च अन्यनिमित्तापकर्षे वृद्धिकालं प्राप्य प्रेतत्वम् परिहारः ।। तत्कालस्य पूर्णसम्वत्सरत्वादिति कालतुल्यता ।। ०।। अथ साम्वत्सरिकश्राद्धम् ।। तत्रादौ गोभिलः ।। अतः ऊर्द्धम् सम्वत्सरे प्रेताय अन्नम् दद्यात् ।। यस्मिन्नहनि प्रेतः स्यादिति ।। अतः ऊर्द्धम् सपिण्डीकरणात् श्राद्धनिमित्तात् आद्यसम्वत्सरात् ऊर्द्धम् ।। सम्वत्सरे सम्वत्सरे प्रति सम्वत्सरम् इत्यर्थः ।। यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय श्राद्धम् कुर्य्यात् इति ।। व्याघ्रश्च ।। प्रतिसम्वत्सरम् सम्वत्सरञ्चैवमेकोद्दिष्टम् मृताहनि ।। गोभिलव्याख्यानेन ।। एतेन सपिण्डीकरणापकर्षे आद्यसम्वत्सरेऽपि मृताहे श्राद्धान्तरम् कर्तव्यम् ।। इति मैथिलैरुक्तम् हेयम् ।। यत्तमाहमाद्रि ध्वत वचनम् ।। पूर्णे सम्वत्सरे श्राद्धम् षोडशम् परिकीर्तितम् ।। तेनैव च सपिण्डत्वम् तेनैवाब्दिकमिष्यते ।। सपिण्डत्वम् प्रेतत्वम् परिहारकम् ।। आब्दिकम् आद्यैकतृप्तिः ।। अत्र पूर्णसम्वत्सरक्रियमाणश्राद्धात् यथा उभयनिर्वाहस्तथापकर्ष श्राद्धादिष्वपि उभयनिर्वाहात् न पूर्णसम्वत्सरे आब्दिकान्तरम् ।। एवञ्च पञ्चदशश्राद्धे पूर्णेयम् उन्या ।। सम्पूर्णे तु ततो मास

२४ ९५ पिण्डशेषम् समाप[illegible]येत् ॥ इतिवत् ईषत् न्यून सम्वत्सरे ॥ एवम्द्वितीयाब्दे पतितसपिण्डीकरण पक्षे ऽपि न प्रथमाब्दिकान्तरम् ॥ इत्यपि बोध्यं
तथाच मत्स्य पुराणम् ॥ ततः प्रभृति संक्रान्तौ उपरागादि पर्वसु ॥ त्रिपिण्डमाचरेत् श्राद्धं एकोद्दिष्टम् मृताहनि ॥ ततः प्रेतत्व परिहारात्
त्रिपिण्डम्त्रैपुरुषिकम् ॥ निरुपपदम्मृताहशब्दोम्नसम्बन्धिमास पक्षतिथिविशेषपरम् ॥ उपपदात्तु क्वचित् तिथिविशेषमात्र
परम् ॥ यथा एवम् मृताहे प्रतिमासम् कुर्यात् ॥ इत्यादौ शंखः ॥ सपिण्डीकरणादूर्द्धम् यत्र यत्र प्रदीयते ॥ तत्र तत्र त्रयम् कुर्यात्
वर्जयित्वा मृताहनि ॥ अमावास्याम् क्षयो यस्य प्रेतपक्षेऽथवा पुनः ॥ सपिण्डीकरणादूर्द्धम् तस्योक्तः पार्वणो विधिः ॥ अत्र अस्य
एककृष्णपक्षीय अमावास्यायाम् क्षयेऽपि प्रेतपक्षक्षय निमित्तक ॥ इत्यनेन व्याख्यानात् अमावास्या क्षय निमित्तक इत्यनेन
त्रयम् सम्प्रदानानाम् त्रयम् पितृभ्यो दद्यात् इत्यर्थः ॥ मृताह पर्युदासात् निषेधे तस्य प्रतिप्रसवमाह अमावास्यायाम् ॥ इति ॥
प्रेतपक्षोऽत्र पितृपक्षो अश्वयुक कृष्णपक्ष इति ॥ यावत् कृष्णपक्षमात्रम् ॥ कृष्णपक्ष सामान्यपरत्वे अमावास्या पदस्य वैयर्थ्या-
पत्तेः ॥ पितृपक्षम् विशेषयति ॥ हेमाद्रिमाधवाचार्य्यधृतम् नागरखण्डम् ॥ नभो वाथ नभस्यो वा मलमासो यदा भवेत् ॥

सप्तमः पितृपक्षस्यात् अमयैव तु पञ्चमः ॥ अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढी अपेक्ष्या सप्तमपक्षस्य पितृपक्ष
त्वात् तत्र मृतस्यैव प्रेतपक्षत्वम् ॥ ननु मलमास भाद्रकृष्णपक्षमृतस्य ॥ ततश्च ॥ तत्र ॥ अर्थात् मलमास भाद्रकृष्णपक्षे मृतस्य
वर्षान्तरे अश्वयुक्कृष्णपक्षपातित्वे ऽपि तत्र श्राद्धकरणेन पार्वणम् ॥ किन्तु एकोद्दिष्टमिति ॥ अत्र पार्वणो विधिः ॥ पार्वणे
तिकर्तव्यताकैकोद्दिष्टविधिरिति न व्यवर्द्धमानप्रमृतयः ॥ तन्न पूर्ववचनोक्तः त्रैपुरुषिकस्य मृताहे पर्युदस्तस्य पार्वणविधिरित्यनेन
प्रतिप्रसवात् तस्मात् सदैविकम् त्रैपुरुषिकमुक्तम् नवा षट्पुरुषिकम् कर्षूसमन्वितम् अन्वष्टका श्राद्धमुक्तम् उक्तो तथाद्यम्
श्राद्ध षोडशम् ॥ प्रत्याब्दिकमशेषेषु पिण्डाः स्युः षट् ॥ इति स्मृतिः ॥ इतिच्छन्दोगपरिशिष्टेन प्रत्याब्दिक व्यतिरेकेण षट्संख्या
नियमात् ॥ एवं मातामहस्यादि मरणनिमित्तेन मातुरपि प्रत्याब्दिकं पार्वण विधिनैव कर्तव्यम् ॥ अपुत्रा ये मृता केचित्
स्त्रियो वा पुरुषोपि वा ॥ तेषामपि च देयम् स्यात् एकोद्दिष्टम् न पार्वणम् ॥ इत्यापस्तम्ब वचने अपुत्रा इति विशेषणो
पादानात् ॥ सपुत्राणाम् पार्वणाभ्यनुज्ञानात् ॥ एतच्च मातृत्रितय दैवतम् कार्यम् ॥ मात्रे पितामह्यै प्रपितामह्यै च ॥

८५ पूर्ववत् ब्राह्मणान् भोजयित्वा ॥ इत्यन्वष्टकायाम् दर्शनात् ॥ सां वृद्धि कन्यापात् ॥ इत्यर्थः ॥ प्रवसानदिननिमित्तत्वेन पार्वणविधिना
85 छन्दोगैरपि मात्रादित्रिकानाम् श्राद्धम् कर्त्तव्यम् ॥ नयोषिद्भ्यः पृथक् दद्यात् अवसानदिनादृते ॥ इति छन्दोगपरिशिष्टेन
विशेषयत्नः ॥ प्रतिप्रसवात् एवम् सपिण्डीकरणेऽपि ॥ एतच्च मृतयोः पार्वणम् मातापित्रोरेव ॥ तथाच हेमाद्रिधृतम् कात्यायन
वचनम् ॥ सपिण्डीकरणादूर्ध्वम् पित्रोरेवहि पार्वणम् ॥ पितृव्यभ्रातृमातॄणाम् एकोद्दिष्टम् सदैव तु ॥ मातृपदम् सपत्नीमातृ
परम् ॥ सपत्नी इत्यत्र मातृपदस्य राजदन्तादित्वात् परनिपातस्तेन वाक्येन मातृसपत्नीत्यादि न प्रयोज्यम् ॥ किन्तु सपत्नी
मातरीत्यादि ॥ एवम् साग्निकौरसक्षेत्रजाभ्याम् ॥ मृतयोः पार्वणम् कर्त्तव्यम् ॥ औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु ॥ प्रदद्या
मितरे कुर्युः एकोद्दिष्टम् सुता दश ॥ इति जाबालवचनस्य ॥ यत्र यत्र प्रदातव्यम् सपिण्डीकरणात् परम् ॥ पार्वणेन विधा
नेन देयमग्निमता सदा ॥ इति मत्स्यपुराणीक वाक्यत्वात् ॥ ईशनाच ॥ प्रत्यब्दम् दर्शवत् श्राद्धम् साग्नेः कुर्वीत वै द्विजाः ॥
एकोद्दिष्टम् सदा कुर्यात् निरग्निः श्राद्धदः सुतः ॥ अत्र प्रागुक्तएतच्छ्राद्धस्य एकोद्दिष्टत्व अभिधानात् ॥ सान्वत्सरिक

श्राद्धपदे कोद्दिष्टमुक्तम् तत्र प्रेतश्राद्धे धर्म्मग्राहित्वार्थम् ततश्च योज्यत्वात् स्वकार्य्यादिभिर्लाभः ॥ नच यथा प्रेतश्राद्धे पितृपदस्थाने
प्रेतपदोहः ॥ तथा अत्रापि वाच्यम् सांवत्सरिके प्रेतत्वाभावात् तथाविधानुपपत्तेः ॥ एवम् प्रतिसांवत्सरिके सम्बन्धार्थकपदम् ॥
आशीः प्रार्थनम् शेषे भोजनञ्च कर्तव्यम् ॥ यत्तु श्राद्धचिन्तामणौ ॥ एकोद्दिष्टन्तु कर्तव्यम् पाकेनैव सदा स्वयम् ॥ अभावे पाक
पात्राणाम् तदहः समुपोषणम् ॥ इति लघुहारीतवचनात् ॥ यद्यपि पाकपात्राभावः ॥ पाकस्य गत्याभावोपलक्षकस्तथापि
नामश्राद्धम् ॥ किन्तूपोषणमेव तत्र श्राद्धस्थानीयम् ॥ इत्यर्थः ॥ स्वयम् इत्यभिधानात् अपाटवादिनापि ना स्वकाराविकार
पितव्यम् ॥ अतएव उपवासेनैव श्राद्धस्थानीयेन तदकरणप्रायश्चित्तेन रूपेणाप्येतत्कृतया श्राद्धविघ्न इत्यादिवचनात् अपि
नैकादश्यामनुष्ठानम् ॥ इति तन्न पितृत्वेऽरजातत्वेन एकादश्याम् तदनुष्ठानस्य युक्तत्वात् ॥ षोडशश्राद्धाधिकारिणाम् ॥ कस्य
चित् तथात्वे यस्य एतानि नदीयन्ते प्रेतश्राद्धानि षोडश ॥ पिशाचत्वम् ध्रुवन्तस्य दत्तैः श्राद्धशतैरपि ॥ इति यमवचनेन षोडश
श्राद्धाभावे प्रेतत्वपरिहारो नस्यात् ॥ तस्मात् उपवासो न श्राद्धार्थः ॥ किन्तु तदानीन्तना करणे प्रायश्चित्तार्थः ॥ यथा ॥ स्वकाले

२६ कृतसंस्कारे प्रायश्चित्तम् कृत्वा कालान्तरे तत् करणम् ।। तथा अत्रापि तद्दिने उपवासम् कृत्वा एकादश्याम् श्राद्धं कर्त्तव्यम् ।। इति एकोद्दिष्टम्
86 नान्य द्वारा कारयितव्यम् । इति अत्रापि गोत्रजेतरत्वेन विशेषणीयम् ।। न कदाचित् सगोत्राय श्राद्धम् कार्य्यम् ।। असगोत्रजे इति ।। अपि च
कारभि गोत्रजेतरैः श्राद्धम् न कारयितव्यम् ।। इति तु प्रेतश्राद्धं ब्रह्मपुराणात् ।। अत्र हि न असगोत्रजात् तस्य साक्षात् कर्तृत्वम् ।। निषिध्यते
सगोत्राय इति असम्बद्धापत्तेः ।। वैयर्थापत्तेरित्यर्थः ।। तस्मात् गोत्रजै द्वारभूतैः सगोत्राय श्राद्धम् न कार्य्यम् ।। इत्यर्थः ।। तथा च पर्यु
दासपक्षे ।। गोत्रज द्वारा कारयितव्यम् ।। इति असगोत्रजेतरैः कारयितव्यमिति सुव्यक्तमेव ।। प्रसज्यपक्षे तु ।। असगोत्रज इति विशेषणा
स्वरसात् स्वरसात् गोत्रजलाभः प्रेतधर्म्मग्राहित्वात् साम्वत्सरिकमपि तथा इति श्राद्धविवेकः ।। कल्पतरुरत्नाकरयोरुक्तम् ।। स्वगोत्राय इति
पतितम् पतितम् ।। [illegible]यम् आत्मीयम् गोत्रम् यस्य ।। अथवा ।। स्वम् गोत्रं विद्यमानम् यस्य ।। इति कल्पतरु व्याख्यानम् ।। श्राद्धविवेकटीका
कारेणाकृतं कारेणाकृतम् ।। सत्यगोत्रः विद्यमानगोत्र इत्यर्थः ।। यस्मै श्राद्धं कर्तव्यम् तस्य गोत्रे विद्यमाने ऽन्यगोत्रेण संघातान्तरगीते न
तेन श्राद्धम् न कारयितव्यम् ।। इति व्याख्यातञ्च ।। एतन्मते ऽपि उक्तदुहित्रादीनाम् असगोत्रत्वे सगोत्रत्वेऽपि न निषेधः ।।

अपिशब्दात् स्वमनेन च अन्यद्वारा करणे गोत्रजस्य नियमात् । [illegible] दुहित्रादीनाम् सगोत्रत्वाभावेऽपि स्वयम् करणे न दोषः ॥ इति भावः ॥
वस्तुतस्तु तत्पाकेऽपि कर्म्मधारापेक्षया बहुव्रीहि न घटत्वात् ॥ स्वयम् आत्मीयश्च तत् गोत्रजश्च इति तस्मै अन्यगोत्रजद्वारा श्राद्धम्
न कार्य्यम् ॥ इत्यर्थः ॥ अत्र गोत्रम् कुलम् ॥ सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ ॥ इति अमरकोषात् ॥ अतो लघुहारीत वचने
स्वयम् पदम् सगोत्रपरम् ॥ अन्यथा ब्रह्मपुराणोक्तवचने अगोत्रज पद वैयर्थ्यापत्तेः ॥ न च पाकस्याङ्गत्वेन प्रधानतिथिकर्त्तव्यता
नियम इति वाच्यम् ॥ अतोपवासस्नानादौ घटिकैका यदा भवेत् ॥ सा तिथिः सकला ज्ञेया पित्र्ये चापराह्णिकी ॥ इति वचनात्
मुहूर्त्तमात्रलाभेऽपि कर्त्तव्यतोपदेशात् ॥ तदानीम् पाके तदसम्भवात् एवम् एकोद्दिष्टे अंग[illegible] शेषभोजनेऽपि न तन्नियमः ॥
एवम् भविष्यपुराणप्रभासखण्डयोः ॥ मृताहनि पितुर्यस्तु न कुर्य्यात् श्राद्धमादरात् ॥ मातुश्चैव वरारोहे वत्सरान्ते मृता
हनि ॥ नाहम् तस्य महादेवि पूजाम् गृह्णामि नो हरिः ॥ मरीचिः ॥ परिगउता ज्ञानिनो मूर्खाः स्त्रियोऽपि ब्रह्मचारिणः ॥ मृताहं
सम्मतिक्रम्य चाण्डालेष्वभिजायते ॥ इत्याभ्याम् कालमाधवीयधृताभ्याम् सांवत्सरिक श्राद्धस्य मृताह कर्त्तव्यत्वेन आवश्यकत्वात्

२७ 87 भविष्यत्त्वमत्रापि स्वयम् कर्त्तव्यत्वम् सम्भावनाराहित्येन तत्कालात् पूर्वकालेऽपि प्रतिनियन्ते ॥ निक्षिप्याग्नीम् स्वदारेषु परिकल्पर्त्विज
न्यथा ॥ प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरम् क्वचित् ॥ इतिच्छन्दोग परिशिष्टोक्त सायम् प्रातर्होम प्रतिनिधिवत् ॥ एवञ्च प्रति
निधि प्रकरणं च एकादश्याम् क्रियते ॥०॥०॥ अथ आभ्युदयिक श्राद्धम् ॥०॥०॥ तत्रादौ गोभिलः ॥ आभ्युदयिके श्राद्धे युग्मान्
ब्राह्मणान् शयेत प्रदक्षिणमुपचार ऋजवो दर्भाश्च यवैस्तिलार्थः सम्पन्नम् ॥ इति तृप्ति प्रश्नः ॥ दधिबदराक्षतमिश्राः पिण्डा नान्दी
मुखाः पितरः प्रीयन्ताम् ॥ इति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः मातामहेभ्यः प्रमाता
महेभ्यः वृद्ध प्रमातामहेभ्यः प्रीयन्ताम् न स्वधाम् प्रयुञ्जीत ॥ इति ॥ आभ्युदयिके अभ्युदयनिमित्तके अभ्युदय
पुत्रलाभो विवाहादि ॥ इति रितिः ॥ यावत् तदर्थम् श्राद्धम् आभ्युदयिकम् स च भूत भविष्यत् भेदेन द्विविधः तत्र भूतम् पुत्र
जन्मादि भविष्यत् विवाहादि ॥ एवञ्च श्राद्धभेदगणने वृद्धिश्राद्धत्वेन च कर्म्माङ्गत्वेन ॥ यदुभयत्वमुक्तम् ॥ तदुभयमेव
अत्र आभ्युदयिकत्वेन उपात्तम् ॥ तेन अभिलापवाक्ये आभ्युदयिक श्राद्धम् ॥ इति साधवात् प्रयोज्यम् ॥ अत्र यवैस्तिलार्थः

इत्यनेन पार्वणश्राद्धप्राप्तितत्कार्य्यें पर्वविधानात् आभ्युदयिकस्यापि प्रकृतित्वम् प्रतीयते ॥ अन्यथा तिलार्थैः इति उपादानम्
व[redacted] (धर्म) स्यात् ॥ ततश्च पार्वणप्रकृतित्वेन पित्र्ये अयुग्म ब्राह्मणप्राप्तौ तन्निरासाय पितृपक्षे ब्राह्मणस्य युग्मत्व उपदेशः ॥ दैवे युग्म
त्वस्य पार्वणे प्राप्तत्वात् न तदर्थोपदेशः ॥ एवम् ॥ अपसव्यम् ततः कृत्वा पितॄणाम प्रदक्षिणाम् ॥ इति याज्ञवल्क्यवचनेन दैव
कर्मान्तरम् पितृकर्मकरणे प्राप्तवामोपचारनिराशाय प्रदक्षिणमुपचारः ॥ तेन आभ्युदयिके दैवे पित्र्ये च दक्षिणावर्तगमनम्
द्विगुणमृजुत्व निरासाय ऋजुत्वम् उपदेशः ॥ रक्षोघ्न इति तस्मिन्प्रश्ने सम्पन्नम् इति प्रष्टव्यम् ॥ योग्यत्वात् सुसम्पन्नम् ॥ इति
प्रत्युत्तरम् ॥ वक्ष्यमाणछन्दोगपरिशिष्टवचनाच्च ॥ एतच्च दर्भमयब्राह्मणपक्षेऽपि अबाधितत्वात् इति वाच्यम् ॥ दधि
बदर अक्षतादि मिश्रा इत्यनेन दध्यादिमिश्रणमावश्यकम् ॥ अक्षता यवाः ॥ अक्षताश्च यवाः प्रोक्ता भ्रष्टा धाना भव
न्तिते ॥ इति भट्टनारायणवचनात् ॥ अत एव वक्ष्यमाणछन्दोगपरिशिष्टवचने ॥ अक्षताम् अनुक्त्वा यवकर्कन्धुदधिभि
रिति निःसन्दिग्धमुक्तम् ॥ स्वधावाचनादिनिवृत्तये नान्दीमुखाः पितरः प्रीयन्ताम् ॥ इति उपदेशः ॥ अत एव धाम् ॥

२२ वाचयिष्ये ॥ इति पितृपक्षे प्रश्नः ॥ एतत्तु तन्निरुक्तये वदे वदति ॥ आदौ दैवपक्षे नान्दीमुखाः पितरः प्रियन्ताम् ॥ प्रश्नोऽनन्तरं च प्रीयन्तामिति
४४ ततः पितृपक्षे स्वधावाचनमानीयतेन तत्र च प्रमातामहेभ्यश्चेति ॥ चकारनिर्देशेन स्वधोच्यताम् इतिवत् ॥ प्रत्येकम्
एव प्रीयन्ताम् इति पठेत ॥ प्रत्युत्तरं च अस्तु स्वधा इति वत् नान्दीमुखाः प्रीयन्ताम् इति ॥ अत्र नान्दीमुखाः पितर इति ॥ नान्दी
मुखेभ्यः पितृभ्य इति नान्दीमुखानां पितृगणानाम् ॥ इति विष्णुपुराणे ॥ मातामहेभ्यश्च तथा नान्दीवक्त्रेभ्य एव च ॥ इति
ब्रह्मपुराणे च ॥ नान्दीमुखपदश्रुतेस्तत्र विशेषणविशिष्टस्यैव आभ्युदयिकदेवतात्वम् ॥ ततश्च अत्रापि प्रीयन्ताम् ॥ इ
तिवत् नान्दीमुखेभ्यः पितामहेभ्यः इति वाच्यम् ॥ ननु नान्दीमुखविशेषणशून्यम् ॥ पितामहेभ्यः प्रीयन्ताम् ॥ इ
त्यादि पितृदयिता उक्तम् एतत् ॥ नान्दीमुखेभ्यः पितृभ्यः प्रीयन्ताम् ॥ इत्यत्र अन्वितस्य नान्दीमुखेभ्यः ॥ इति ॥ अस्य
पितामहेभ्यः ॥ इत्यादौ अनन्वयित्वेऽपि प्रागुक्तयुक्त्या मासस्य नान्दीमुखविशेषणस्य पितामहेभ्य इत्यादौ अपि
प्राप्तिः ॥ एतेन अत्र मैथिलीकृतम् आता विधानम् अपि निरस्तम् ॥ पार्वणवत् स्वधा प्राप्तेऽपि गन्दिरा स्थाप न स्वधात्वम्

प्रुञ्जीत इति ॥ अत्र च अविशेषात् अभिलापे मंत्रेच स्वधापद निवृत्तिः ॥ अभिलापे नमः इति ब्रूयात् ॥ अमुकामुक गोत्रेभ्यस्तु भ्यम्
अन्नम् स्वधा नमः ॥ इति ब्रह्मपुराणे श्राद्धे स्वधा नमः पदयो स्याग बोधकत्वेन व्यवस्थित विकल्पात् ॥ अत्र आभ्युदयिके स्वधा निषे
धात् न मंत्रवान्वेति ॥ पितृशा अपि अत्र देववत् इत्यनेन अपि पार्वणोक्त विश्वेदेव पदीय नमः ॥ प्रतीयते न तु मे पि लोक स्वह
इति ॥ श्राद्धे तथा प्रयोगमानाभावात् ॥ एवम् अश्वलायनगृह्येऽपि ॥ यवोसीति मंत्रे पुष्ट्या इति श्रुते मंत्रमात्रे स्वधापदस्थाने
पुष्टि पद प्रयोगः ॥ अतएव स्वधा च इति पदस्थाने पुष्टि शब्द वत् इह पितृशा इति पदात् ॥ पूर्ववत् एतत् नान्दीमुखान् इति
इति बहृच कारिका प्रदर्शनार्था ॥ एवम् छन्दोग परिशिष्टे कात्यायनः ॥ कर्मादिषु च सर्वेषु मातरः सगणाधिपाः ॥ पूजनी
याः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥ प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु ॥ अपि वाक्षत पुञ्जेषु नैवेद्यैश्च पृथक्विधैः
कुड्यलग्नाम् वसोर्धाराम् सप्तवारान् घृतेन तु ॥ कारयेत् पञ्च वारान् वा नातिनीचाम् न चोच्छ्रिताम् ॥ आयुष्यानि च शा
न्त्यर्थम् जप्त्वा तत्र समाहितः ॥ षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥ वशिष्ठोक्त विधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः ॥

२९ अतः परम् प्रवक्ष्यामि विशेषो गुरु यो भवेत् ॥ प्रातरामंत्रितान् विप्रान् युग्मान् उभयतस्तथा ॥ उपवेश्य कुशान् दद्यात् ऋजुनैव हि पाणिना ॥ त
४१ थानिपातो नद्धि सव्यस्य जानुनो विध्यते क्वचित् ॥ सदा परिचरेत् भक्त्या पितृणामपत्र देववत् ॥ पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान्
गोत्रनामभिरामंत्र्य पितृणाम् अर्घ्यम् प्रदापयेत् ॥ नात्रापसव्यकरणम् न पित्र्यतीर्थमिष्यते ॥ पात्राणाम् पूरणादीनि दैवेनैव तु कारयेत्
ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्र पवित्रकान् ॥ कृत्वार्घ्यम् सम्प्रदातव्यम् नैकैकस्यात्र दीयते ॥ मधुमध्वीति यस्तत्र त्रिर्जपो मधु
मित्यतान् ॥ गायत्र्यनन्तरम् सोऽत्र मधुमंत्रविवर्जितः ॥ नचाश्नत्सु जपेदत्र कदाचित्पितृसंहिताम् ॥ अन्य एव जपः कार्य्यः
सोमसामादिकस्तथा ॥ सोमसामादिकमंत्रविशेषः ॥ यस्तत्र प्रकरोऽन्नस्य जववारं तिलवारं तथा ॥ उच्छिष्टसन्निधौ सो[illegible] हेऽत्र
दर्भेषु परिकीर्तितः विपरीतकः ॥ सम्पन्नम् इति तृप्ताश्च प्रश्नस्थाने विधीयते ॥ सुसम्पन्नमिति प्रोक्ते शेषम् अन्नम् निवेदयेत्
प्रागग्रेष्वथ दर्भेषु आद्यम् आमंत्र्य पूर्ववत् ॥ अपः क्षिपेत् मूलदेशे ऽवनेनिक्ष्वेति निस्तिलाः ॥ द्वितीयञ्च तृतीयञ्च मध्यदे
शाग्रदेशयोः ॥ मातामहप्रभृतीनाम् एतेषाम् एव वामतः ॥ सर्वेमादनमुद्धृत्य व्यजनेनैरुपस्नेव्यच ॥ एतेन पार्वणे श्राद्धकर्तुर्वा

मेऽप्यास्युदायिके श्राद्धे कर्तुर्दक्षिणे मातामह पिण्डदानम् प्रतीयते ॥ संयोज्य दधि कर्कन्धु दधिभिः प्राङ्मुखस्तत: ॥ अवनेजनवार
पिण्डान् दद्यात् बिल्वप्रमाणकान् ॥ तत्पात्रक्षालने नाथ पुनर प्यवनेजयेत् ॥ उत्तरोत्तर दानेन पिण्डानामुत्तरोत्तरः ॥ भवेदधश्च
आचरणादधरः श्राद्धकर्मसु ॥ तस्मात् श्राद्धेषु सर्वेषु वृद्धिमत्सु इतरेषु च ॥ मूलंमध्याग्रदेशेषु ईषत् शक्तांस्तृणं निर्वपेत्
गन्धादि निःक्षिपेत्तत्पूर्णाम्स्तु ततः आचामयेत् द्विजान् ॥ अन्यत्रापत्र स्वस्यात् यथादि विहितो विधिः ॥ दक्षिणाप्लावने देशे
दक्षिणाभिमुखस्य तु ॥ दक्षिणाग्निषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः ॥ अथाग्रभूमिमासिञ्चेत् सुसुप्रोक्षितमस्त्विति ॥
शिवा आपः सन्त्विति च युग्मान्वै उदकेन च ॥ सौमनस्यमस्त्विति च पुष्पदानमनन्तरम् ॥ अक्षतं चारिष्टं चास्त्विति सद
तानपि दापयेत् ॥ अक्षय्योदकदानं तु अर्घ्यदानवदिष्यते ॥ ष[illegible]ष्ठ्यैव तु नित्यसं तत् कुर्यात् न चतुर्थ्या कदाचन:
प्रार्थनासु प्रतीप्रोक्ते सर्वास्वेव द्विजोत्तमैः ॥ पवित्रान्तर्हितान् पिण्डान् सिञ्चेत् उत्तानपात्रकृत् ॥ युग्मानेव स्वस्ति
वाच्यान् अंगुष्ठग्रहणं सदा ॥ कृत्वा धुर्जस्य विप्रस्य प्रणाम्यानुव्रजेत् ततः ॥ कर्मादिषु वैदिके कर्मादिषु ॥ इति ॥

९० नान्दीश्राद्धानुपितृणां श्राद्धैः कर्म्म वैदिकमारभेत् ॥ इति शातातपवचनात् ॥ सत्यं वैदिककर्म्ममात्रे न श्राद्ध विधायकम् ॥ किन्तु प्रमाणान्तरे
९० ण कर्म्मविशेषप्राप्तस्य आभ्युदयिकस्य पूर्वकर्तव्यत्वमात्रम् विधायकम् गौरवात् ॥ कर्म्मादिष्वेक वाक्यत्वाच्च ॥ रागप्राप्तमात्रत्वेन लौकि
कत्वे नवगृहप्रवेशादौ यत्र श्राद्धम् तत्र प्रवेशे नववेश्मन इत्यनेन वक्ष्यते ॥ अथ [illegible] नवगृहप्रवेशस्य निमित्तस्य क्रियात्वेन
क्षणिकस्यापि नान्दीश्राद्ध यत्र स्वाधिकारात् ॥ संक्रान्तिवत् अभूतभविष्यत्वेन द्विधैव निमित्तत्वात् अभूते भविष्यत्तिथा
गृहप्रवेशे नान्दीमुखाचरणम् ॥ अत्र वृद्धिश्राद्धस्य निरवकाशत्वात् नवयोदश्यादि निषेधः ॥ मातरो गौर्यादयः ॥
तथा च बह्वृचगृह्य परिशिष्टम् ॥ गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमा
तरः ॥ शान्तिः पुष्टि धृतिस्तुष्टिरात्मदेवतया सह ॥ आदौ विनायकः पूज्यो अन्ते च कुलदेवता ॥ ना[illegible]भिधाय भवि
ष्य ॥ पूज्याश्चित्रेऽथवा काष्ठे अरत्नभयपाणयः ॥ मातर इति सर्वासाम् विशेषणाम् ॥ अत एव एतत् पाठ्यम् ॐ
गौर्य्यै [illegible]न्त्रै नमः ॥ इति प्रयोगः ॥ एता मातरो लौकमातरो ज्ञेया ॥ अत एव एतयो वंकृत्वेन निर्देशः ॥ पूजयन्ति ॥

अस्थुदयद्दानेन प्रीणयन्ति इत्यर्थः ॥ शुभ्रासुरजनस्फाटिकादिमयीषु ॥ लिखिता श्चित्रिता ॥ आदिशब्दात् भित्यादिषु ॥ अक्षत
पुञ्जेषु यवपुञ्जेषु ॥ पृथक् विधैः नानाप्रकारैः ॥ वसोश्चेदिराजस्य ॥ वसोर्धारामिति ॥ वसोर्धाराभिपातेन ॥ इत्यादिदर्शनात्
अलुकसमासे नैव प्रयुज्यते आयुष्याणि आयुषे हितानि ॥ आयुषे मे पवस्व इत्यादीनि शान्त्यर्थम् ॥ आस्युदयस्य अनिष्टनिरस
नम् ॥ षडष्टः इति उपादानम् छन्दोगानाम् ॥ मातृश्राद्धस्य पूर्वम् स्यात् पितृणाम् तदनन्तरम् ॥ ततो मातामहानाञ्च एवं श्राद्धत्र
यम् भवेत् ॥ इति शातातपोक्तमातृश्राद्धसुदेशार्थम् ॥ सपत्नीकपितः सपत्नीकपितामहः ॥ इत्यादिना स्वस्वभर्तॄंश्च तो उद्दिश्य
दीयते यत्पिण्डम् तत् मातृभ्यस्तद्दशेभ्यः ॥ इति परार्थं समर्थानाम् ॥ अतएव अत्रैव छन्दोगपरिशिष्टेन ॥ यस्माम् एव
पिण्ड इति कर्तव्यता वदन्ते ॥ गोभिलसूत्रेऽपि पित्रादि वद्ध प्रमातामहानाम् उल्लेखः ॥ एतम् नमात्रादीनाम् ॥ त
योषिद्भ्यः पृथक् दद्यात् अवसानदिनादृते ॥ स्वभर्तृपिण्डमात्रेभ्यः तृप्तिरासां यतः स्मृता ॥ इति छन्दोगपरिशिष्टेन
वृद्धादौ योषित् श्राद्धस्य पर्युदस्तत्वम् ॥ अथ अवसानदिनेतर एव अत्र योषिद्भ्योऽपृथक् दद्यात् ॥ येन अवसानदिने

९१ तत्र ॥ छन्दोगानाम् ॥ योषितां श्राद्धस्य अपृथक्त्वम् विधीयते ॥ तन्मते अवसानदिनादर्वाक्ते इत्यस्य वैयर्थ्यमनास्तीति ॥ तथा
७। हि अवसानदिनादर्वाक्ते इति यदि नोक्तम् तदा अवसानदिने कथम् न श्राद्धस्य अपृथक्त्वम् ॥ अन्वष्टकासु इति वचनेन अ-
वसानदिने पृथक् श्राद्धविधानात् ॥ वरम् योषिद्भ्यः इति वचनात्पुपुराणे समानार्थकम् ॥ इति चेत् ॥ न ॥ अवसान
दिने छन्दोगयोषितां श्राद्धस्य पृथक्त्वविषये ॥ ध्रुवाणि तु प्रकुर्वीत ॥ इति छन्दोगपरिशिष्टवचनान्तरेण सह पौन-
रुक्त्यापत्तेः ॥ इति स्मार्तेन तन्मतेः पृथक्पदेन अन्वयो न विधीयते ॥ किन्तु छन्दोगेनान्वयः ॥ यतः स्वभर्तुः पिण्डांशेभ्यः
उभयउद्दिश्य पृथक् दत्तेभ्यः एव योषिताम् ॥ तृप्तिः पुरुषाणाम् योषित् जीवनादौ पृथक् पिण्डादपि तृप्तिसत्वात् योषित्पदम्
अपि सार्थकम् ॥ इति वाच्यम् ॥ तथात्वे अवसानदिनादर्वाक्ते इति व्यर्थम् स्यात् ॥ तथा हि ॥ परिप्राप्ते योषितां श्राद्धे
अपृथक्त्वम् विधीयते ॥ किं स्यात् पृथक् श्राद्धम् विशिष्टम् विधीयते ॥ नाद्यः ॥ अमावास्यादौ योषित्दानाप्राप्तौ कथम्
तदनूद्य अपृथक्त्वमात्रविधानं च अमावास्यायाम् पितृभ्यो दद्यात् ॥ इत्यत्र प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु —

विष्णुपुराणीयेन ॥ योषितामपि पितृत्वात् श्राद्धप्राप्तिरिति वाच्यम् ॥ पितृभ्यो दद्यात् ॥ इत्यत्र पितृपदम् न प्राप्तपितृलोकमात्रपरम् ॥ किन्तु पितृपिता
मह प्रपितामह परम् ॥ असावेतत्ते यजमानस्य पित्रे ॥ असावेतत्ते यजमानस्य पितामहाय ॥ असावेतत्ते यजमानस्य प्रपितामहाय ॥ इति
श्रुत्यैकवाक्यत्वात् ॥ तथा शास्त्रं इदं कर्म कार्य्यम् त्रिषु पिण्डः प्रवर्त्तते ॥ चतुर्थः सम्प्रदातैषाम् पञ्चमो नोपपद्यते ॥ इत्यनेन पितृपिता
पितामह प्रपितामहानाम् पत्नीनिरपेक्षाणाम् तर्पणवत् देवतात्वावगमाच्च ॥ मातामहादिष्वप्येवम् ॥ पितरो यत्र पूज्यन्ते तत्र
मातामहा ध्रुवम् ॥ अविशेषेण कर्तव्यम् विशेषात् नरकम् व्रजेत् ॥ इति याज्ञवल्क्य वाक्यात् ॥ मातामहादि इति तदादि त्रिकप
रम् ॥ इत्यादि बहुवचनानागणस्य संसूचकाः इत्युक्तेः ॥ श्राद्धेतिकर्तव्यतायाम् मातामहादि त्रिक उपादानात् च ॥ न अन्यः ॥
तथाह अवसानदिनान्करते इति व्यर्थम् स्यात् ॥ अवसान दिने तु ॥ ध्रुवानि तु प्रकुर्वीत प्रमिताहनि सर्वदा ॥ इति छन्दोग परि
शिष्टेयेन स्त्रीपुंसयोः साधारणत्वेन श्राद्धप्राप्त्या सर्व●शाखाप्रति अयम् ॥ एकम् कर्मेति न्यायात् ॥ न च परिशिष्टोक्तत्वेन यजु
र्वेदिपरम् ॥ इति वाच्यम् ॥ सर्वशाखा साधारणा शाखा ॥ यत्नेन आम्नातम् ॥ अर्थात् यत्न कल्पितम् ॥ स्वशाखायाम् परोक्तम् अवि

९२ रोधिच्च ॥ विद्वद्भिस्तादनुष्ठेयम् अग्निहोत्रादिकर्म्म वत् ॥ इति छन्दोग परिशिष्टाच्च ॥ स्त्रीणामप्येवम् एव एतत् एकोद्दिष्टमुदा
हृतम् ॥ मृताहनियमान्यायम् नराणाम् यदुत उद्दोदितम् ॥ इति मार्कण्डेयपुराणीयेन । विशेषतः श्राद्धमाम्नाय ॥ विशिष्ट
विधानत्वम् अनुपपत्तेः ॥ नच एवम् पारिशाखिका विरोधित्वम् ॥ सर्वकर्म्मानुष्ठाने प्रशक्तिरिति वाच्यम् ॥ अविरोधिच्च इति
चकार कांक्षितस्यैव लाभात् ॥ अतएव अनाकांक्षिते उक्त परिशिष्टम् ॥ वह्वल्पमथवा स्वगृह्योक्तम् यस्य कर्म्म प्रकीर्त्तितम्
तस्यतावति शास्त्रार्थे कृते सर्वं कृतम् भवेत् ॥ यस्य उ यत्र कर्म्मवेदिनः ॥ तस्मात् अवसानदिनात् कृते ॥ इति वाक्यस्य सार्थ
कत्वाय पथक पदमात्रम् अनुवादः ॥ नच वै परीत्यम् तथात्वे वाक्यानुवादः स्यात् ॥ अत्र वाक्यम् तिङ्सुबन्तचयो वाक्यम्
अव्ययपदस्य अनुवादे तु विभक्तेर्नानुवादकत्ता इति ॥ अव्यय पद विभक्तेरसत्वात् कथनाभावः ॥ एवमेव ईशानन्यायाच्चार्थः
तस्मात् ॥ श्राद्धम् सपिण्डनम् कार्य्यम् स्वसूत्रोक्त विधानतः ॥ अन्वष्टकासु वृद्धौ च गयायाञ्च क्षयाहनि ॥ मातुः श्राद्धम् पृथक्
कुर्य्यात् अन्यत्र पतिना सह ॥ वृद्धि श्राद्धे तु मात्रादि गयायाम् पितृपूर्वकम् ॥ इति तीर्थ चिन्तामणिधृत वायुपुराणीयेन ॥१०॥

एकान्वष्टका अवसान दिने गया निमित्तक श्राद्धकरणेषु छन्दोगेतरो अवसानदिने तत्र वृद्ध्यादौ योषिद्भ्यः पृथक् श्राद्धप
अन्नम् दद्यात् ॥ अवसानदिने तु ॥ छन्दोगः अछन्दोगः उभयोः योषिद्भ्यः दद्यात् इत्यर्थः सिद्धम् ॥ ततश्च वृद्ध्यादौ छन्दो
गयोषितामधायम् तृप्तिः ॥ इति आकं ह्याम् उत्थाप्य उत्तराधेन अन्वयः ॥ इति एतदर्थम् एव ॥ स्वसूत्रोक्त विधानत इत्युक्तं
सूत्र इति स्पष्ट शास्त्रपरम् ॥ अन्यत्र अमावास्यादौ पतिना सह श्राद्धम् भोज्यम् कुर्यात् इत्येव अर्थः ॥ तथाच पत्युरेव श्राद्धम्
कुर्यात् तेनैव मातुः तृप्तिः ॥ इत्यर्थः ॥ अमावेतनो इति यजमानस्य पित्रे ॥ इति प्रागुक्त श्रुत्या श्राद्धे पत्नी निरपेक्ष पित्रादि त्रिक
वौधिकया सपिण्डीकरणात् ऊर्ध्वम् यत्र पितृभ्यः प्रदीयते ॥ सर्वेष्वंशसह रामा ता इति धर्मेषु निश्चयः ॥ इति स्मृत्या भर्तृदत्ता
अंशभागित्व वौधिकयाच एकवाक्यत्वात् ॥ एतेन षड्भ्यः इति जीवन् मातृ विषयम् ॥ इति रूपाय[illegible]धीकम् निरस्तम् ॥ इति
जीवन्मातृकेन छन्दोगेतरेण पितामह्यादीनाम् श्राद्धम् क्रियते ॥ जीवन्तम् इति दद्याद्धि प्रेताया जोदके ~~कृत्~~ द्विजः ॥ इति
छन्दोगपरिशिष्टात् जीवन्तम् इत्यत्र निमित्तम् उद्दिश्य विशेषणाभावेन पुंस्त्वम् अविवक्षितम् ॥ अत एव सपिण्डीकरणे

६३ लघुहारीतेनापि कथितम् ॥ स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः ॥ एकत्वं सा गता यस्मात् चरुमन्त्राहुतिः व्रतैः ॥ तस्मिन्
९३ सति सुताः कुर्युः पितामह्या सहैव तु ॥ तस्याश्चैव तु जीवन्त्यां तस्याः श्वश्र्वेति निश्चयः ॥ इति ॥ तदनु आयुष्यजपानन्तरम् ॥ श्राद्ध
दानम् श्राद्धीयद्रव्यदानम् ॥ इति वशिष्ठोक्तं ॥ इति छन्दोगपरिशिष्टे पार्वणश्राद्धविधिः उक्तः सोऽत्र आमिषपदासेन मत्स्यमांस
पदासेन बोद्धव्यः ॥ यत्तु मधुमांसाभ्यञ्जनेति याज्ञवल्क्यीयादौ ब्रह्मचारिणो निषेधे ॥ सन्नियोगशिष्टत्वात्त्र मांसनिषेधे मधु
निषेधउक्तम् ॥ निरामिषश्राद्धस्य शेषघटितापिण्डानाम् ॥ पिण्डांस्तु दधिमध्वक्तानि इत्यादिना तदन्यकरूप विशेषणमात्रा
भिधानात् ॥ अत्र फलचमसन्यायेन मधुप्राप्तिर्न किन्तु विशेषणमात्राभिधानात् मधुप्राप्तिरिति द्वैतनिर्णयमतम् ॥ इति ॥
श्राद्धे मधुप्राप्तिरिति द्वैतनिर्णये उक्तमयुक्तम् ॥ शाल्यन्नं दधि मध्वक्तं बदराणि यवांस्तथा ॥ मिश्रीकृत्य चत्वारि पिण्डान्
श्रीफलसन्निभान् ॥ इति ब्रह्मपुराणवचनेन पिण्डघटकान्नस्य दधिमध्वक्तत्वेन पिण्डस्य च सर्वस्मात् प्रकृतात् अन्नात् उक्तत्वेन
श्राद्धशेषद्रव्यकर्तव्यता फलचमसन्यायेन श्राद्धान्नेऽपि मधुप्राप्तिः एवमेव श्राद्धप्रदीपे वर्द्धमानोपाध्यायः ॥ तत्र ॥

तन्मायश्च ॥ राजन्यवैश्यकर्तृके ज्योतिष्टोमे फलचमसम् अस्मै भक्ष्यम् ददातीति श्रुत्या ऋत्विग्भक्ष्यत्वेन फलचमसस्य विधा
नात् ऋत्विग्भक्ष्यस्यस्य च यज्ञशेषद्रव्यकत्वेन ॥ तत्सिद्धये यज्ञेऽपि फलचमसन्यायस्य लाभो भवति ॥ फलचमस[illegible]श्च दधि
मिश्रम् वटत्वक्चूर्णम् ॥ इति अत एव मधुजपो ह्योन्नात् सर्वान्नान्तरम् मधुवाता ऋतायत्यादि जपश्च आभ्युदयिके मधुसत्वात् ॥
मधुप्रकाशकत्वात् ॥ दृष्टार्थकः ॥ अन्यथा अदृष्टार्थकता मा आपतेः ॥ तत्तु व्यक्तम् आह गोभिलभाष्यकृत् यशोधर वचनं
कृत्वा नान्दीमुखः श्राद्धम् दधिमध्वाज्यद्रव्यकम् ॥ अन्नञ्च प्राशयेत् अन्नम् पत इति अभिमन्त्रितम् ॥ गोभिलेन अनुक्तस्य
अपि अन्नप्राशनस्य अनेन आभ्युदयिकश्राद्धवत्त्वम् प्रतीयते ॥ प्रातरामन्त्रितान् ॥ इति पूर्वदिन निमन्त्रण निरासार्थम् ॥
युग्मान् इति युग्मनिरासार्थम् ॥ उभयतः पितृपक्षे मातामहपक्षे च दैवपक्षे युग्मत्तमस्य पार्वणे प्राप्तत्वात् ॥ तथा च ॥
पार्वणवत् उदङ्मुखीकृत्य ब्राह्मणान् उपवेश्य वक्ष्यमाण प्रकारेण कुशान् दद्यात् ॥ कर्तुस्तु न पार्वणवत् दक्षिणामुखत्वम्
किन्तु प्राङ्मुखत्वम् एव ॥ पिण्डदाने तथा दर्शनात् ॥ एवञ्च आभ्युदयिके ॥ युग्माः ब्राह्मणाः समूलाः दर्भाः प्राङ्मुखेभ्यः

श्रीं तत्सत्

९४ उदङ्मुखो दद्यात् ॥ उदङ्मुखेभ्यः प्राङ्मुखो वा दद्यात् ॥ इति आश्वलायनसूत्रेऽपि द्वितीयकल्पाभिधानम् ॥ छन्दोगपि
९५ तृपक्षपरम् ॥ न च तत् देवपक्ष पितृपक्ष उभयसाधारणम् ॥ छन्दोगपरम् इति वाच्यम् ॥ आभ्युदयिके छन्दोगानाम् ॥
अपि देवपक्षस्य पार्वणातुल्यत्वात् ॥ यच्चात्र विश्वेदेवार्थम् विप्राः पूर्वम् निमंत्रिताः ॥ प्राङ्मुखानि आसनानि स्युस्तेषां द्विदर्भ
उपहितानि च ॥ इति देवलोक्त सर्वशाखिगोचर सामान्यविधानम् ॥ संकोचे हेतु अभावे ॥ किञ्च यथा पार्वणे छन्दोगेतरेषां
ब्राह्मणानाम् युग्मत्व प्राङ्मुखत्वयोः कर्तुरुदङ्मुखस्य च दैवप्राप्तत्वेन विधि अभावात् ॥ पितृपक्षस्य च विधानम् ॥ तथा च छन्दो
गानामपि तत् तथा पितृपक्षस्य साहचर्यात् ॥ पार्वणप्राप्त ब्राह्मणानाम् उदङ्मुखत्वम् अनूद्य पितृपक्ष एव कर्तुः प्राङ्मुख
त्वमात्रम् विधायकम् ॥ एतेन छन्दोगानाम् देवब्राह्मणस्य उदङ्मुखत्वम् मैथिलैरुक्तम् निरस्तम् ॥ अन्यथा विधि
अननुवादापत्तेः ॥ प्राङ्मुखेभ्यः उदङ्मुखो दद्यात् इति पूर्वार्द्धस्य देवपक्षपरत्वम् ॥ किन्तु अत्र वसुसत्यो देवतात्वम् ॥ इति विशेषः
पितृपक्ष एक मधु मंत्र वर्जनञ्च ॥ करकुशानां देवतीर्थेन न तु पितृतीर्थेन सव्यस्य वामस्य देववत् दक्षिणजानुपातनेन प्रागग्रकुश

उपयुक्तासनेन च ॥ पूर्वम् अङ्गुहस्तेन कुशदानम् कथितम् ॥ तत् सम्प्रदानम् ॥ दान प्रकारम् आह ॥ पितृपक्षेभ्य इतीति ॥ इत्यनेन गोत्र
नामभिरामंत्र्य इति ॥ प्रक्रमस्य मान प्रकारेण पितृभ्यो दत्तेषु कुशेषु तान् ब्राह्मणान् उपवेश्य गोत्र नामभिः पितृरूण सम्बोध्य अर्घ्यम्
प्रदापयेत् इत्यर्थः ॥ अपसव्यम् प्राचीन वीतिलम् ॥ न अत्र किंतु उपवीतित्वम् ॥ पित्र्यम् तीर्थम् तर्जनी अंगुष्ठयो र्मध्यरूप
तीर्थम् नात्र किंतु अंगुष्ठाग्ररूपम् दैवतीर्थम् ॥ पात्राणाम् अर्घ्य पात्रादीनाम् ॥ आदिशब्दात् आसनादीनाम् दानम् ॥ दै
वेन तीर्थेन इति शेषः ॥ ज्येष्ठोत्तरकरान् ज्येष्ठस्य पंक्ति श्रेष्ठस्य करस्य उत्तरे उपरि करो येषाम् ते तथोक्ताः ॥ कराग्र पवित्र
कान् ॥ इति कराग्रे अग्र पवित्रम् पवित्राग्रम् येषाम् ते तथोक्ताः ॥ न एकैकस्य इति न एकैकम् ॥ पित्रादि सम्बन्धि ब्राह्मणस्य
नतु तथा पार्वणे ॥ एकस्य पितृ ब्राह्मणस्य हस्ते ॥ तथाह ॥ परस्य पितामह ब्राह्मणस्य हस्ते ॥ तथा प्रपितामह ब्राह्मणस्य हस्ते
दीयते तथा अत्रापि ॥ इति बोध्यम् ॥ एतेन पितृ ब्राह्मणयो हस्तस्य उपरि उत्तराग्रम् पवित्रम् दत्वा अर्घ्यम् उत्सर्गात्म
कृत्वा एवमेव पितामहादीनाम् पश्चानाम् एकैकशो द्वयोर्द्वयो ब्राह्मणयोर्हस्ते दद्यात् ॥ इति पितृ दयितोक्तम् निरस्तम् ॥

९५ एवम् कराग्राग्र पवित्र कत्वम् आस्वदपिके विशेष इति प्रापाति ॥ तथाच एतत् पैपरीत्यम् पार्वणात्स्यात् इति चेत् नचएवम् ॥ मिलित
 हस्तोपरि पवित्रदानम् अभिधाय नैकैकस्यात्र दीयते ॥ इति यत्र पुनरभिधत्ते ॥ तेन ज्ञापयति इदमेव ॥ अर्थात् मिलित
हस्तोपरि पवित्रदानमेव अत्र विधीयते ॥ कराग्राग्र पवित्र कत्वम् अनुध्यते ॥ इति कस्य प्रदीपोक्तम् अपि निरस्तम् ॥ नैकैकस्य
अत्र दीयते ॥ इति अभिधानम् विना पित्रादि त्रय ब्राह्मणानाम् मिलितहस्तोपरि दानम् अनुपपत्त्या नैकैकस्य अत्र दीयत इत्यस्य
पुनरभिध्यानानुपपत्तेः ॥ नैकैकस्य इत्यादि यत्र पुनरभिधत्तेः तेन ज्ञायते [illegible] तस्य अनुपपत्तेः ॥ नच ज्येष्ठोत्तरकारत्वेन
एव मिलित हस्तालाभः ॥ पात्रे अन्नादि यव विकरणानन्तरम् दत्वा अन्नमधु दत्वा सप्रणव व्याहृतिकाम् गायत्रीम् मधुवाता
मन्त्र वर्जित ॐ मधु मधु मधु इति जप्त्वा अन्नोत्सर्गानन्तरम् कृत्वा जलगण्डूषम् दत्वा गायत्रीम् मधुवाता इति ऋक त्रयम्
मधु मधु मधु इति च पठेत् ॥ इति निष्कर्षः ॥ ज्येष्ठोत्तरकारत्वस्य पित्रादि प्रत्येकस्य ब्राह्मणाद्यपेक्षयापि सम्भवात्
तथात्व अनुपपत्तेः ॥ कराग्राग्र पवित्रस्यापि पार्वणेकेनापि अनुक्तत्वेन आस्वदपिके अनुवादानुपपत्तेश्च ॥ तस्मात् ९५

ज्येष्ठोत्तरकरस्य धराग्राग्र पवित्रकलस्य पित्रादि त्रयमिलित ब्राह्मण हस्तो परि दानस्य च अविशेषणात् आभ्युदयिके
एवविधानम् ॥ पार्वणे तु आसनादि दर्भवत् पवित्रदानस्य दक्षिणाग्रत्वम् प्रतीयते ॥ मधु मधु मधु इति यस्त
त्र इति ॥ तत्र पार्वणे भोक्तृम् इष्टतामर्ं ब्राह्मणानाम् आ व्यत्वेन मधुद्रव्य प्रकाशक मधु मधु मधु इति त्रिर्जपो मधु
वाता इति ऋक्सहितो गायत्री जपानन्तरम् क्रियते ॥ सो ऽत्र आभ्युदयिके मधुवाता इति मंत्र वर्जितः ॥ एतेन भो
जनादिकं दानैः काले मधुमंत्रपाठो निषिद्धः ॥ मधुमंत्रनिषेधात् मधुनो निवृत्ति र्नास्ति इत्यवगम्यते ॥ मधुनः
प्राधान्यम् ॥ मधुवाता इति मंत्रस्य गुणत्वम् यदि मधुनिवृत्ति र्भविष्यति तदा वचने मधुवर्जितम् इत्येव वक्तुम्
उचितम् स्यात् ॥ अन्यथा प्रधान निवृत्तौ गुणनिवृत्ते रपि अर्थसिद्धत्वात् ॥ विधानुमश व्यत्वात् ॥ न च गुणा
निवृत्त्या प्रधाननिवृत्तिः गुणलोपे न मुख्यस्य इति न्यायविरोधात् ॥ मधु मधु मधु इति जपाभ्यनुज्ञा न च न स्यात्
इति श्राद्धविवेकः ॥ पितृसंहितामर् इति पितृमहत्व प्रकाशक मंत्रमात्र उपलक्षणार्थम् ॥ यस्तत्र इति ॥ तत्र पार्वणे ॥

एतेषु श्राद्धरोगेषु अन्नस्य प्रकरोऽन्नविकाराणाम् ॥ तिलवत् तिलयुक्तम् यथा स्यात् तथा उक्तम् ॥ अतएव अक्षयवयुक्तम् यथा स्यात्
तथा ॥ विपरीतकौ ऽएतेषु श्राद्धरोगेषु कार्य्यः ॥ कल्पतरुस्तु विपरीतकौ दैवतीर्थादिदानेन इत्युक्तम् ॥ तदुक्तम् ॥ पात्राणाम्
पूरणादीनि दैवेनैव तु कारयेत् ॥ इत्यनेन प्राप्तत्वेन अनुवादकतापत्तेः ॥ पार्वणे तृप्ताः स्थ इति पः प्रश्नस्तत्स्थाने सम्पन्नम् ॥
इति वाच्यम् ॥ प्रश्नानन्तरम् सुसम्पन्नम् ॥ इति श्राद्धगौरुक्तेः शेषमन्नं किं देयम् ॥ इति पृष्टे तु इष्टेभ्यो दीयताम् इति प्रतिवचनं
सन्तानाहम् पुनः शेषमन्नं देयमस्वानम् ॥ इत्यपि इष्टेभ्यो दीयताम् एतत् ॥ इति सम्प्रवदन्ति ते ॥ इति ब्रह्मपुराणात् ॥
आद्यम् पितरम् पूर्ववत् गोत्रसम्बन्धनामभिरामन्त्र्य ॥ द्वितीयम् पितामहम् तृतीयम् प्रपितामहम् ॥ मध्यदेशाग्र
देशयोः दर्भस्य इति शेषः ॥ एतेषामपि त्रिषु स्थानेषु आवाहितानाम् ॥ पित्रादीनाम् वामतो दक्षिणस्याम्दिशि ॥ एवञ्च
कर्तुर्दक्षिणतो उपचारो भवति ॥ एतेन कल्पप्रदीपे दक्षिणास्थित प्रागग्रकुशमूलमध्याग्रेषु मात्रादिभ्यो ॥ मध्य
स्थितप्रागग्रकुशमूलमध्याग्रेषु पित्रादिभ्यः तदुत्तर प्रागग्रकुशमूलमध्याग्रेषु मातामहादिभ्यः ॥ प्राङ्मुखेनावनेजनादि

अवनेजनादि दातव्यम् ॥ इति यत्कृतम् तत्र निरस्तम् ॥ मात्रपक्षस्य पूर्वम् दूषितत्वात् ॥ आवाहितपित्रादीनाम् वामदेशे
मातामहादीनाम् अन्यजल दानानुपपत्तेः ॥ कर्तुर्दक्षिणोपचारानुपपत्तेः ॥ कर्कस्तु वदरम् ॥ तत्र पात्रप्रक्षालनेन पिण्ड
पात्रप्रक्षालनेन ॥ अत्र अवनेजयेत् ॥ इति श्रुतेः ॥ अवने निक्ष्व इति वक्तव्यम् ॥ ननु वाजसनेयिनात् प्रत्यवने निक्ष्व इति उत्तरो
त्तर दानेन पिण्डानाम् मूलादिक्रमेण उपरि उपरि दानेन दातापि उत्तरोत्तर ऊर्द्ध ऊर्द्ध गतिर्भवति इति ॥ अथश्च आवरणादि
अग्रादिक्रमेण अधो अधो गतिर्भवति ॥ इति निष्कर्षः ॥ अन्तरवतेषु पार्वणादिषु ईषत् शक्तो ऽनल्पनस्नात् तूष्णीम् ॥
इति गन्धादि दानवाक्य निषेधः ॥ आचामयेत् लेपघर्षण प्रक्षालनादिकम् कारयेत् ॥ अन्यत्र पार्वणादौ यवादि ॥ इति आदि
पदेन दैवतीर्थः उपवीतित्वादि परिग्रहः ॥ दक्षिणाऽत्यवने दक्षिणादिक नीम्नेनतु आभ्युदयिकवत् ॥ प्राचीदिक निम्ने द
क्षिणाभिमुखस्य कर्तृत्वम् ॥ ननु प्राचीमुखस्य दक्षिणाग्रेषु कुशेषु ॥ ननु प्रागग्रेषु एष विधिः ॥ पिण्डदान विधिः ॥
अथ प्रकृत ब्राह्मणाचमनानन्तरम् ॥ ब्राह्मणाग्रभूमीम् सुसम्प्रोक्षित मस्तु इति प्रोक्षयेत् ॥ शिवा आपः इत्यादिनाच

८७ पुष्पान्तरेष्वनेकैकम् उदकेन हस्ते सिञ्चेत् ॥ इति ॥ सौमनस्यमस्तु इत्यनेन हस्ते पुष्पदानम् कुर्यात् ॥ अनन्तरम् अक्षतञ्च ॥
९७ अरिष्टञ्चास्तु इत्यनेन यवान् दध्यात् दापयेत् ॥ इति ॥ प्रयोजक निर्देशस्तु परोपदेश पक्षे अन्यद्वारापि पूर्ववत् दक्षिणामुख
कर्तव्यम् ॥ इति उपदेशायवा ॥ अर्घ्यदानवत् इति ज्येष्ठो तरत्वाति देशाय ॥ ननु तंत्रतानि वर्तिः ॥ इति दृश्यते ॥ अर्घ्ये
ऽप्यप्यो दके चैव पिण्ड कान्नावनेजने ॥ तंत्रस्यानि वर्तिः स्यात् स्वधावाचन एव च ॥ इत्यनेन विधानात् ॥ षष्ठे च नियमः ॥ इति
गोत्रनामान्ते सम्बन्धि स्थाने यच्छीम विधत्ते ॥ न चतुर्थी कदाचन इति तस्मै ते स्वधा इति स्थाने चतुर्थी निषेधम् ॥ इति अपि
अप्युनरस्तिः ॥ तेन येचात्रत्या ॥ इति मंत्रो नपाठ्यः ॥ उत्तरार्धम् इदम् पार्वण विषयकम् अपि ॥ प्रार्थनास्तु सुप्रोक्षित
मस्तु ॥ इत्यादिषु प्रति मोक्षे ॥ अस्तु सन्तु इत्यादि प्रति वचने कृते पवित्रान्तर्हितान् पवित्राच्छादितान् पिण्डान् ॥ ऊर्जं
वहन्तिः ॥ इत्यनेन सिञ्चेत् अनन्तरम् तुष्णीम् पात्रम् उत्तानम् कृत्वा युग्मानेव इत्यादि वर्धमानम् कुर्यात् ॥
युग्मानेव न एकैकम् दक्षिणादाने स्वस्ति वाच्यः ॥ पूर्वस्य पंक्तिमुखस्य स्थानं गुष्ठम् पाणिम् गृहीत्वा प्रणाम्य

८०

अनुव्रजेत् ॥ उत्सर्पः ॥ अत्र च दक्षिणा द्राक्षामलकादि ॥ तथाच ब्रह्मपुराणम् ॥ द्राक्षामलकमूलादि यवांश्चाथ निवेदयेत्
तान्येव दक्षिणार्थं तु दद्यात् विप्रेषु सर्वदा ॥ मुक्तमोदकादीनि निवेदयेत् भोजनाय दद्यात् ॥ तानि द्राक्षामलक
मूलानि ॥ सम्भवे समुच्चयः असम्भवे प्रत्येकम् ॥ इति आभ्युदयिकम् ॥ नित्यम् काम्यञ्च दर्शपौर्णमासवत् ॥ देवी
पुराणम् ॥ अष्टकामाघी आभ्युदया स्तीर्थ पात्रोपपत्तयः ॥ पित्र्यमातिरेकोयम् मासिकान्तो ध्रुवम् स्मृतम्
कालम् विवर्णोति अष्टकामाघी इति ॥ मासिकान्तात् अमावास्याश्राद्धात् अतिरेको इष्टकादिश्राद्धगणो ध्रुव
आवश्यकः ॥ तथाच विष्णुः ॥ आदित्यसंक्रमणम् विषुवत् द्वयम् ॥ विशेषेण अयन द्वयम् ॥ व्यतीपातो जन्म
र्क्षम् अभ्युदयश्च ॥ एतांस्तु श्राद्धकालान्वै काम्यान् आह प्रजापतिः ॥ श्राद्धमेतेषु यद्दत्तम् तदानन्त्याय कल्पते
एतच्च संयोगपृथक्त्व न्यायात् अविरुद्धम् ॥ सच न्यायः तिथितत्त्वे अनुसंक्षेपः ॥ तथाच छन्दोगपरिशिष्टम् ॥
असकृत् यानि कर्म्माणि क्रियेरन् कर्म्मकारिणा ॥ प्रतिप्रयोगम् नैवस्युर्मातरः श्राद्धमेव च ॥ आधाने होमयोश्चैव वैश्व

श्री ततम्

९२ देवे तथैवच ॥ बलिकर्म्मणि दर्शेच पौर्णमासे तथैवच ॥ नवयज्ञेच यज्ञज्ञा वदन्त्येवम् मनीषिणः ॥ एकमेव भवेत्
९४ श्राद्धम् एतेषुन पृथक् पृथक् ॥ नाष्टकासु भवेत् श्राद्धम् न श्राद्धे श्राद्धमिष्यते ॥ नशोष्यन्ति जातकर्म्म प्रोषितागते
कर्म्मसु ॥ विवाहादिकर्म्मगणे यउक्तो गर्भाधानम् शुश्रुमो ॥ यस्यान्ते विवाहादौ एकम् एव कुर्य्यात् श्राद्धम् ॥
नादौ कर्म्मणः कर्म्मणः स्यात् ॥ तथागणशः ॥ क्रियमाने भुमातृभ्यः पूजनम् सकृत् ॥ सकृत् एव भवेत् श्राद्धम्
आदौन पृथगादिषु ॥ यत्र यत्र भवेत् श्राद्धम् तत्र तत्रतु मातरः ॥ यानि कर्म्माणि कर्त्ता एन पुनः प्रतिदिनम् प्रति
मासम् प्रतिवर्षम् क्रीयन्ते ॥ वैश्वदेव बलिकर्म्म दर्श पौर्णमास श्रावणी आग्रहायणी आदिनी तेषु ॥
प्रथम प्रयोग एव ॥ श्राद्धम् मातृपूजाच नद्वितीयादि प्रयोगेष्वपि ॥ आधाने अग्न्याधाने होमयोः ॥ सायम्
प्रातर्होमयोः ॥ नवयज्ञश्च आग्रहायणीषि ॥ एतेषु आधानादिषु प्रतिप्रयोगमिव कर्म्मापि श्राद्धमनकार्य्यम्
किन्तु आधानादौ सकृत् श्राद्धं कृते सर्वे ष्वेव कृतम् स्यात् ॥ अत्र पराशरः क्रीयमानेषु इत्यादि वचनस्य नविषयः ॥ इति ९२

श्री

प्रतिदिन प्रतिपक्ष प्रतिमास प्रतिवर्ष विहित कर्म्म विवाहादि गर्भाधानान्त कर्म्मणो भिन्नदिन करणात्ते नभिन्न विषयत्वात्
तेन अन्यत्र आवश्यमादौ प्रतिकर्म्म एव श्राद्धम् कर्तव्यम् इत्युक्तम् ।। सर्वाण्येव अन्वाहार्य्यवन्ति इति गोभिलगृह्ये ।सर्वा
ण्येव वक्ष्यमाणानि कार्य्याणि अन्वाहार्य्यवन्ति अन्वाहार्य्यम् आभ्युदयिकम् ।। प्रवेशे श्राद्धकरणं तीर्थयात्रायामिति वक्तव्यम्
गत्वा नदेशान्तरम् यत्तु श्राद्धम् कुर्य्यात्तु सर्पिषा ।। यत्रार्थम् इति तत्र प्रोक्तम् प्रवेशे च न संशयः ।। इति भविष्यपुराणात् ।। वंशो
वाक्यावलिः ।। यस्तु तस्तु तीर्थे: प्रत्यागमनोत्तर स्वगृह प्रवेश इत्यर्थः ।। इत्यव वक्तव्यम् ।। यात्रा प्रत्यागमनोत्तर प्रवेशयोर्भे
दात् ।। प्रत्यागमन लाभस्तु प्रत्यागमन श्राद्ध इति प्रागुक्तेः ।। ततश्च प्रवेशे चेति चकारेण श्राद्ध मात्रम् समुच्चितम् ।। ननु
तस्य यात्रार्थम् अपि इति ।। तथा च देवीपुराणे ।। अकालेऽप्यथवा काले तीर्थश्राद्धम् तथा नरैः ।। प्राप्तैरेव सदा कार्य्यम्
कर्तव्यम् पितृतर्पणम् ।। पिण्डदानन्तु तत्र शस्तम् पितृणाञ्चेति दुर्लभम् ।। विलम्ब्यमैव कर्तव्यो नचैव विघ्नमाचा
चरेत् ।। श्राद्धम् तत्र प्रकर्तव्यम् अर्घ्यावाहन वर्जितम् ।। अत्र अकाल इति मलमासादि पर्य्युदस्त कालप्रतिप्रसवः ।।

श्रा॰ तत्त्वम्
९९
तथा ले तद्बाध पर्युदासापत्तेः ॥ किन्तु पर्युदस्तेतर कालपरम् ॥ तत्र शादृश्य समाव श्च तद् न्यत्वम् तत्स्यता ॥ अप्राशस्त्यम् विरोध
११ श्च नञोऽर्थाः षट् प्रकीर्तिताः ॥ इति अन्यूनासगन्धात् स्मारात् काल इति ॥ प्रशस्तापराह्णादिकालः परम् ॥ अत्र शुचेः
प्राप्तस्य विविहितम् प्रथमदिन एव श्राद्धम् तेन पूर्वदिने शरदाशौचेलादौ वागमनेऽपि पूर्वेद्युर्दिने श्राद्धम् अविरुद्धम् ॥
तथाच हलायुध वचनम् ॥ गत्वैव तीर्थम् वार्तायाम् श्राद्धम् तत्र प्राप्ति हेतुकम् ॥ पूर्वाह्णे प्रथमवा प्रति देशस्याग पूर्व
दक्षिणे ॥ पूर्वाह्णे संगवे पूर्वदक्षिणे अग्नि कोणे पिण्डदानम् इति श्राद्धासम्भवे ॥ केवलपिण्डदानम् ॥ इति न
पौनरुक्त्यम् ॥ पिण्ड प्रतिपत्तिमाह मत्स्यपुराणम् ॥ पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा क्षिपेत् ॥ तीर्थश्राद्धे
सदा पिण्डान् क्षिपेत्तीर्थे विशेषतः ॥ गंगायां काशवत्याम् ॥ सम्वत्सरम् द्विमासोनम् पुनस्तीर्थं व्रजेत् यदि ॥ मुण्ड
नञ्चोपवासञ्च तथा यत्नेन कारयेत् ॥ अत्र द्विमासोनम् इत्यनेन दशमासात् पूर्वम् पुनस्तीर्थगमने मुण्डनोपवासौ
न कार्यौ इति सूचितम् ॥ अन्ये विद्वान् प्रमाणान्य शुद्धितत्वे सम्यगभिहितम् इति तत्रैवानुसन्धेयं ॥ इति श्राद्धतत्त्व समाप्तम्